



# संस्कृतभाषा पाठ्यपुस्तकम्

## वेदभूषणद्वितीयवर्षम् / प्रथमा द्वितीयवर्षम् / कक्षा सप्तमी

## महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षा-बोर्ड

(भारतसर्वकारस्य शिक्षामन्त्रालयेन संस्थापिता मानिता च)

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू: रामाय तस्मै नमः ।
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहं
रामे चित्तलयः सदा भवतु मे भो राम! मामुद्धर ॥
क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥
यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।
आत्मा वै जायते पुत्रः पुत्रेण दुहिता समा ।
अनुव्रतः पितुः पुत्रो माता भवतु सम्मनाः ।
अजरामरवत् प्राज्ञो विद्यामर्थं च साधयेत् ।
स्वाध्यायाभ्यासनं चैव वाङ्मयं तप उच्यते ।
सर्वे गुणाः काञ्चनमाश्रयन्ति ।
















महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी (म.प्र.)
(भारतसर्वकारस्य शिक्षामन्त्रालयः)
Phone : (0734) 2502266, 2502254, E-mail : msrvvpujn@gmail.com, website - www.msrvvp.ac.in

# संस्कृतभाषा

## पाठ्यपुस्तकम्

वेदभूषणद्वितीयवर्षम् / प्रथमा द्वितीयवर्षम् / कक्षा सप्तमी

## महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षा-बोर्ड

(भारतसर्वकारस्य शिक्षामन्त्रालयेन संस्थापिता मानिता च)


**महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् ,उज्जयिनी (म.प्र.)**

(भारतसर्वकारस्य शिक्षामन्त्रालयः)



वेदविद्या मार्ग, चिन्तामण, पो. ऑ. जवासिया, उज्जैन - 456006 (म.प्र.)

Phone : (0734) 2502266, 2502254, E-mail : msrvvpujn@gmail.com, website - www.msrvvp.ac.in

| | | |
|---|---|---|
| संरक्षकः | : | भारतसर्वकारस्य माननीयः शिक्षामन्त्रिमहोदयः, प्रतिष्ठानस्य अध्यक्षमहोदयश्च |
| मार्गदर्शकः | : | प्रतिष्ठानस्य माननीयः उपाध्यक्षः प्रो. प्रफुल्लकुमारमिश्रो महाभागः |
| मार्गदर्शकः | : | प्रतिष्ठानस्य सचिवः प्रो. विरूपाक्षः वि. जड्डीपाल् |
| विशेषज्ञाः | : | .............. |
| लेखकगणः | : | श्री शेषराज रेग्मी, श्री यतिराज सापकोटा, श्री सुकान्त प्रामाणिक |
| आवरणं सज्जा च | : | .......... |
| चित्राङ्कनम् | : | ........... |
| यान्त्रिकसहयोगः | : | .......... |
| अक्षरविन्यासः | : | ......... |

@ महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी

| | | |
|---|---|---|
| मूल्यम् | : | ...... |
| संस्करणम् | : | ......... |
| प्रकाशिताः प्रतिकृतयः | : | ........... |
| पत्रस्य उपयोगः | : | ८० जी.एस.एम. पत्रे मुद्रितम् |
| प्रकाशकः | : | महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् |

(भारतसर्वकार- शिक्षामन्त्रालयस्य स्वायत्तशासि संस्थानम्)

email : msrvvpujn@gmail.com,

Web : msrvvp.ac.in

दूरभाषा (०७३४) २५१००७८

# प्रस्तावना

## (2020 राष्ट्रियशिक्षानीतेः आलोके)

राष्ट्रियवेदविद्याप्रतिष्ठानस्य स्थापनां भारतसर्वकार-शिक्षामन्त्रालयः (उच्चतरशिक्षाविभागः) माननीयस्य शिक्षामन्त्रिणः (तदानीन्तन-मानवसंसाधन-विकासमन्त्रिणः) अध्यक्षतायां नवदेहल्यां 1987 वर्षे जनवरीमासस्य 20 दिनाङ्के 1860 सोसायटीपञ्जीकरणाधिनियमान्तर्गततया अकरोत्। भारतसर्वकारः वेदानां श्रुतिपरम्परायाः संरक्षणाय, संवर्धनाय, विकासाय, प्रचाराय, प्रसाराय च प्रतिष्ठानस्य स्थापनायाः संकल्पनां 6-3/85-SKT-IV पत्र-संख्यया 30-03-1987 दिनाङ्के भारत-राजपत्रेऽधिसूचनया प्राकाशयत्। संस्थापना-स्मरणपत्रे सस्वरवेदाध्ययनस्य, श्रुतिपरम्परायाः च संरक्षणाय, वैज्ञानिकरीत्या वेदार्थानां व्याख्यानाय च दायित्वं वेदविद्याप्रतिष्ठानाय प्रदत्तम् आसीत्। 1993 तमे वर्षे मई-मासे राष्ट्रियवेदविद्याप्रतिष्ठानस्य उज्जयिन्यां स्थानान्तरणानन्तरं प्रतिष्ठानस्य नाम महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् इति परिवर्तितम् अभूत्। सम्प्रति प्रतिष्ठानमिदं मध्यप्रदेशसर्वकारेण प्रदत्तायां 23.6 एकड-भूमौ महाकालमन्दिरात् 6 किलोमीटरदूरे उज्जयिनी-नगर्याम् प्रतिष्ठितम् अस्ति।

1986 राष्ट्रियशिक्षानीतौ, 1992 संशोधितशिक्षानीतौ, 1992 कार्यप्रणाल्यां- (प्रोग्राम ऑफ एक्शन) च वैदिकशिक्षायाः संवर्धनार्थं राष्ट्रियवेदविद्याप्रतिष्ठानाय अखिलभारतस्तरीयम् उत्तरदायित्वं प्रदत्तम् अस्ति। भारतस्य प्राचीनज्ञानभाण्डागारस्य, ज्ञानविज्ञानकोषस्य, मौखिकपरम्पराणां शिक्षाप्रदानाय च गुरुशिष्य-परम्परानुरूपं पारम्परिकगुरूणां नियोजनोद्देश्यं 1992 शिक्षानीतेः कार्यप्रणाल्यां (प्रोग्राम ऑफ एक्शन) उल्लिखितमासीत्।

राष्ट्रस्य आकाङ्क्षानुरूपं, राष्ट्रियस्तरे वेदस्य संस्कृतस्य च शिक्षणार्थं, मानकीकृतपरीक्षार्थं च बोर्ड-इत्यस्य स्थापनायाः पक्षे राष्ट्रियसहमतेः, जनादेशस्य, शिक्षणनीतेः, विशिष्टोद्देश्यानां कार्यान्वयन-व्यूहस्य चानुरूपं भारतसर्वकारस्य शिक्षामन्त्रिणाम् अध्यक्षतायां महासभायाः शासिपरिषदश्च समावेशे "महर्षिसान्दीपनिराष्ट्रीयवेदसंस्कृत-शिक्षाबोर्ड्" इत्यस्य स्थापना 2019 तमे वर्षे अभवत्। प्रतिष्ठानस्य नियमावल्यनुरूपं वेदसंस्कृतशिक्षाबोर्ड् अपि वैवेदशिक्षाया एकः

भागः, तथा प्रतिष्ठानस्योद्देश्यानां पूर्तये नियमेषु संकल्पना च कृता वर्तते। "महर्षिसान्दीपनिराष्ट्रीयवेदसंस्कृतशिक्षाबोर्ड्" इत्यस्य कृते भारतसर्वकारात् भारतीयविश्वविद्यलयसंघात्, केन्द्रीयमाध्यमिकशिक्षाबोर्ड् इत्यस्मात्, राष्ट्रियशैक्षिकानुसन्धान-प्रशिक्षणपरिषदः च मान्यता प्राप्ता वर्तते।

भारतसर्वकारस्य शिक्षामन्त्रालयेन 2015 तमे वर्षे श्री एन्. गोपालस्वामी, ऐ.ए.एस् (प्रधान-निर्वाचनायुक्तचरः)-महोदयस्य आध्यक्ष्ये संरचितया समित्या "संस्कृतस्य विकासाय दूरदृष्टिः पथप्रदर्शनं च-दशवर्षाणां परिप्रेक्षायां योजना" इत्यनया अनुशंसितं यत् उच्चतरमाध्यमिकस्तरपर्यन्तं वेदसंस्कृतविषयकशिक्षणस्य पाठ्यक्रमाणां मानकीकरणाय, संवर्द्धनाय, परीक्षामान्यतायै, प्रमाणीकरणाय "वेद-संस्कृतशिक्षाबोर्ड्" इत्यस्य झटिति स्थापना आवश्य करणीया। प्राथमिकस्तरे वेदस्य संस्कृतस्य चाध्ययनम् अभिप्रेरकं, सम्प्रेरकम्, आनन्ददायकं च भवेत् । आधुनिकशिक्षाबोर्ड-व्यवस्थायां पाठ्यमानानाम् आधुनिक-विषयणाम् अपि वेद-संस्कृतपाठशालासु सम्यक् मिलित्वा अध्यापनम् आवश्यकम्। साम्प्रतिकसमाजस्य आवश्यकतानां संपूर्तये, प्राचीनज्ञानस्य सम्यक् उपयोगं कृत्वा वेद-संस्कृतपाठशालानां पाठ्यक्रमसामग्र्यः आधुनिकसमस्यानां निवारणोपायान्वेषणाय विकसिताः स्युः इति च समितेः अनुशंसा आसीत् ।

संस्कृतस्य आधुनिकविषयाणां च सुमेलनेन स्तरानुगुणं पाठ्यसामग्र्याः विकासपुरस्सरं सस्वरवेदपाठे कौशलसंवर्धनस्य, वेदकण्ठस्थीकरणे, वेदमन्त्रोच्चारणे च अखिलभारतस्तरे मानकीकरणस्यावश्यकता वर्तते । यतो हि वेदच्छात्रा अन्ततोगत्वा वेदभाष्याणाम् अध्ययने, वेदार्थचिन्तने समर्था भवेयुः। वेद-संस्कृत-छात्राणां वृत्तिप्राप्ति-लक्ष्यं मनसि निधाय मुख्यधारायाम् अपि भावि अध्ययनं सुशकं भवेत्। समुचितस्तरे वेदविकृतिपाठानामध्ययने ध्यानं दात्तव्यम् इति च वेदपाठशालानां सम्बन्धे समितिः संस्तुतवती। वेदानां सस्वरपाठः आभारतं सर्वत्र राज्येषु समानरूपेण नास्ति इति हेतोः समितेः सदस्यैः चिन्ता प्रकाशिता। अतः वेदानां सस्वरपाठस्य शैल्यादीनां, शिक्षणपद्धतेश्च क्षेत्रीयविविधतानामुपरि हस्तक्षेपम् अकृत्वा

विद्यमानायाः स्थितेः समाधानाय, समीकरणाय शीघ्रं समुचितव्यवस्था प्रतिष्ठानेन करणीया इति च वेदपाठशालानां सम्बन्धे समितिः संस्तुतवती ।

वेदः संस्कृतं चेति द्वयम् अविभक्तम्, एकम् अपरस्य उपोद्बलकं च वर्तते। परं तु आभारतं समेषां वेदपाठशालानां संस्कृतपाठशालानां च परीक्षा-मान्यतायाः, सम्बद्धतायाः च समस्या चिरकालात् सम्मुखं वर्तते, एतदर्थं वेद-संस्कृतयोः परीक्षादिविषये सहैव राष्ट्रस्तरे वेदसंस्कृतबोर्ड् इत्यस्य स्थापना भवेत्। समितिः एतदपि संस्तुतवती यत् बोर्ड-माध्यमेन आयोजयिष्यमाणा परीक्षा विधिसम्मता सर्वकारेण मानिता च भवेत्, शिक्षाया आधुनिकबोर्ड् प्रणाल्या तुल्या च भवेत्। समित्या एवमपि अनुशंसा कृता यत् "महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्" "महर्षिसान्दीपनि-राष्ट्रियवेदसंस्कृतविद्यापरिषद्" इति परीक्षा बोर्ड् संज्ञया उद्घोषितं मानितं च भवेत्, एतस्य मुख्यालयः उज्जयिनी भवेत्। परीक्षाबोर्ड् कार्याणि अतिरिच्य अद्यावधि प्रचलितानां वेदप्रसार-प्रचार-संवर्धन-कार्यक्रमाणाम् अन्येषां वेदाध्ययन-संवर्धन-गतिविधीनाञ्च सञ्चालनं प्रतिष्ठानस्य पक्षतः एव यथापूर्वं भवेत् इति समितिः संस्तुतवती ।

वेदशिक्षायाः संचालनं, संवर्धनं, प्रचारः च भारतस्य गौरवशालिज्ञानपरम्पराया एकं सुविस्तृतं व्यापकं च अध्ययनमस्ति । वेदाध्ययने (संहिताः, विकृतिपाठाः, स्वराणां सम्यक् प्रयोगः ज्ञानादयश्च) सस्वरपाठकौशलम्, मन्त्रोच्चारणम्, संस्कृतज्ञानप्रणाल्याः बहुस्तरीया श्रुतिपरम्परा सम्मिलिता भवति। 2020 राष्ट्रियशिक्षानीतेः (NEP-2020) अनुरूपं पुनर्व्यवस्थापितायां 3 + 4 सप्तवर्षीयायां प्रतिष्ठानस्य पाठ्यक्रमयोजनायां वेदाध्ययननिरतान् पारम्परिकच्छात्रान् मुख्यधारायाम् आनेतुं नीतेः दृष्टौ आधुनिकविषयाः यथा-संस्कृतम्, आंग्लभाषा, मातृभाषा, गणितम्, सामाजिकविज्ञानम्, विज्ञानम्, संगणकविज्ञानम्, दर्शनम्, योगः, वैदिककृषिः इत्यादयः विषयाः नीतिनिर्धारकनिकायेषु वैदिकशिक्षाया उपरि राष्ट्रियसम्मत्यनुरूपम् उपलब्धसमयाधारेण पाठ्यक्रमानुरूपम् अध्येयाः विषयाः समावेशिताः। रा.शि.नी. 2020 इत्यस्य अनुसरणाय प्रतिष्ठानेन प्रवर्तिता अध्ययनस्येयं विशिष्टा

पाठ्यक्रमयोजना भारतीयज्ञानप्रणाल्याः पाठ्यक्रमसामग्रीषु आधुनिकज्ञानविज्ञानैः च सह भारतीयचिन्तनधारायाः, वैदिकज्ञानस्रोतसः च उपयुक्तज्ञानसामग्रीणां समायोजनं वर्तते।

प्रतिष्ठानस्य बोर्ड्-सम्बद्धानां पाठशालानां, गुरुशिष्य-इकाई-इत्यादीनां, गुरुकुलानां च पाठ्यक्रमस्य आधारभूतः मुख्यः विषयः भवति सम्पूर्णवेदशाखाया कण्ठस्थीकरणेन सह सस्वराध्ययनम्। तेन सह नियमानुरूपं संस्कृतभाषा व्याकरणं च, आंग्लभाषा, मातृभाषा, गणितम्, सामाजिकविज्ञानम्, विज्ञानम्, संगणकविज्ञानम्, दर्शनम्, योगः, वैदिककृषिः, समाजोपयोगि-उत्पादकविषयाः (SUPW) इत्यादयः पञ्चान्यूनं यथाचयनं विषया भवन्ति।

इतिहासविद्भिः विदितो विषयो वर्तते यत् महर्षेः पतञ्जलेः काले ऋग्वेदस्य 21 शाखाः, यजुर्वेदस्य 101 शाखाः, सामवेदस्य 1000 शाखाः, अथर्ववेदस्य च 9 शाखाः चेति वेदानां 1131 शाखा आसन्। याते काले बह्वीनां वेदशाखानाम् अध्येतृपरम्परायाः लोपात् बह्व्यः शाखाः कालकवलिता अभूवन्, सम्प्रति केवलं 10 शाखाः अवशिष्यन्ते, तेषु ऋग्वेदस्य एका, यजुर्वेदस्य चतस्रः, सामवेदस्य तिस्रः, अथर्ववेदस्य च द्वे शाखे सस्वरपाठपरम्परायां समुपलभ्यन्ते। एतासामुपरि एव भारतीयज्ञानप्रणाली आश्रिता वर्तते। एतासां 10 शाखानां कण्ठस्थीकरणेन सस्वर-पाठेषु प्रवीणाः पण्डिताः ये वेदपाठपरम्परां वेदज्ञानपरम्पराञ्च पूर्णरूपेण प्राचीनपद्धत्या च संरक्षितवन्तः ते विरला एव तथा अध्येतारोऽपि न्यूनमात्रया एव सन्ति । यावत् श्रुतिपरम्परानुसारेण कण्ठस्थीकरणपूर्वकं वेदशिक्षाम् आश्रित्य मूलरूपेण चिन्तनं न क्रियते, दृष्टिः न दीयते तावत् वेदशिक्षाव्यवस्था सुदृढा न भवति। सामान्यविद्यालयीयाध्ययने वेदस्य सस्वरपरम्पराया अध्येयविषयत्वेन अध्यापनं न भवति, न तु विद्यालयीयपाठ्यक्रमे वेदपाठ्यक्रमसमायोजनाय सञ्चालनाय वा विशेषज्ञता सामान्यबोर्ड्-मध्ये वर्तते। केवलं मुद्रितवेदपुस्तकवाचनं पारम्परिकं वेदाध्ययनं नैव भवति। अत एव एषा स्थितिः वर्तते।

वेदछात्राः ये श्रुतिपरम्परया सस्वरं वेदं गुरुमुखात् परम्परया अधियन्ति, ते सुदूरे ग्रामेषु नगरेषु वा स्थितेषु वेदगुरुकुलेषु, आश्रमेषु, पाठशालासु वा निवसन्ति, पठन्ति च। वेदाध्ययनाय वेदविद्यार्थिनः प्रतिवर्षम् अन्यूनं 1900-2100 होराः उपयुञ्जते। ते आधुनिक-

विद्यालयीयशिक्षणप्रणालेः समयात् द्विगुणितं समयं वेदाध्ययनाय उपयुञ्जते। वैदिकछात्राः गुरोः सम्मुखम् उपविश्य शब्दशः वेदोच्चारणशिक्षणं प्रभुवन्ति, वेदस्य एकैकं शाखायां स्वाध्यायविधया सस्वरम् उच्चारणेन सह कण्ठस्थीकरणमपि अवश्यं कुर्वन्ति। आधुनिकान् च विषयान् यथासामर्थ्यम् अधियन्ति।

अत्रेदं ज्ञातव्यं भवति यत् वेदाध्ययनस्य, वेदमन्त्राणां पाठविधेः, गुरुशिष्ययोर्मध्ये प्रचलितायाः अनूचानायाः वेदानां श्रुति-परम्परायाः, पाठपरम्परायाः एव कारणात् वेदानां श्रुतिप्रचालितं मौखिकप्रसारणं मानवताया अमूर्तसांस्कृतिकनिधिरूपेण विश्वसंस्थायाः यूनेस्को (UNESCO) इत्यस्य मौखिकसांस्कृतिकनिधेः सूच्यां मानितं विद्यते। अतः वैदिकशिक्षायाः प्राचीनताम् अखण्डतां च चिरकालं स्थापयितुं योग्या फलप्रदात्री कार्यनीतिः आवश्यकी वर्तते। अतः प्रतिष्ठानं, प्रतिष्ठानस्य बोर्ड् च 2020 राष्ट्रियशिक्षानीतौ निर्दिष्टैः कौशलविषयैः, व्यावसायिकविषयैः,आधुनिकविषयैः च सह यथा- संस्कृतम्, आंग्लभाषा, मातृभाषा, गणितम्, सामाजिकविज्ञानम्, विज्ञानम्, सङ्गणकविज्ञानम्, दर्शनम्, योगः, वैदिककृषिः, इत्यादिभिः मिलित्वा विशिष्टं सस्वर-वेदपाठ्यक्रमं सर्वासु उपलब्धशाखासु सञ्चालयति, स पाठ्यक्रमः सर्वकारेण मानितः, सर्वकारेण मानितं बोर्ड्-प्रमाणपत्रं च प्रदीयते।

वेदितव्ये परा अपरा चेति द्वे विद्ये अधीत्य मानवः सुखीभवति। अस्मिन् प्रपञ्चे अधीता विद्या अविद्या च सुखेन जीवनयापनार्थं मनुष्यान् समर्थान् करोति, परलोके मुक्तियोग्यान् च विधत्ते। वेदे वर्णितानां भौतिकानां विषयाणां ज्ञानं, भौतिकज्ञानस्य साहाय्यशाखाः, भौतिकरुच्यनुगुणाः विषयाः च अपरा विद्येति नाम्ना कथ्यन्ते। उपनिषत्सु प्रतिपादितम् आत्मचिन्तनम् आत्मनः अन्वेषणं च परा विद्येति नाम्ना कथ्यते। प्राचीनभारते प्रसिद्धाः, वेदाः सहयोगिन्यः ज्ञानविषयिण्यः विद्याः चतुर्दश (14) वर्तन्ते। ता यथा- चत्वारः वेदाः, षड्वेदाङ्गानि, पुराणानि, न्यायः, मीमांसा, धर्मशास्त्रं च । चतुर्दशभिः विद्याभिः सह आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, अर्थशास्त्रम् (स्थापत्यवेदः वा) इति चतुरः उपवेदान् संयोज्य 18 विद्याः वर्तन्ते। सहस्रशः वर्षेभ्यः अत्र भरतखण्डे भारतभूमौ सर्वेषां ज्ञानानां, विज्ञानानां, शिक्षणस्य च भाषा

संस्कृतभाषा आसीत्, यतो हि अस्मिन् भरतखण्डे भारतमहाद्वीपे भारतभूखण्डे दीर्घकालं यावत् एकमात्रं भाषितभाषा संस्कृतभाषा एव आसीत्। तस्मात् तदा वेदार्थानां सुलभतया ज्ञानाय जनाः समर्थाः एव आसन्।

प्राचीनस्य तक्षशिला-विश्वविद्यालयस्य विषये वयं सर्वे श्रृणुमः एव। तत्र अष्टादश (18)-शिल्पानां, प्रौद्योगिकविषयाणां च अध्ययनम् अध्यापनं च प्राचलत्, आनुभविकं प्रयोगपूर्वकं शिक्षणं प्राचलत् इति च वयं जानीमः एव। छान्दोग्योपनिषदि[1] केषुचित् नीतिशास्त्रग्रन्थेषु च एतासां विद्यानां विवरणं लभ्यते। तदनीन्तनाः ते 18 व्यावसायिकपाठ्यविषया अद्यापि अध्ययनयोग्यविषया इति ज्ञायन्ते । ते यथा- 1. गायनसङ्गीतम् 2. वाद्यसङ्गीतम् 3. नृत्यम् 4. चित्रकला 5. लेखशास्त्रम् 6. अभियान्त्रिकी 7. मूर्तिकला 8. प्रसूतितन्त्रम् 9. वाणिज्यम्, 10. गणितम् 11. आयुर्वेदः, चिकित्सा 12. कृषिः 13. रथनिर्माणम्, परिवहनम् 14. राज्यशासनम्, प्रशासनिकप्रशिक्षणम्, 15. धनुर्विद्या, दुर्गनिर्माणम्, सैन्यकला च, 16. विविध-वस्तुनिर्माणम्, उत्पादनं च , 17. सर्पविद्या 18. गुप्तनिधेरन्वेषणम् । उपर्युक्तासु कलासु शिल्पेषु च अभियान्त्रिक्याः शिक्षणाय, कौशलसम्पादनाय च प्राचीनकाले प्रशिशिक्षुप्रणाली विकसिता आसीत्।

समग्रे विश्वे प्राचीनसभ्यतासु सर्वदौ गण्यमानायां भारतीयसभ्यतायां शास्त्राणां, ज्ञानस्य, विज्ञानस्य, प्रौद्योगिक्याः च शिक्षणस्य विशाला सुदृढा च परम्परा वर्तते । भारतं प्राचीनकालादेव ऋषीणां, ज्ञानिनां, विदुषां वैज्ञानिकानां च भूमिः अपि वर्तते। अनुसन्धानैः इदं ज्ञातं यत् भारतं विद्यानाम् (विद्या आध्यात्मिकं ज्ञानम् , अविद्या भौतिकं ज्ञानम्) अध्ययने अध्यापने च विश्वगुरुः आसीत् भविष्यति च, समग्रे प्रपञ्चे भारतं सक्रियं योगदानं च सर्वेषु क्षेत्रेषु प्रादात्, ददाति च। प्राचीनकालादेव भारतस्य नानभागेषु आधुनिकविश्वविद्यालयेन तुल्यानां बृहतां शिक्षणकेन्द्राणां गुरुकुलानां च स्थापना अभवत्, तत्र सहस्राधिकाः विद्यार्थिनः नानास्थानेभ्यः नानादेशेभ्यः च आगच्छन्ति स्म। प्राचीनै ऋषिभिः अन्विष्टाः ज्ञान-विज्ञान-प्रौद्योगिक्यभियान्त्रिक्यादीनाम्

---

[1] नाम वा ऋग्वेदो यजुर्वदः, सामवेदः, आथर्वणश्चतुर्थ इतिहासपुराणः पञ्चमो वेदानां वेदः पित्र्यो राशिर्दैवो निधिर्वाकोवाक्यमेकायनं देवविद्या ब्रह्मविद्या भूतविद्या क्षत्त्रविद्या नक्षत्रविद्या सर्पदेवजनविद्या नाम---। छान्दोग्ये 7.1.4

अध्ययनपद्धतयः, प्रयोगात् परीक्षणविधानानि, सिद्धान्ताः च अनेकेषु विषयेषु विश्व-ज्ञानस्य मूलसिद्धान्तान् स्थापयामासुः, चिन्तनस्य उत्साः च अभूवन्, खगोलविज्ञाने, भौतिक्यां, रसायनविज्ञाने, गणिते, चिकित्साविज्ञाने, प्रौद्योगिक्यां, ध्वन्यनुसन्धाने, व्याकरणे एवम् अन्यत्र च तादृशेषु विविधेषु विषयेषु सिद्धान्तप्रतिपादने प्राचीनकालादेव भारतस्य योगदानम् अतीव महत्त्वपूर्णं वर्तते इति अनुसन्धानेन आविश्वं प्रथितमेव । अतः भव्यस्य भारतस्य नागरिकाः बालकाः बालिकाः च अवश्यमेव ऋषिप्रदत्तं मूलं वैदिकं ज्ञानं प्राप्नुयुः गौरवमनुभूय भारतभाग्यं चिन्तयेयुः, रचयेयुः च । भारत-संसद्भवनस्य मुख्यद्वारि उट्टङ्कितं “वसुधैव कुटुम्बकम्” इति, विविधेषु अवसरेषु गणमान्यैः संवैधानिकप्राधिकरणैः उद्धृतानां वेदमन्त्राणामर्थज्ञानं वेदाध्ययनेन, वेदमन्त्रार्थचिन्तनेन एव सम्भवति। वेदेषु, सम्पूर्णे वैदिकसाहित्ये च सत्, चित्, आनन्द-तत्त्वचिन्तनं समेषां प्राणिनाम् अन्तर्णिहितयाः समानताया उपरि बलं प्रददाति।

वेदाः वैज्ञानिकज्ञानस्य स्रोतांसि वर्तन्ते। अतः बह्वीनाम् आधुनिकसमस्यानां समाधानाय वेदमूलकानां भारतीयज्ञानस्रोतसां श्रद्धया पुनः पुनः अन्वेषणम् आवश्यकम्। वेदानां पाठं, वैदिकज्ञानसामग्रीं, वैदिकदर्शनं वा आध्यात्मिकज्ञानस्य वैज्ञानिकज्ञानस्य च रूपेण यावत् वयं छात्रान् न बोधयामः तावत् आधुनिकभारतस्य अपेक्षा-पूर्त्यर्थं वेदे निहितानां विविधानां ज्ञान-विज्ञान-विचाराणां देशे सर्वत्र, विश्वस्तरे च प्रसारः पूर्णरूपेण नैव भविष्यति।

वेदाध्यापनं वेदशिक्षा वा (वेदपाठः, मौखिकी, श्रुतिपरम्परा वा, वेदज्ञानपरम्परा) केवलं धार्मिक- शिक्षामात्रं नैव । वेदानामध्ययनं नाम धर्मविषयकमेव निर्देशमात्रम् इति कथनं सर्वथा अनुचितमेव। वेदः धार्मिकवाङ्मयमात्रम् एव न, वेदेषु केवलं धार्मिकसिद्धान्तमात्रम् एव न प्रतिपादितम्, अपितु वेदाः ज्ञानविज्ञानकोषाः सन्ति, तत्र ज्ञानं विज्ञानं च वर्तते । मानवजीवनसाफल्याय, आनन्दाय च आवश्यकानां समेषां ज्ञानानां कोषरूपः वेदः, स वेदः सर्वज्ञाननिधिः । अतः वेदशिक्षणं वेदाध्ययनं वा धार्मिकशिक्षणम्, धार्मिकनिर्देशः इति वा चिन्तनं सर्वथा युक्तियुक्तं न विद्यते।

2004 वर्षस्य 6736 नागरिक-प्रतिवेदनसंख्यान्वितम् अभियोगम् (AIR 2013: 15 SCC 677) अनुलक्ष्य 03-07-2013 दिनाङ्के प्रकाशिते माननीयसर्वोच्चन्यायालयस्य निर्णये स्पष्टं यत् वेदाः केवलं धार्मिकग्रन्थाः नैव सन्ति, वेदेषु गणितं, खगोलविज्ञानं, ऋतुविज्ञानं, रसायनविज्ञानं, द्रवचालिकी (हाइड्रोलिक्स) भौतिकविज्ञानं, प्रौद्योगिकी, कृषिः, दर्शनं, योगः, शिक्षा, काव्यशास्त्रं, व्याकरणं, भाषाविज्ञानम् इत्यादयः विषयाः सम्मिलिताः सन्ति इति।

**2020 राष्ट्रियशिक्षानीतेः अनुसरणपूर्वकं प्रतिष्ठानस्य, बोर्ड् इत्यस्य च माध्यमेन वेदशिक्षणम्-**

2020 राष्ट्रियशिक्षानीतौ भारतीयज्ञानप्रणाली नाम्ना संस्कृतज्ञानप्रणाली संज्ञिता अस्ति। तत्र भारतीयज्ञान-प्रणाल्याः महत्त्वं, पाठ्यक्रमे तस्याः समावेशः, विविधविषयाणां संयोजने नम्या दृष्टिः स्पष्टं शिक्षानीतौ प्रकाशिता अस्ति। कलायाः, वाणिज्यस्य, मानविद्याः च छात्रा विज्ञानविषयाध्ययनाय समर्था भविष्यन्ति, प्रौद्योगिकीछात्राः विज्ञानछात्राश्च कलादिविषयान् अध्येतुमर्हन्ति। अध्येतारः सर्वे इच्छानुगुणं व्यावसायिकं, व्यावहारिकं च कौशलं (सॉफ्ट स्किल्स) प्राप्नुयुः इति। कलासु, विज्ञानेषु, इतरेषु क्षेत्रेषु च भारतस्य गौरवशालिनी परम्परा अनया शिक्षणव्यवस्थया संवर्धयितुं शक्यते। भारतस्य समृद्धां प्राचीनसंस्कृतिम्, आधुनिकजीवनपद्धतिं, भारतीयज्ञानप्रणालीं, परम्परां च संयोजयितुं संवर्धयितुं च सर्वकारेण शिक्षानीतिरियं निर्मिता।

भारतस्य शास्त्रीयभाषाणां साहित्यानां च महत्त्वं, प्रासङ्गिकता, सुन्दरता च उपेक्षितुं न शक्यते। संस्कृतं नाम संविधानस्याष्टमानुसूच्यां निर्दिष्टा एका महत्त्वपूर्णा आधुनिकी भाषा वर्तते। समग्रं लैटिन-ग्रीकसाहित्यं च संस्कृतसाहित्येन गुणे परिमाणे च तुलनायां कथमपि समानतां न प्राप्नोति। संस्कृतसाहित्ये गणितम्, दर्शनम्, व्याकरणम्, संगीतम्, राजनीतिः, चिकित्सा, वास्तुकला, धातुविज्ञानम्, नाटकम्, कथा आख्यायिका, कविता इति वाङ्मयविधानां विशालः कोषः वर्तते, स संस्कृतज्ञानप्रणालीरूपेण ज्ञायते। संस्कृतज्ञानप्रणाली न केवलं विश्वज्ञाननिधेः पोषणाय संरक्षणाय च भवेत् अपि तु संस्कृतज्ञानप्रणाली अनुसन्धानैः संवर्धनीया, नवीनैः चिन्तनैः संस्कृतज्ञानप्रणाली अस्माकं शिक्षाप्रणाल्यां सम्यक् उपयुक्ता च भवेत्। विगतेषु बहुषु सहस्राब्देषु विविध-विषयक-विद्वज्जनैः विविधासु सामाजिकपृष्ठभूमिषु कार्याणि कुर्वद्भिः विस्तृतजीवनदर्शनेन

सह संस्कृतज्ञानप्रणाल्या वाङ्मयसर्वस्वं प्ररोपितं निर्मितं च अस्ति। संस्कृतविषयाः रुचियुक्तैः विधिभिः आकर्षकविधानैः प्रासङ्गिकविधिभिः च पाठयिष्यन्ते। अस्याः प्रणाल्या उपयोगः विशिष्टरूपेण ध्वनिरूपेण उच्चारणेन च वर्तते। माध्यमिकस्तरे संस्कृतविषयान् संस्कृतमाध्यमेन पाठयितुं, संस्कृताध्ययनम् आनन्दप्रदं कर्तुं संस्कृतपाठ्यविषयाणां लेखनं सरलमानकसंस्कृतेन (एस्. एस्. एस्.) भविष्यति। वेदानां श्रुतिपरम्परायां मौखिकपरम्परायां वा ध्वन्यात्मकम् उच्चारणं प्रवर्तते, वेदशिक्षायाः आधारः सस्वरोच्चारणं, ध्वन्यात्मकोच्चारणं च वर्तते।

कलाविज्ञानयोः पाठ्यक्रम-पाठ्येतरक्रिययोः शैक्षणिक-व्यावसायिकधारयोश्च मध्ये परस्परं स्पष्टो भेदो न कृतः शिक्षानीत्याम्, एतेषां सम्मिश्रणं पाठ्यचर्यायां भवितुमर्हति। समेषां विषयाणाम् अन्तस्सम्बन्धम् एकताम् अखण्डतां च सुनिश्चित्य अध्ययनाय बहुविषयकः आधारः शिक्षानीत्यां निर्मितः अस्ति, तेन च विज्ञानं, सामाजिकविज्ञानं, कला, मानविकी, क्रीडा एवमादिभिः सह बहुविषयिण्याः समग्रशिक्षाया उपरि बलं प्रदत्तमस्ति। नैतिकता, मानवसम्बद्धानि संवैधानिकमूल्यानि, सहानुभूतिः, परेषां कृते सम्मानः, स्वच्छता, शिष्टाचारः, लोकतान्त्रिकी भावना, सेवाभावना, सार्वजनीनसम्पदां सम्मानः, वैज्ञानिकचिन्तनं, स्वतन्त्रता, उत्तरदायित्वं, नानाविचारवादः, समानता, न्यायः इति भावानाम् उपरि बलं प्रदत्तमस्ति।

2020 राष्ट्रियशिक्षानीतेः 4.23 बिन्दु-संख्यायां अनिवार्यतया अध्येयविषयाणां, कौशलसंवर्धनस्य, शिक्षाक्रमस्य च विषये निर्देशो वर्तते। विद्यार्थिनाम् इच्छानुगुणं अध्येयविषयाणां चयनविकल्पाः अधिकतया नमनीयाः भवेयुः, पाठ्यक्रमाः नमनीयाः स्युः । अपि च अधुना झटिति परिवर्तिनि विश्वे विद्यार्थिनः उत्तमाः, यशस्विनः, सफलाः, उद्योगशीलाः, उद्योगयोग्याः, उत्पादकशीलाश्च भवेयुः चेत् केचन अध्येयज्ञानविषयाः कौशलविषयाः अनिवार्याः करणीयाः, वृत्तिसामर्थ्यप्राप्तिः च अनिवार्या विद्यते, छात्रहितदृष्ट्या तत् महत्त्वपूर्णं च।

वैज्ञानिकः चिन्तनस्वभावः, प्रमाणाधारितं चिन्तनं, रचनात्मिकी नवीनता च, सौन्दर्यशास्त्रं कलायाः च भावना, मौखिकं लिखितं च अभिव्यक्तिसामर्थ्यं, संवादकौशलं च, स्वास्थ्यं संपोषणं च, शारीरिकशिक्षा, दैहिकसामर्थ्यं स्वास्थ्यं क्रीडा च, सहयोगः

सामूहिककार्यम्, समस्यायाः समाधानं तार्किकं चिन्तनं, व्यावसायिकाभिप्रकाशः कौशलं च, तन्त्रज्ञानप्रयोगकौशलं, संख्यासाक्षरता, कूटचिह्नसंज्ञानं, संगणकीयं चिन्तनं, नैतिकता, नैतिक-तार्किकक्रिया, मानवीयानां संविधानीयानां मूल्यानां ज्ञानम् अभ्यासश्च, स्त्रीपुंस-संवेदनशीलता, मौलिककर्तव्यम्, नगरिकता-कौशलं मूल्यं च, भारतस्य ज्ञानम्, पर्यावरणसम्बद्धा जागरा, तत्र जलसंसाधन-संरक्षणम्, स्वच्छता, समकालिकविषयाः स्थानीयविषयाश्च, देशेन, राज्यैः, प्रपञ्चेन वा सम्मुखीक्रियमाणानां विषयाणां ज्ञानं, नानाभाषासु कौशलेन सह अत्रोक्तानां कौशलानामपि अध्येयविषयेषु समायोजनं विद्यते । बालकानां भाषाकौशलसंवर्धनाय, समृद्धभाषाणां तत्रस्थानां च कलाकोषाणां च संरक्षणाय सर्वकारीयेषु स्वनिधिपोषितेषु विद्यालयेषु च सर्वेभ्यः छात्रेभ्यः एकां शास्त्रीयभाषां तत्साहित्यं च अधिगन्तुं वर्षद्वयस्य अवसरः भविष्यति।

2020 राष्ट्रियशिक्षानीतेः 4.27 बिन्दु-संख्यायां "भारतस्य ज्ञानम्" इति विषये महत्त्वपूर्णः निर्देशो वर्तते। "भारतस्य ज्ञानम्" इत्यस्मिन् विषये आधुनिकभारतस्य प्रतिस्पर्धानां सफलतया सम्मुखीकरणे, आधुनिकभारतस्य सफलतायै, प्राचीनभारतस्य ज्ञानं योगदानञ्च, भारतीयज्ञानप्रणाली यथा- गणितं, खगोलविज्ञानं, दर्शनं, योगः, वास्तुकला, चिकित्सा, कृषिः, अभियान्त्रिकी, भाषाविज्ञानं, साहित्यं, क्रीडया सह शासनं, राजव्यवस्था, संरक्षणं च इत्यादीनां विषयाणां यत्रापि प्रासङ्गिकता भविष्यति तत्र विषयाणां सम्यक् योजनं भविष्यति । एतेषु औषधपद्धतयः, वनप्रबन्धनं, पारम्परिक (जैविकी) कृषिपद्धतिः, प्राकृतिक-कृषिपद्धतिः, स्वदेशीयक्रिडाः, विज्ञानादिषु क्षेत्रेषु प्राचीनार्वाचीनयोः भारतयोः प्रेरकाणां महापुरुषाणां ज्ञानप्रदाः विषयाः भवन्ति।

2020 राष्ट्रियशिक्षानीतेः 11.1 बिन्दु-संख्यायां समग्रशिक्षां बहुविषयकशिक्षां प्रति च प्रवृत्त्यर्थं निर्देशाः सन्ति। भारते समग्रतया बहुविषयकाध्ययनं काचित् प्राचीना परम्परा विद्यते। तक्षशिला, नालन्दा-प्रभृतिविश्वविद्यालयेषु अध्यापितानि 64 कला-कौशलानि, सङ्गीतकला, चित्रकला इत्यादिकलाविषयाः, रसायनशास्त्रं, गणितम्, इत्यादिवैज्ञानिकक्षेत्राणि, काष्ठतक्षणकार्यम्, वस्त्रसीवनकला, इत्यादिवृत्तिपरकक्षेत्राणि, औषधीयकार्यम्, अभियान्त्रिकी

इत्यादिव्यावसायिकक्षेत्राणि, सम्प्रेषणम्, चर्चा, संवादः इत्यादिव्यावहारिककौशलानि (सॉफ्ट स्किल) च अन्तर्भूतानि । गणितम्, विज्ञानम्, वृत्तिपरकविषयान्, व्यवहारिकविषयान्, व्यावसायिकविषयान् च अन्तर्भाव्य मानवसर्जनस्य सर्वाणि क्षेत्राणि कला इति भारतीयं चिन्तनमस्ति। विविधकलानां यत् ज्ञानम् अस्ति, तत् आधुनिककाले समान्यतः कथ्यते उदारकला (कलानाम् उदारकल्पना ) इति। विविधकला-ज्ञानानां भारतीयशिक्षायां पुनः समायोजनम् अवश्यं भवेत् । ईदृशी शिक्षा एकविंशे (21) शताब्दे अपेक्षिता विद्यते।

2020 राष्ट्रियशिक्षानीतेः 22.1 बिन्दु-संख्यायां भारतीयभाषाणां, कलायाः, संस्कृतेश्च संवर्धनाय निर्देशो भवति। सहस्रेण वर्षैः निरन्तरं विकसितं भारतं विशिष्टस्य संस्कृतेः समृद्धः भाण्डागारः वर्तते। सा भारतसंस्कृतिः कलासु, साहित्यकृतिषु, प्रथासु, परम्परासु, भाषाभिव्यक्तिषु, कलाकृतिषु, ऐतिहासिकेषु, सांस्कृतिकसम्पत्तिस्थलेषु च परिलक्षिता भवति। भारते भ्रमणम्, भारतीयातिथ्यसत्कारस्यानन्दः, भारतस्य सुन्दरहस्तशिल्पानां हस्तनिर्मितवस्त्राणां च क्रयणम्, भारतस्य प्राचीनसाहित्यस्य पठनम्, योग-ध्यानयोः अभ्यासः, भारतीयदर्शनशास्त्रेण प्रेरणा, भारतस्य विभिन्नपर्वसु उत्सवेषु वा भागग्रहणम्, भारतस्य वैविध्यपूर्णसंगीतस्य कलायाश्च प्रशंसनम्, भारतीयचलचित्रणां दर्शनम् इत्यादयः केचनायामाः वर्तन्ते येषां माध्यमेन विश्वस्य कोटिशः जनाः अस्यां भारतीय-सांस्कृतिकविविधतायां सम्मिलिताः भवन्ति। एवम् अस्य आनन्दम् अनुभवन्ति, लाभान्विताः च भवन्ति।

एषा सांस्कृतिकी प्राकृतिकी च सम्पद् वर्तते, तस्याः भारत-सांस्कृतिकसम्पदः संरक्षणम्, संवर्धनम्, प्रसारः च देशस्य सर्वोत्तमं प्राथम्यं स्यात्, यतो हि इयं सांस्कृतिकसम्पत् देशस्य अभिज्ञानाय अर्थव्यवस्थाविकासाय च अत्यन्तं महत्त्वपूर्णा वर्तते।

2020 राष्ट्रियशिक्षानीतेः 22.2 बिन्दु-संख्यायां कलानां विषये निर्देशो वर्तते। भारतीयकलायाः संस्कृतेश्च संवर्धनं न केवलं राष्ट्राय एव आवश्यकं, राष्ट्रियजनानां कृते अपि महत्त्वपूर्णं वर्तते। बालेषु बालिकासु च स्वाभिज्ञता, देश्य-जनेषु मामकीनभावः, अन्यसंस्कृतीनां तदीयलक्षणानां च कृते गौरवबुद्धिं जनयितुं सांस्कृतिकप्रज्ञायाः जागृतिः, अभिव्यक्तिः इत्यादीनां

सामर्थ्यानां विकासस्य अपेक्षा वर्तते। बालकेषु बालिकासु च स्वकीयसांस्कृतिकेतिहासे, कलायां, भाषासु, परम्परासु च स्वकीयभावनाया विकासेनैव गुणपूर्णस्य सांस्कृतिकाभिज्ञानस्य संस्कारः उत्पादयितुं शक्यते। अतः स्वकल्याणाय समाजकल्याणाय राष्ट्रकल्याणाय च सांस्कृतिकी जागृतिः अभिव्यक्तिश्च अधिकं महत्त्वं प्राप्नोति।

प्रतिष्ठानस्य मुख्यः पाठ्यक्रमः सस्वरवेदशिक्षणरूपः (मौखिकी, श्रुतिपरम्परा च- वेदपाठेन वेदज्ञानपरम्परया च सह) वर्तते। तेन सह इतरे अनिवार्या आवश्यकाः आधुनिकविषयाः यथा- संस्कृतभाषा व्याकरणं च, आंग्लभाषा, मातृभाषा, गणितम्, सामाजिकविज्ञानम्, विज्ञानम्, संगणकविज्ञानम्, दर्शनम्, योगः, वैदिककृषिः, समाजोपयोगि-उत्पादकविषयाः (SUPW) महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षाबोर्ड् इत्यस्य प्रतिविषयं पाठ्यपुस्तकेषु संयोजिताः सन्ति। इतरे आवश्यकाः आधुनिकविषयाः भारतीयज्ञानपरम्परायाः (आई.के. एस्.) विषयाणां अनुप्रविष्टीनाम् उपरि (इनपुट) आधारिता वर्तन्ते। एते सर्वे पाठ्यपुस्तकविषया 2020 राष्ट्रियशिक्षानीतेः दिशानिर्देशस्य अनुरूपं संयोजिताः वर्तन्ते। 2020 राष्ट्रियशिक्षानीतिं, महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य वैदिक-शैक्षिकचिन्तकानां प्राधिकरणानां च परामर्शं च ध्यात्वा प्रापणीय-अभिलेख-संचिका- (PDF) (ऑनलाईन पुस्तकम्) पुस्तकानि प्रस्तुतानि सन्ति। एन.सी.ई.आर्.टी-संस्थया प्रकाशनीयायाः नवीन-राष्ट्रियपाठ्यचर्या-रूपरेखायाः अनुरूपम् एतानि पुस्तकानि अद्यतनानि करिष्यन्ते, ततः परमेव मुद्रितरूपेण पुस्तकानि उपलब्धानि भविष्यन्ति।

प्रतिष्ठानस्य राष्ट्रियादर्शवेदविद्यालयस्य अध्यापकाः, वेदाध्यापने समर्पिता वेदाचार्याः, संबद्ध-विविधवेदपाठशालानां संस्कृताध्यापकाः संस्कृतपाठ्यपुस्तकानां प्रारूपम् अभिलेखम् निरन्तरं परिश्रम्य निरमन्। तदुपरि प्रतिष्ठानेन संबद्धानां वेदपाठशालानां नैके संस्कृताध्यापकाः सुपरिश्रम्य इत्थंरूपाणि संस्कृतपाठ्यपुस्तकानि सुष्ठु निर्मितवन्तः । तान् सर्वान् प्रति धन्यवादान् अर्पयामि । राष्ट्रस्तरीयाः संस्कृतभाषाविशेषज्ञाः समये समये पाठ्यपुस्तकेषु गुणवत्तामानेतुं विविधाः संस्तुतीः दत्त्वा दोषनिवारणं च कृत्वा पुस्तकानां गुणाधिक्ये साहाय्यं कृतवन्तः । तान्

सर्वानपि धन्यवादैः सभाजयामि। अक्षरयोजनाय, मुद्राक्षरदोषदूरीकरणाय, चित्राङ्कनाय च मम सहयोगिनः कर्मचारिणः कार्यं कृतवन्तः। तेभ्यः हार्दान् धन्यवादान् अर्पयामि।

पाठ्यपुस्तकानां गुणवत्ताविकासाय पुनः परिष्काराय च रचनात्मकविचाराणां कृते स्वागतवचांसि व्याहरामि। किं बहुना--

**आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्।**
**बलवदपि शिक्षितानाम् आत्मन्यप्रत्ययं चेतः॥**

(अभिज्ञानशाकुन्तलम् १.०२)

प्रो. विरूपाक्ष वि जड्डीपाल्

सचिवः

महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी

महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षा-बोर्ड, उज्जयिनी

# पाठ्यपुस्तकविषये प्रस्तावना

सस्वरवेदाध्ययनस्य, श्रुतिपरम्परायाः च संरक्षणाय प्रतिष्ठापितस्य महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य, प्राथमिकस्तरात् उच्चतरमाध्यमिकस्तरपर्यन्तं वेद-संस्कृत-शिक्षण-पाठ्यक्रमाणां मानकीकरणाय, संवर्द्धनाय, परीक्षामान्यतायै, प्रमाणीकरणाय च संस्थापितस्य "महर्षिसान्दीपनिराष्ट्रीयवेदसंस्कृतशिक्षाबोर्ड्" इत्यस्य वेदभूषण-द्वितीय-कक्ष्यायाः, सामान्यशिक्षणव्यवस्थायां सप्तमकक्ष्यायाः कृते निर्धारितम् इदं पाठ्यपुस्तकम् अध्येतृहस्ते अस्ति इति नितराम् आनन्दस्य विषयः। 2020 राष्ट्रियशिक्षानीतेः (NEP-2020) अनुरूपं पुनर्व्यवस्थापितायां 3 + 4 सप्तवर्षीयायां प्रतिष्ठानस्य वेदाध्ययनपाठ्यक्रमयोजनायां वेदाध्ययननिरतान् पारम्परिकच्छात्रान् मुख्यधारायाम् आनेतुं, संस्कृतपाठ्यपुस्तकद्वारा भाषादक्षतां संवर्धयितुं च प्रयत्नः कृतः अस्ति।

वेदवाङ्मय-संस्कृतग्रन्थस्थविषयाणाम् उपयोगं कृत्वा वेद-संस्कृतपाठशालानां पाठ्यक्रमसामग्र्यः आधुनिकसमस्यानां निवारणोपायान्वेषणाय विकसिताः स्युः इति नीतिगतं चिन्तनस्ति। तदनुसारं केचन विषयाः पाठ्यपुस्तके योजिताः। अत्र पाठ्यपुस्तके यथास्थानम् आधुनिकज्ञानविज्ञानैः च सह भारतीयचिन्तनधारायाः, वैदिकज्ञानस्रोतसः च उपयुक्तज्ञानसामग्रीणां समायोजनं वर्तते। समग्रे विश्वे बहोः कालात् भारतीयसभ्यतायां शास्त्राणां, ज्ञानस्य, विज्ञानस्य, प्रौद्योगिक्याः च शिक्षणस्य विशाला सुदृढा च इदम्प्रथमतया प्रवर्तिता परम्परा वर्तते । भारतं प्राचीनकालादेव ऋषीणां, ज्ञानिनां, विदुषां वैज्ञानिकानां च भूमिः अपि । तां भारतस्य समृद्धां प्राचीनसंस्कृतिम्, आधुनिकजीवनपद्धतिं, भारतीयज्ञानप्रणालीं, परम्परां च संयोजयितुं संवर्धयितुं च सर्वकारेण शिक्षानीतिः निर्मिता। पाठ्यसामग्रीद्वारा एतस्याः अनुभवः भवेत् इति अनुभवपूर्वकम् अधिगमाय च सामग्री अत्र प्रदत्ता।

सर्वस्तरेषु संस्कृतस्य अध्ययनम् अभिप्रेरकं, सम्प्रेरकम्, आनन्ददायकं भाषाशिक्षणसोपानानुगुणं च भवेत्। सरलतया संस्कृतभाषाशिक्षणाय, विविधविषयाध्यापनाय च उपयोगि पाठ्यपुस्तकानि भवेयुः । पुस्तकम् अभ्यस्य सरलतया संस्कृतेन संभाषितुं योग्यता

छात्राणां स्वतः भवेत् । अन्यभाषामाध्यमेन संस्कृतस्य पठनं पाठनं च न भवेत्, संस्कृतमाध्यमेन एव भवेत्, संस्कृतपाठ्यविषयाणां लेखनं सरलमानकसंस्कृतेन भवेत् इत्यादीनि संकल्पनानि अस्य पाठ्यपुस्तकस्य निर्माणावसरे मनसि स्थापितानि।

संस्कृताध्यापनाय अस्य पाठ्यपुस्तकस्य उपयोगं ये कुर्वन्ति ते पुनः पुनः अभ्यासं कारयित्वा भाषण-पठन-लेखन-कौशलानां विकासाय अध्यापकाः प्रयत्नं कुर्युः। संस्कृते गणितम्, दर्शनम्, व्याकरणम्, संगीतम्, राजनीतिः, चिकित्सा, वास्तुकला, धातुविज्ञानम्, नाटकम्, कथा आख्यायिका, कविता इति वाङ्मयविधानां विशालः कोषः वर्तते, स च यथास्थानं पाठेषु संयोजितः अस्ति। इमे संस्कृतविषयाः रुचियुक्तैः विधिभिः आकर्षकविधानैः प्रासङ्गिकविधिभिः च पाठनीयाः प्रयत्नतः। संस्कृतस्य स्तरानुगुणं पाठ्यसामग्र्यां वेदसम्बद्धाः संस्कृतभाषाविषयाः योजिताः सन्ति। संस्कृतस्य सम्यक् अध्ययनं शुद्धेन अक्षरोच्चारणेन स्फुटितं भवति, तत् वेदाध्ययने साहाय्यं करोति च। अतः शुद्धतया स्पष्टतया अक्षरोच्चारणशिक्षणे अध्यापकाः दत्तावधाना स्युः। अक्षरोच्चारणविषयकाः व्याकरणनियमाः प्राथमिकस्तरे एव सम्यक् बोधनीयाः। अष्टाध्यायी जगन्माता, अमरकोशो जगत्पिता इति उपदेशम् अनुपालयन्तः भाषादक्षताप्राप्तये, व्युत्पत्तिलाभाय च प्रयतामहे। अतः व्याकरणसूत्राणां, अमरकोशस्य च सम्यक् अभ्यासं कुर्मः। काव्यानां, सुभाषितानां च अवबोधपूर्वकं कण्ठस्थीकरणं विद्याग्रहणदृष्ट्या अत्यावश्यकम्। प्रतिपाठं व्याकरणांशाः, काव्यांशाः, शब्दधातुरूपाणि, अन्ते भाषाविषयकाः अभ्यासाः च प्रदत्तानि सन्ति। योग्यताविस्तारे प्रदत्तैः अंशैः छात्राः स्वयम् अध्ययनं कृत्वा ज्ञानवर्धनं कर्तुं समर्था भवन्ति । बालकेषु बालिकासु च स्वकीयसांस्कृतिकेतिहासे, कलायां, भाषासु, परम्परासु च स्वकीयभावनाया विकासेनैव गुणपूर्णस्य सांस्कृतिकाभिज्ञानस्य संस्कारः उत्पादयितुं शक्यते। अतः एतादृशेषु विषयेषु पाठनावसरे अवधानं देयमस्ति। अध्येतारः एतस्य संस्कृतभाषा-व्याकरण-पाठ्यपुस्तकस्य सम्यक् अध्ययनेन लाभान्विता भविष्यन्ति इति विश्वसिमः।

प्रतिष्ठानेन संबद्धानां वेदपाठशालानां संस्कृताध्यापकाः श्रीसुरेशचन्द्रशर्मा, श्रीमणिशङ्करमिश्रः, डॉ. नरेशगोपालकटारा, डॉ. विजयकुमार उपाध्यायः, श्रीमनोजकुमारशर्मा, श्री अखलेशकुमारः, डॉ. ब्रजबिहारीपाण्डेयः, प्रतिष्ठानस्य अध्यापकचरः डॉ. अनूपकुमारमिश्रः च संस्कृतपाठ्यपुस्तकस्य प्राग्रूपतया (ड्राफ्ट) कांश्चन पाठान् निर्मितवन्तः। आदितः संस्कृतपाठ्यपुस्तक-निर्माण-कार्ये अस्मिन् संपूर्णतया संयुक्ताः डॉ. श्रीशेषराजरेग्मी, डॉ. यतिराज-सापकोटा, डॉ. सुकान्तप्रामाणिकः च संशोधन-प्रश्नसंयोजन-योग्यताविस्तारादियोजनेन, दोषदूरीकरणेन च अन्तिमं पुस्तकनिर्माणं कृतवन्तः। राष्ट्रियादर्शवेदविद्यालयस्य इदानीन्तनः संस्कृताध्यापकः डॉ. वेणुधरदाशः संस्कृतपाठ्यपुस्तकानां मुद्रणशोधने साहाय्यम् अकरोत्। तान् सर्वान् प्रति धन्यवादान् अर्पयामः।

राष्ट्रस्तरीयाः विविधाः संस्कृतभाषाविशेषज्ञाः यथासमयं संस्तुतीः दत्त्वा दोषनिवारणं कृतवन्तः । तेषां सर्वेषां कृते धन्यवादाः समर्प्यन्ते। अक्षरयोजनाय, मुद्राक्षरदोषदूरीकरणाय, पत्रसंयोजनाय, चित्राङ्कनाय च श्रीमती मिताली रत्नपारखी, श्रीमती किरण-परमार, श्रीशैलेन्द्रः डोडिया एवम् अन्ये च सहयोगिनः कर्मचारिणः कार्यं कृतवन्तः। तेभ्यः ताभ्यश्च हार्दान् धन्यवादान् अर्पयामः।

पाठ्यपुस्तकानां परिष्काराय विद्वांसः सूचनाः प्रयच्छन्तु इति प्रार्थनां कुर्मः।

पाठ्यपुस्तकनिर्मातृगणसदस्याः अध्यापकाः

# किमर्थमध्येयं संस्कृतम् ? ...... अतः अध्येयं संस्कृतम्।

1. अस्माकं भारतराष्ट्रस्य अत्यमूल्यः ज्ञाननिधिः संस्कृतभाषा। संस्कृते ज्ञानं, विज्ञानं, शब्दसम्पत्, नूतनशब्दनिर्माणशक्तिः,चिन्तनसम्पत्, देशस्य एकसूत्रे ग्रन्थनशक्तिश्च च सन्ति। संस्कृतभाषया तत्र विद्यमानेन लौकिकेन अलौकिकेन च ज्ञानेन विश्वस्मिन् विश्वे भारतस्य महान् आदरः, प्रतिष्ठा च वर्तते। भारतं प्रति वैश्विकस्य समादरस्य रक्षणाय संवर्धनाय च, वसुधैव कुटुम्बकमिति, यत्र विश्वं भवत्येकनीडमिति च भावनायाः संपोषणाय संवर्धनाय च संस्कृतस्याध्ययनं वयं कुर्याम, संस्कृताध्ययनाय विश्वजनान् बोधयेम, संस्कृताध्ययने समादरं च दध्याम।
2. भारतीयसंस्कृतेः ज्ञानं संस्कृतभाषां विना नैव सम्भवति । भारतीयसंस्कृतेः भारतीयजीवनपद्धतेः, विविधानां पर्वणां च सम्यक् ज्ञानम् आचरणं च संस्कृताध्ययनं विना न सम्भवति। संस्कृतिः संस्कृताश्रिता। उक्तं च "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा" ।
3. मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव, सत्यं वद, धर्मं चर, सत्यान्न प्रमदितव्यम्, धर्मान्न प्रमदितव्यम्, कुशलान्न प्रमदितव्यम्, वसुधैव कुटुम्बकम्, सङ्गच्छध्वं संवदध्वं, सह नाववतु सह नौ भुनक्तु, सत्यमेव जयते नानृतम्, उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत, ईशावास्यमिदं सर्वम्, आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, श्रुतं मे गोपाय, उद्धरेदात्मनात्मानम् इत्यादीनाम् अमूल्यानां प्रेरकाणां जीवनपथदर्शकाणां नीतिवाक्यानां सर्वाद्यं स्रोतः संस्कृतम्। मानवजीवनस्य साफल्याय, एतेषां नीतिवाक्यानां परिज्ञानाय च अध्येयं संस्कृतम्।
4. सर्वेषां मानावानां कृते अविनाशी सनातनः ज्ञाननिधिः वेदराशिः। वेदार्थज्ञानाय वेदभाष्यज्ञानम् आवश्यकम्, वेदभाष्यज्ञानाय संस्कृतम् अध्येयम्।
5. उदात्त-अनुदात्त-स्वरित-स्वरपूर्वकं समुच्चारितो वेदो ज्ञाननिधिः वैश्विकं सृष्टिरहस्यम्, यच्च एतावता कालेन नैवोद्घाटितं प्रमाणितं वा अन्यैः वैदेशिकैः संशोधनैः, स वेदः

संस्कृतभाषामय एव ऋषिभिः दृष्टः समाम्नातश्च। सृष्टिरहस्यस्य परिज्ञानाय मन्त्र-सृष्टिरहस्यपरिज्ञानाय चाध्येयं संस्कृतम्।

6. वेदाः, उपनिषदः, ब्राह्मणानि, आरण्यकानि, पुराणानि, शिक्षादिषड्वेदाङ्गानि, स्मृतयः, ब्रह्मसूत्र-योगसूत्रादीनि सूत्राणि, रामायणम्, महाभारतम्, भगवद्गीता, पञ्चतन्त्रम्, हितोपदेशः, नीतिशतकम्, कालिदासादिकविरचितानि विविधानि काव्यानि, भासादिरचितानि विविधानि नाटकानि च संस्कृतभाषया एव रचितानि सन्ति । एतेषां वाङ्मयविशेषाणां ज्ञानाय सततं छात्रैः, सर्वैः जिज्ञासुभिः जनैश्च अध्येयं संस्कृतम्।

7. संस्कृते दर्शनशास्त्रम्, अर्थशास्त्रम्, राजनीतिशास्त्रम्, धर्मशास्त्रम्, नीतिशास्त्रम्, इतिहासपुराणानि आयुर्वेदादयः नानाज्ञानविषयाः विद्यन्ते। समृद्धस्य संस्कृतेः समृद्धं वाङ्मयम् अस्ति संस्कृते, तस्मात् संस्कृतम् अध्येतव्यम्।

8. संस्कृतवाङ्मयस्थानां विविधजीवनसूत्राणाम्, मानवान्तर्निहितस्य देवत्वस्य, आनन्दस्रोतसां च ज्ञानस्य, तेषां समुद्घाटनाय, आविष्काराय अमूल्यज्ञाननिधीनां ज्ञानाय च छात्रैः, सर्वैः जिज्ञासुभिः जनैश्च अध्येयं संस्कृतम्।

9. प्राचीनैः वैज्ञानिकैः चरक-सुश्रुत-कणाद-भास्कर-बोधायन-नागार्जुन-भारद्वाज-आर्यभट्ट-वराहमिहिरादिभिः रचितानां विविधानां वैज्ञानिकग्रन्थानां विज्ञानसिद्धान्तानां च सुष्ठु ज्ञानाय अध्येयं संस्कृतम्।

10. सर्वासां भारतीयभाषाणां नानावैश्विकभाषाणां च जननी पोषयित्री च संस्कृतभाषा। सर्वासु भारतीयभाषासु 95% शब्दाः संस्कृतभाषासमुत्पन्नाः एव शब्दा विलसन्ति। नानाराज्यवासिभिः जनैः भाषितानां विविधानां भाषाणां सुलभावगमाय, सुबोधाय च, अस्माकं भारतदेशस्य एकतायै अखण्डतायै च अध्येयं संस्कृतम्।

11. संस्कृतभाषा कंप्यूटर-यन्त्रस्य प्रोग्राम-समारचानाय योग्या भाषा अस्ति, भगवद्गीतायाः भाषा अस्ति, उपनिषदां भाषा अस्ति, वास्तु-खगोल-ज्यौतिष-आयुर्वेदादि-विज्ञनस्य भाषा अस्ति, नाट्यशास्त्र-सङ्गीत-चित्रादि-ललित-कालादीनां भाषा अस्ति, मानवविकासस्य ज्ञपिका भाषा अस्ति, संस्कृते अस्ति धर्मार्थकाममोक्षोपदेशः, जीवननिर्वाहाय हितावहः

श्रुतिस्मृत्युपदेशः अस्ति, राज्यशासनाय विश्वक्षेमङ्करः अर्थशास्त्रोपदेशः च अस्ति। लोकोपकाराय आत्मोद्धाराय च विश्वजनीनं तादृशं संस्कृतम् अध्येयम् ।

12. विविधेषु देशेषु वैदेशिकाः विद्वांसः संस्कृतभाषायाः ज्ञानमहिम्ना एव संस्कृताभिमुखाः अनुसन्धाननिरताः च दृश्यन्ते। संस्कृतवाङ्मये औषधित्वेन द्रव्यगुणत्वेन च उल्लिखितान् औषधिवनस्पतीन् आश्रित्य अनुसन्धानं विधाय ते वैदेशिकाः संशोधनतत्त्वं प्राप्तवन्तः सन्ति। अस्माभिरपि भारतीयस्य ज्ञानतत्त्वस्य रक्षायै प्रकाशाय देशहिताय च अनुसन्धानार्थम् अवश्यम् अध्येतव्यं संस्कृतम्।

13. भारतराष्ट्रस्य एकतायै अखण्डतायै च अत्यावश्यकमस्ति संस्कृताध्ययनम्। आसहस्रं वर्षेभ्यः अद्यावधि भारतस्य प्रतिग्रामं, सर्वेषु प्रदेशेषु, क्षेत्रेषु, राज्येषु संस्कृतस्य प्रभावः अविच्छिन्नतया दृश्यते। सर्वविधैः ज्ञानैः परिपूर्णा इयं भाषितभाषा देववाणी संस्कृतिशेवधिः, सुमधुरा, सरला, सरसा, सुबोधा, मनोज्ञा च । भारतवासिनां प्रत्येकं जनेन मनोयोगसाधनाय, मनस्सन्धानाय, नानाराज्यवासिभिः जनैः भाषितानां विविधानां भाषाणां, तत्रस्थानां शब्दानां च सुलभतया ज्ञानाय, भारतीयतायाः रक्षायै च अवश्यम् अध्येयं संस्कृतम्।

14. संस्कृतभाषायां विविध-विषयाणां ज्ञानस्य च अपरिमितत्वात् अगाधत्वात् च ज्ञान-महिम्ना एव चिराय भारतराष्ट्रं विश्वगुरुः आसीत्। तादृशं विश्वगौरवं पुनः प्राप्तुं, विश्वजनीनसौहार्दाय, विश्वशान्तये च जानीयाम संस्कृतम्, अधीयीमहि संस्कृतम्, अध्यापयेम संस्कृतम्।

15. भाषण-भूषण-आहार-विहार-व्यवहारसम्बद्धानां सदाचाराणां ज्ञानाय, कायिक-वाचिक-मानसिकव्यवहाराणां सम्यक् परिज्ञानाय, जीवनोपयोगिनां विषयाणां सम्यक्परिशीलनपूर्वकम् अनुभवाय समाजस्योपयोगिनां नानाविषयाणां शेवधिः संस्कृतभाषा अस्ति।

16. चरकसंहिता-सुश्रुतसंहिता-अष्टाङ्गहृदयाद्यायुर्वेदग्रन्थानां परिशीलनपुरस्सरं वात-पित्त-कफानां शरीरगतानां लक्षणज्ञानपुरस्सरं स्वस्थवृत्ताचारादिज्ञानेन निरामयाय निरामयजीवनयापनाय निश्श्रेयसे चाध्येयं संस्कृतम्।

17. संस्कृतभाषानिबद्धानां षड्दर्शनानां परिशीलनेन, योगादिशास्त्राणां प्रयोगेण निरन्तरम् अष्टाङ्गयोगाभ्यासेन च आत्मोद्धाराय, निश्श्रेयसे, मनश्शान्तये, स्वान्तस्सुखाय चाध्येयं संस्कृतम्, अध्याप्यं संस्कृतम्।

18. भारतस्य प्राचीनेतिहासप्रकाशकाः पुराणादयो ग्रन्थाः संस्कृतमाध्यमेन एव संरचिताः। अष्टादशसु पुराणेषु, अन्यत्र ग्रन्थेषु, प्राचीनशिलालेखेषु च भारतस्य प्रत्येकम् ऐतिहासिक-क्षेत्रस्य इतिहासः निगूढः अस्ति। यथार्थतया अस्मद्देशस्य इतिहासमधिगन्तुं प्रकाशयितुं च संस्कृतस्य ज्ञानमावश्यकम्। अतः संस्कृतम् अध्येयम्।

19. सर्वेषां विश्वजनीनानां मानवानाम् उपयोगी ज्ञानराशिः यथा - वैद्यकम्, योगः, ध्यानम्, जलस्रोतोन्वेषणम्, राष्ट्ररक्षासूत्राणि, नक्षत्रज्ञानम्, खगोलज्ञानम्, वैश्विकसृष्टिः, यज्ञयागादिः, भौतिकज्ञानं, रासायनिकं ज्ञानं, भौगोलिकाः पर्यावरणीयाः सामाजिकाः ज्ञानाधाराः, नीतिः, न्यायः इत्यादयः विषयाः, अन्यानि चिरन्तनानि चिन्तनानि च विलसन्ति संस्कृतग्रन्थेषु। तादृशानां विविधविषयाणां ज्ञानाय अध्येयं संस्कृतम्।

20. भाषाभिमानस्य, धनाभिमानस्य, मताभिमानस्य, आभिजात्याभिमानस्य, क्षेत्राभिमानस्य, अहङ्कारस्य च दूरीकरणपूर्वकं सत्यं, शिवं, सुन्दरम् इति भावनापूर्वकं सर्वत्र समबुद्धित्वस्य साधनाय अनुभवाय च, ततः भारतस्य राष्ट्रियैकतायै, अखण्डतायै, विकासाय च अध्येयं संस्कृतम्।

21. जीवनस्य सर्वाङ्गीणविकासाय, ज्ञानं (अध्यात्मं), विज्ञानं, कौशलं, कला चेति सर्वेऽपि विषयाः नूनमेव अपेक्षिताः। एतेषां चतुर्णां भारतीयविषयाणां ज्ञानाय, संवर्धनाय, अनुभूत्यै च संस्कृतस्य ज्ञानम् अनिवार्यम् अस्ति। अतः संस्कृतम् अध्येयम्।

# वेदभूषणद्वितीयवर्षम्

## प्रथमायाः द्वितीयवर्षेण/सप्तमवर्गेण च समकक्षम्

### प्रारम्भिकस्तरकक्ष्या - उद्देश्यानि

- ✓ संस्कृतेन निबद्धानां सरलगद्यपद्यांशानां श्रवणावगमनसामर्थ्यम् अभिवर्धयन्ति। आद्यवैद्यस्य धन्वन्तरेः विषयम् अधिगच्छन्ति।
- ✓ संस्कृतसम्भाषणे लोट्लकारस्य ज्ञानपूर्वकं प्रोयोगं कर्तुं प्रभवन्ति।
- ✓ कर्तृ-कर्मकारकयोः उपपदविभक्तीनां च प्रयोगकौशलं शुद्धलेखनकौशलं च सम्पादयन्ति।
- ✓ यण्, अयादिः, गुणः, वृद्धिः, पूर्वरूपम्, पररूपम्, प्रकृतिभावः इत्यादिसन्धीनां विघटनसामर्थ्यं सन्धिकार्यसामर्थ्यञ्च ससूत्रं सम्पादयितुमर्हा भवन्ति।
- ✓ सुभाषितानाम् अध्ययनेन मानसिकविनोदनपरिवर्धनं, बुद्धिकौशलस्य विकासः, अन्त्याक्षर्यादिस्पर्धासु सोत्साहं भागग्रहणे सामर्थ्यं, संस्कृतसम्भाषणे रुच्युत्पादनं च सञ्जायते।
- ✓ विद्यार्थिनः निरामयजीवनोपायानां ज्ञानं प्राप्स्यन्ति।
- ✓ करण-सम्प्रदानकारकयोः तृतीया-चतुर्थ्योः विभक्त्योश्च कारकनिर्णयपूर्वकं विभक्तिनिर्णयपूर्वकञ्च शुद्धभाषणे शुद्धलेखने च दक्षा भवन्ति।
- ✓ श्चुत्व-ष्टुत्व-जश्त्व-अनुनासिक-चर्त्व-छत्व-अनुस्वार-परसवर्ण-ङमुडागमानां हल्सन्धीनां विच्छेदपूर्वकं ससूत्रं सन्धिकार्यकौशलं प्राप्स्यन्ति।
- ✓ पुत्रीं रक्ष पुत्रीं पाठय इति सर्वकारस्य इमाम् उद्घोषणां छात्रा ज्ञात्वा नारीमहत्त्वविषयमवगत्य समाजं प्रेरयन्ति।

- ✓ अपादान-अधिकरणकारके पञ्चमी-षष्ठी-सप्तमीविभक्तीश्च सुष्ठु अभिज्ञाय शुद्धभाषणे शुद्धलेखने च योग्यतां सम्पादयन्ति।
- ✓ ओभावः, लोपः, शकारः, षकारः, सकारः, रेफः, जिह्वामूलीयः, उपध्मानीयश्चेति विसर्गस्य अष्टविधान् परिणामान् नियमपूर्वकं जानन्ति।
- ✓ उपसर्गसंज्ञा तथा उपसर्गसंसर्गेण धात्वर्थपरिवर्तनविषयं सम्यक् समधिगच्छन्ति।
- ✓ समासपरिचयः, विग्रहवाक्यम्,, समस्तपदम्, पूर्वपदम्, उत्तरपदम्, भेदाः, अवान्तरभेदानां सामान्यपरिचयं प्राप्स्यन्ति ।
- ✓ 'जागरूको भव' इति वीथीनाटकद्वारा समाजविकासाय राष्ट्रविकासाय च आत्मना कर्तव्यानां कार्याणां विषये जागरूका भवन्ति।
- ✓ हलन्तशब्दानां भ्वादि-अदादिगणीयधातूनां प्रयोगसामर्थ्यम् अभिवर्धयन्ति।

**टिप्पणी** - पाठ्यपुस्तकेऽस्मिन् मुख्यांशानामेव समायोजनं कृतं वर्तते। समग्रज्ञानार्थम् **शिक्षकैः मूलग्रन्थाः अध्याप्याः छात्रैश्च अध्येतव्याः।** अत्र सर्वेषां पाठगतानाम् उद्देश्यानां सामान्यतया ज्ञानाय एकत्र समायोजनेन उल्लेखः कृतः अस्ति। कक्ष्यायां साक्षात् पाठावसरे अन्तर्निहितान् उद्देश्यान् मनसि निधाय तं तं पाठम् अध्यापकः पाठयेत्, विद्यार्थिनः विद्यार्थिनीश्च बोधयेत्।

# पाठानुक्रमणिका


| | | | |
|---|---|---|---|
| | | प्रार्थना | |
| प्रथमः पाठः | - | देववैद्यः धन्वन्तरिः | 1 - 7 |
| द्वितीयः पाठः | - | सम्भाषणम् | 8 - 12 |
| तृतीयः पाठः | - | कारकम्<br>(कर्तृकारम्, कर्मकारकम्, उपपदविभक्तिश्च) | 13 - 25 |
| चतुर्थः पाठः | - | अच्सन्धिः<br>(पूर्वरूप-पररूप-प्रगृह्यसन्धिश्च) | 26 - 32 |
| पञ्चमः पाठः | - | श्वेतकेतुः | 33 - 37 |
| षष्ठः पाठः | - | सुभाषितानि | 38 - 42 |
| सप्तमः पाठः | - | कारकम्<br>(करणकारकम्, सम्प्रदानकारकम्) | 43 - 54 |
| अष्टमः पाठः | - | हल्सन्धिः | 55 - 66 |
| नवमः पाठः | - | पुत्रीं रक्ष, पुत्रीं पाठय | 67 - 72 |
| दशमः पाठः | - | कारकम्<br>(अपादानकारकम्, अधिकरणकारकम्, उपपदविभक्तिश्च) | 73 - 81 |
| एकादशः पाठः | - | विसर्गसन्धिः | 82 - 90 |
| द्वादशः पाठः | - | उपसर्गाणां परिचयः षष्ठीविभक्तिश्च | 91 - 100 |
| त्रयोदशः पाठः | - | समासपरिचयः | 101 - 110 |
| चतुर्दशः पाठः | - | जागरूको भव (वीथीनाटकम्) | 111 - 119 |

# श्रीवेदपुरुषाय नमः

## मङ्गलम्

१. ॐ सङ्ग॑च्छध्वं॒ सं व॑दध्वं॒ सं वो॒ मनां॑सि जानताम् ।
देवा॒ भा॒गं यथा॒ पूर्वे॑ सञ्जाना॒ना उ॒पास॑ते ॥ ऋग्वेदः १०.१९१.२

२. ॐ स॒हना॑ववतु । स॒ह नौ॑ भुनक्तु । स॒ह वी॒र्यं॑ करवावहै ।
ते॒ज॒स्विना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै॑।
ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑॥ कृष्णयजुर्वेदः तैत्तिरीयोपनिषद्, शिक्षावल्ली

३. ३ १ २ ३ १ २र ३ २ ३ १ २ ३ १ २ ३ २
भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः।
३ २ ३ १ २र
भद्रा उत प्रशस्तयः॥ सामवेदः १११

४. अनमित्रं नो अधराद् अनमित्रं न उत्तरात्।
इन्द्रानमित्रं नः पश्चाद् अनमित्रं पुरस्कृधिः॥ अथर्ववेदः १९.१५.१

*ज्ञानानन्दमयं देवं* निर्मलस्फटिकाकृतिम्।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे॥ भार्गवतन्त्रम् १.१

वीणाधरे विपुलमङ्गलदानशीले भक्तार्त्तिनाशिनी विरञ्चि हरीशवन्द्ये।
कीर्तिप्रदेऽखिलमनोरथदे महार्हे विद्याप्रदायिनि सरस्वति नौमि नित्यम्॥

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम्।
भक्तावासं स्मरेन्नित्यम् आयुः कामार्थसिद्धये॥

# प्रथमः पाठः

# देववैद्यः धन्वन्तरिः

## (लट्, लङ्, लृट् परस्मैपदी, आत्मनेपदी, लोट् परस्मैपदी)

पुरा दुर्वासाः इन्द्रस्य दर्शनार्थम् अमरावतीनगरम् **अगच्छत्**। इन्द्रः तदा ऐरावतम् आरुह्य **आगच्छत्**। किन्तु इन्द्रः मुनिवरं दुर्वाससं न **अपश्यत्**। मुनिवरः आशिषम् **अददात्** तथापि इन्द्रः तं न **अनमत्**। अतः स महर्षिः कुपितः **अभवत्**। तव ऐश्वर्यस्य नाशः **भवतु** इति स इन्द्रम् **अशपत्**। इन्द्रस्य ऐश्वर्यं सर्वं नष्टम् **अभवत्**। असुराः विषयम् **अजानत**।

ते इन्द्रलोकम् **आक्रामन्**। देवान् **पराजयन्त**। तदा असुराः अमरावतीपुरः लुण्ठनम् **अकुर्वन्**। त्रिषु अपि लोकेषु तेषां पीडा अधिका **अजायत**। ते यज्ञान् मण्डपादीन् च **अनाशयन्**। देवाः असुरैः दत्तां पीडां सोढुं न **अशक्नुवन्**। सर्वे मिलित्वा ब्रह्मणः समीपम् **अगच्छन्**। किन्तु ब्रह्मा **अवदत्** – भवतां समस्याम् अहं समाधातुं न **शक्नोमि**। भवन्तः श्रीनारायणं निकषा **गच्छन्तु** इति।

ततः देवाः क्षीरसागरम् आगत्य नारायणम् **अस्तुवन्**। देवाः असुराणां दुर्विषयं न्यवेदयन्। तदा श्रीनारायणः **अब्रवीत्** – भवन्तः महर्षेः दुर्वाससः अपमानम्  **अकुर्वन्**। अतः युष्माकम् एषा दुःस्थितिः **आपतत्**। आदौ असुरैः सह सन्धिं **कुर्वताम्**। ततः भवन्तः देवासुराः मिलित्वा क्षीरसागरस्य मन्थनं **कुर्वन्तु**। ततः अमृतं लभ्यते। तदमृतं भवन्तः पिबन्ति चेत् भवतां कष्टम् **अपगमिष्यति**, इत्युक्त्वा विष्णुः तिरोऽ**भवत्**।

देवाः गुरोः बृहस्पतेः अध्यक्षतायां राक्षसैः सह सन्धिप्रस्तावम् **अकुर्वन्**। असुराणां समक्षं समुद्रमन्थनस्य विषयं **प्रास्तुवन्**। असुराः एतं प्रस्तावम् **अङ्गीकुर्वन्**। अमृते उभयपक्षयोः सहभागः **भवतु** इति सर्वे निश्चितवन्तः।

वैनतेयः मन्दरपर्वतम् **आनयत**। असुराः वासुकिनागम् **आनयन्त**। एषः वासुकिनागः मन्थनस्य रज्जुः **आसीत्**। असुराः वासुकिनागस्य मस्तके **अगृह्णत** एवं देवाः तस्य पुच्छे **अगृह्णन्**। सर्वे समुद्रमन्थनम् **आरभन्त**। मन्दरः समुद्रस्य अन्तः **अगच्छत्**। विष्णुः कूर्मरूपं धृत्वा पर्वतम् **उदनयत्**। पुनः सर्वे मन्थनम् **आरभन्त**।

आरम्भे विषम् आगतम्। शिवः विषम् **अपिबत्**। तस्य कण्ठः विषेण नीलवर्णः **अभवत्**। तस्मात् तस्य नाम 'नीलकण्ठः' इति प्रख्यातम् **अभवत्**। अनन्तरं बहुविधानि अमूल्यवस्तूनि लब्धानि। अन्ते विष्णुः देववैद्य-धन्वन्तरिरूपेण समुद्रस्य उपरि **समुदतिष्ठत्**। उक्तञ्च श्रीमद्भागवतमहापुराणे –

**स वै भगवतः साक्षात् विष्णोरंशांशसम्भवः।**

**धन्वन्तरिरिति ख्यातः आयुर्वेददृगिज्यभाक्॥**

*श्रीमद्भागवतम् – ८.८.६४*

**नारायणांशो भगवान् स्वयं धन्वन्तरिर्महान्।**

**पुरा समुद्रमथने समुत्तस्थौ महादधेः॥**

*ब्रह्म.वैव.पु. ५१ अ.*

तस्य हस्ते अमृतकलशः **आसीत्**। तम् अमृतकलशं राक्षसाः **अहरन्**। तदा देवासुराः परस्परं कलहम् आरब्धवन्तः। कलहनिवारणाय सर्वे विष्णुं **प्रार्थयन्त** –

**ॐ नमो भगवते महासुदर्शनाय वासुदेवाय धन्वन्तरये**

**अमृतकलशहस्ताय सर्वभयविनाशाय सर्वरोगनिवारणाय।**

**त्रैलोक्यपतये त्रैलोक्यनिधये श्रीमहाविष्णुस्वरूपश्रीधन्वन्तरिस्वरूपाय**

**श्री श्री श्री औषधचक्रनारायणाय स्वाहा॥**

श्रीनारायणः मोहिनीरूपं धृत्वा आगतवान्। सर्वे अपि मोहिनीम् **अपश्यन्**। मोहिनीरूपः विष्णुः **अवदत्** – सर्वे देवाः असुराः च पङ्क्तौ **उपविशन्तु** इति। देवाः असुराः च पङ्क्तौ **उपाविशन्**। मोहिनीरूपः विष्णुः आदौ देवानां पङ्क्तौ अमृतवितरणम् **आरभत**। असुराणां गणे राहुनामकः कश्चन असुरः देवरूपं धृत्वा देवानां पङ्क्तौ **उपाविशत्**। अतः देवैः सह राहुः अपि अमृतम् **अपिबत्**। एतत् विष्णुः **अजानात्**। तदानीं सः राहोः ग्रीवां सुदर्शनचक्रेण **अकर्त्तयत्**। अमृतं पीतवतः देवान् असोढ्वा असुराः तैः सह युद्धं **प्रारभन्त**। युद्धे देवाः **अजयन्**।

## शब्दार्थाः

| | |
|---|---|
| ऐरावतम् | इन्द्रगजम् |
| आरुह्य | आरोहणं कृत्वा |

| | |
|---|---|
| ऐश्वर्यम् | विभूतिः |
| प्रस्तुतवन्तः | निष्पादितवन्तः |
| अनाशयन् | नाशं कृतवान् |
| समाधातुम् | समाधानार्थम् |
| आपतत् | दुःस्थितिः समागता |
| अपगमिष्यति | दूरीभविष्यति |
| उभयपक्षयोः | द्वयोः पक्षयोः |
| निश्चितवन्तः | निश्चयं कृतवन्तः |
| अगृह्णत | गृहीतवन्तः |
| आरभन्त | प्रारम्भं कृतवन्तः |
| कूर्मरूपम् | कच्छपरूपम् |
| उदनयत् | उन्नीतवान् |
| अहरन् | हरणं कृतवन्तः |
| बहुविधानि | अनेकविधानि |
| देववैद्यः | देवानां चिकित्सकः |
| उपरि | उच्चैः |
| परस्परम् | मिथः |
| कलहनिवारणाय | युद्धनिवारणाय |
| धृत्वा | धारयित्वा |
| अजानात् | ज्ञातवान् |
| ग्रीवाम् | शिरोधरा |
| अकर्त्तयत् | कर्त्तितवान्/अकृन्तत् |
| समुत्तस्थौ | अवतरितः/प्रकटितः |
| प्रास्तुवन् | प्रस्तुतवन्तः |

## अभ्यासः

१. **उच्चारणं कुरुत -**

आरुह्य, अददात्, अङ्ग्यकुर्वन्, अशक्नुवन्, कष्टम् अपगमिष्यति, अध्यक्षतायाम्, विष्णोरंशांशसम्भवः, आयुर्वेददृग्गिज्यभाक्, समुत्तस्थौ।

२. **एकवाक्येन उत्तराणि लिखत -**

(क) इन्द्रस्य नगरस्य नाम किम् ?

(ख) इन्द्रं द्रष्टुं कः आगतवान् ?

(ग) देवाः कं कं देवं प्रार्थयन्त ?

(घ) इन्द्रलोकं के आक्रामन् ?

(ङ) समुद्रमन्थनं के कृतवन्तः?

(च) मन्दरपर्वतं कः आनयत् ?

३. **रिक्तस्थानं पूरयत -**

(क) ------- नाम नीलकण्ठः अस्ति।

(ख) देववैद्यः ------ अस्ति।

(ग) मन्थनस्य रज्जुः ------- आसीत्।

(घ) ततः देवासुराः मिलित्वा -------- मन्थनं कुर्वन्तु।

(ङ) --------- मोहिनीरूपं धृतवान्।

(च) -------- नामकः असुरः अमृतम् अपिबत्।

(छ) राहोः -------- सुदर्शनचक्रेण अकर्तयत्।

४. **कोष्ठकात् समुचितं पदं चित्वा रिक्तस्थानं पूरयत –**

| आनयन्त, अनाशयन्, अस्तुवन्, अगच्छन्, न्यवेदयन्, आक्रामन् |
|---|

(क) असुराः इन्द्रलोकं --------।

(ख) यज्ञमण्डपादीन् --------।

(ग) सर्वे मिलित्वा ब्रह्मणः समीपं -------।

(घ) श्रीनारायणं --------।

(ङ) असुराः वासुकिनागम् -----------।

(च) असुराणां दुर्विषयं --------।

## ४. समुचितं समायोजयत -

| | |
|---|---|
| (ख) भवति | लट् म.पु. एकवचनम् |
| (ख) भवसि | लट् प्र.पु. बहुवचनम् |
| (ग) भवन्ति | लट् प्र.पु. एकवचनम् |
| (घ) अभवत् | लङ् प्र.पु. एकवचनम् |
| (ङ) अभवताम् | ब्रू-धातोः लङ् प्र.पु. एकवचनम् |
| (च) अब्रवीत् | लङ् प्र.पु. द्विवचनम् |
| (छ) अकुरुत | ज्ञा-धातोः लङ् लकारः |
| (ज) अकरोत् | लोट्, प्रथमपुरुषबहुवचनम् |
| (झ) अजानत | कृ-धातोः आत्मनेपदस्य रूपम् |
| (ञ) गच्छन्तु | कृ-धातोः परस्मैपदस्य रूपम् |

## ५. अधोलिखितक्रियापदानां धातु-लकार-पुरुष-वचनानि लिखत -

| क्रियापदानि | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| अकुर्वन् | ---------- | ---------- | ---------- | ---------- |
| अददात् | ---------- | ---------- | ---------- | ---------- |
| शक्नोमि | ---------- | ---------- | ---------- | ---------- |
| अस्तुवन् | ---------- | ---------- | ---------- | ---------- |
| कुर्वन्तु | ---------- | ---------- | ---------- | ---------- |
| अशपत् | ---------- | ---------- | ---------- | ---------- |
| अहरन् | ---------- | ---------- | ---------- | ---------- |
| लभते | ---------- | ---------- | ---------- | ---------- |
| अपगमिष्यति | ---------- | ---------- | ---------- | ---------- |

६. कृ-धातोः लङ्-लकारस्य आत्मनेपदस्य रूपाणि लिखत।

## योग्यता-विस्तारः

'शक्लृ शक्तौ', परस्मैपदी, लट्-लकारः, वर्तमानकालार्थे (वर्तमाने लट्)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | शक्नोति | शक्नुतः | शक्नुवन्ति |
| मध्यमः | शक्नोषि | शक्नुथः | शक्नुथ |
| उत्तमः | शक्नोमि | शक्नुवः | शक्नुमः |

'रभ राभस्ये', आत्मनेपदी, लङ्-लकारः, , भूतकालार्थे (अनद्यतने लङ्)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | अरभत | अरभेताम् | अरभन्त |
| मध्यमः | अरभथाः | अरभेथाम् | अरभध्वम् |
| उत्तमः | अरभे | अरभावहि | अरभामहि |

'पा पाने', परस्मैपदी, लृट्-लकारः, भविष्यदर्थे (लृट् शेषे च)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | पास्यति | पास्यतः | पास्यन्ति |
| मध्यमः | पास्यसि | पास्यथः | पास्यथ |
| उत्तमः | पास्यामि | पास्यावः | पास्यामः |

'डुकृञ् करणे', परस्मैपदी, लोट्-लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | करोतु | कुरुताम् | कुर्वन्तु |
| मध्यमः | कुरु | कुरुतम् | कुरुत |
| उत्तमः | करवाणि | करवाव | करवाम |

‘ग्रहँ उपादाने’ आत्मनेपदी, लङ्-लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | अगृह्णीत | अगृह्णाताम् | अगृह्णत |
| मध्यमः | अगृह्णीथाः | अगृह्णाथाम् | अगृह्णीध्वम् |
| उत्तमः | अगृह्णि | अगृह्णीवहि | अगृह्णीमहि |

‘ष्टुञ् स्तुतौ’, आत्मनेपदी, लट्-लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | स्तुते/स्तवीते | स्तुवाते | स्तुवते |
| मध्यमः | स्तुषे/स्तवीषे | स्तुवाथे | स्तुध्वे/स्तुविध्वे |
| उत्तमः | स्तुवे | स्तुवहे/स्तुवीवहे | स्तुमहे/स्तुवीमहे |

# द्वितीयः पाठः

## सम्भाषणम्

### (लोट्, आत्मनेपदपरिचयः, इ/ईकारान्तस्त्रीलिङ्गम्)

अर्जुनः - हे गौरि ! मम पुस्तकं **दत्ताम्**।

गौरी - अस्तु। **स्वीकुरुताम्**।

अर्जुनः - धन्यवादः। **भवती** पुस्तकम् अपठत् वा ?

गौरी - आम्। पुस्तकम् अतीव उपयोगि वर्तते। तत्र एकः पाठः मह्यम् अतीव अरोचत। तत् भवान् अपि एकवारम् **अधीताम्**।

अर्जुनः - अस्तु तावत्। पाठस्य नाम **ब्रूताम्**।

गौरी - श्रद्धावान् लभते ज्ञानम् इति पाठः।

अर्जुनः - अस्तु ! तर्हि अहमपि तं पाठम् **अध्ययै**।

गौरी - अस्तु। तर्हि पुनर्मिलामः।

अर्जुनः - अस्तु। तर्हि अहम् अधुना पाठशालां गच्छामि। (पाठशालां प्राप्य), (सहपाठिभिः सह मिलित्वा सर्वेऽपि गुरोः समीपं गच्छन्ति) अभिवादयामहे गुरो !

गुरुः - कल्याण**मास्ताम्**। **वर्धध्वम्**। यशो **लभध्वम्**। यूयम् आदौ देवीं सरस्वतीं **वन्दध्वम्**। तदनन्तरम् अहम् अध्यापयिष्यामि। ......

गुरुः - अस्तु। भवन्तः स्व-स्व-आसने **आसताम्**। अद्य वयम् -

**अपि स्वर्णमयी लङ्का न मे लक्ष्मण ! रोचते।**
**जननी जन्मभूमिश्च स्वर्गादपि गरीयसी॥**

इति श्लोकं पठामः।

# शब्दार्थाः

| | |
|---|---|
| दत्ताम् | ददातु |
| अधीताम् | पठतु |
| ब्रूताम् | वदतु |
| अध्ययै | पठानि |
| कल्याणमास्ताम् | कल्याणं भवतु |
| वर्धध्वम् | वर्धनं भवतु/एधध्वम् |
| लभध्वम् | प्राप्तिः भवतु |
| वन्दध्वम् | वन्दनं कुरुत/स्तुत |
| आसताम् | उपविशन्तु |
| अभिवादयामहे | अभिवादनं कुर्मः |
| गरीयसी | श्रेष्ठा |
| सहपाठिभिः सह | सहाध्यायिभिः सह |

# अभ्यासः

१. **उच्चारणं कुरुत -**

दत्ताम्, स्वीकुरुताम्, ब्रूताम्, अध्ययै, सहपाठिभिः, वर्धध्वम्, लभध्वम्, अध्यापयिष्यामि, जन्मभूमिश्च।

२. **लोट्लकारस्य रूपं रिक्तस्थाने लिखत -**

(क) सः पुस्तकं .................... (अधीते)

(ख) त्वं ग्रामं .................... (गच्छसि)

(ग) अहं भोजनं .................... (भुञ्जे)

(घ) भक्तः हरिं .................... (सेवते)

(ङ) कर्मकरः कार्यम् .............. (आरभते)

(च) यूयं देवीं सरस्वतीं ............ (वन्दध्वे)

## ३. अधोलिखितशब्दानां सप्तम्यन्तरूपाणि लिखत -

| | | | | | |
|---|---|---|---|---|---|
| | उदाहरणम् - नदी | | | नद्याम् | |
| (क) | काशी | .......... | (ख) | कूपी | .......... |
| (ग) | अङ्गुली | .......... | (घ) | देवी | .......... |
| (ङ) | लेखनी | .......... | (च) | घटी | .......... |

## ४. समुचितं योजयत -

| | | |
|---|---|---|
| (क) | मम पुस्तकं | लङ्का |
| (ख) | भवती पुस्तकम् | गरीयसी |
| (ग) | एकवारम् | दत्ताम् |
| (घ) | स्वर्गादपि | अपठत् वा |
| (ङ) | अपि स्वर्णमयी | अधीताम् |

## ५. अधोलिखितक्रियापदानां लोट्लकाररूपाणि लिखत -

| | | |
|---|---|---|
| (क) | भाषते | ---------- |
| (ख) | लभते | ---------- |
| (ग) | ईहते | ---------- |
| (घ) | भुङ्क्ते | ---------- |
| (ङ) | दत्ते | ---------- |
| (च) | कुरुते | ---------- |
| (छ) | शेते | ---------- |

## ६. अधोनिर्दिष्टानां क्रियापदानाम् इतर वचनरूपाणि लिखत -

| | | | |
|---|---|---|---|
| (क) | वन्दताम् | ---------- | ---------- |
| (ख) | ---------- | वर्तेथाम् | ---------- |
| (ग) | ---------- | ---------- | विद्यामहै |
| (घ) | अधीताम् | ---------- | ---------- |
| (ङ) | शेताम् | ---------- | ---------- |

(च) आस्ताम् ---------- ----------

(छ) ---------- कुर्वाथाम् ----------

## ७. सन्धिविच्छेदं कुरुत -

**सन्धिविच्छेदः**

(क) अत्रैव -------------------- + --------------------

(ख) कथास्ति -------------------- + --------------------

(ग) ग्रीष्मावकाशः -------------------- + --------------------

(घ) कथानुसारेण -------------------- + --------------------

(ङ) इत्यपि -------------------- + --------------------

(च) अतीवोपयोगि -------------------- + --------------------

## ८. बहुवचनवाक्यानि लिखत -

(क) शिष्यः ईक्षताम्। शिष्याः ईक्षन्ताम्।

(ख) वृक्षः कम्पताम्। --------------------

(ग) सस्यं वर्धताम्। --------------------

(घ) स्वाध्यायं कुरुताम्। --------------------

(ङ) देवः त्रायताम्। --------------------

## ९. इह विद्यमानानि परस्मैपदिरूपाणि आत्मनेपदिरूपाणि च पृथक् कुरुत -

| परस्मैपदिरूपाणि | | आत्मनेपदिरूपाणि |
|---|---|---|
| -------------------- | पठतु, याचै, लिखतु, | -------------------- |
| -------------------- | पचध्वम्, पृच्छ, वर्धेथाम्, | -------------------- |
| -------------------- | पठाव, क्रीडानि, | -------------------- |
| -------------------- | वन्दावहै, आस्महै, | -------------------- |
| -------------------- | शेरताम्, स्वपित, | -------------------- |
| | स्वीकुरुताम्। | |

## योग्यता-विस्तारः

- क्रियापदस्य मूलरूपं धातुः। गच्छति इत्यस्य मूलरूपं 'गम्लृँ गतौ' इति धातुः, भाषते इत्यस्य 'भाषँ व्यक्तायां वाचि' इति धातुः। शेते इत्यस्य 'शीङ् स्वप्ने' इति धातुः। एवं सर्वाणि क्रियापदानि एतादृशैः धातुभिः निष्पन्नानि वर्तन्ते।
- धातवः त्रिधा विभक्ताः - परस्मैपदिनः, अत्मनेपदिनः, उभयपदिनश्चेति।
- लोट्-लकारः षड्सु अर्थेषु प्रयुज्यते, ते च यथा -
- **विधिः** - प्रेरणम् इति (त्वं वेदम् अधीष्व = तुम् वेद् का अध्ययन करो, त्वम् प्रत्यहं सन्ध्याम् उपास्स्व)
- **निमन्त्रणम्** - नियोगकरणम्। (इह यज्ञमहोत्सवे भवान् भुङ्क्ताम् = इस यज्ञ महोत्सव में आप भोजन करियें)
- **आमन्त्रणम्** - कामचारानुज्ञा/कामाचारकरणम्। (इह भवान् भुञ्जीत)
- **अधीष्टः** - सत्कारपूर्वकः व्यापारः अधीष्टः। (मां धर्मम् उपदिशताम्)
- **संप्रश्नः** - सम्प्रधारणम् (किम् अहं वेदम् अध्ययै)
- **प्रार्थना** - प्रार्थनं याञ्चा। (अस्मभ्यं वेदपुस्तकं दत्ताम्)।
- **सुत्रम्** - विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् **(पा.सू. ३.३.१३१)**
- अधः आत्मनेपदिक्रियापदस्य लोट्-लकारस्य सर्वाणि रूपाणि अभ्यासार्थं दत्तानि सन्ति।

| | | | |
|---|---|---|---|
| प्रथम पुरुष | सेवताम् | सेवेताम् | सेवन्ताम् |
| मध्यम पुरुष | सेवस्व | सेवेथाम् | सेवध्वम् |
| उत्तम पुरुष | सेवै | सेवावहै | सेवामहै |

अपुत्राः पुत्रिणः **सन्तु** पुत्रिणः **सन्तु** पौत्रिणः।
अधनाः सधनाः **सन्तु** सज्जनाः **सन्तु** निर्भयाः॥

# तृतीयः पाठः

# कारकम्

## कर्तृकारकम्, कर्मकारकम्, उपपदविभक्तिश्च

करोतीति कारकम्, यत् क्रियान्वयि तत् कारकम्। वाक्ये क्रियया सह यस्यान्वयः तदेव कारकम्।

- क्रियाजनकत्वं कारकत्वम्।
- क्रियान्वयित्वं कारकत्वम्।
- क्रियानिष्पादकत्वं कारकत्वम्।

पाणिनीयव्याकरणे षट् कारकाणि भवन्ति। यथा -

**कर्ता कर्म च करणं सम्प्रदानं तथैव च।**

**अपादानाधिकरणमित्याहुः कारकाणि षट्॥**

कस्मिन् कारके सति का विभक्तिः भवति इति पाणिनिना सूत्रैः निर्दिष्टम् अस्ति। कारकस्य ज्ञानाभावे वाक्यप्रयोगे दोषाः भवेयुः एव यथा - गणेशः 'लेखन्या महाभारतं लिखति' इति वाक्यं शुद्धम्। परन्तु 'गणेशः लेखनी महाभारतं लिखति' इति अशुद्धं वाक्यम्। यतः लेखनक्रियायां लेखनी करणम्। तस्याः तृतीयाविभक्तिः भवेत् न तु द्वितीयाविभक्तिः। अतः 'गणेशः लेखन्या महाभारतं लिखति' इति वाक्यं शुद्धम्।

किं नाम कारकम् ? क्रियान्वयित्वं कारकत्वम्। यत् पदं क्रियया अन्वेति (सम्बन्धं प्राप्नोति) तत् पदं कारकम् इति उच्यते। यथा - काश्याः राजा गां स्वहस्ताभ्यां ब्राह्मणाय गोष्ठात् गङ्गातटे ददाति।

| | | |
|---|---|---|
| १. | <u>ऋत्विक्</u> पायसं पचति। | अत्र ऋत्विक् पाकक्रियायाम् अन्वेति। अतः ऋत्विक् कारकम्। तत् कर्तृकारकम्। |
| २. | शिष्यः <u>वेदम्</u> अधीते। | अत्र 'वेदम्' इति पदम् अध्ययनक्रियायाम् अन्वेति। अतः 'वेदम्' इति कारकम्। तत् कर्मकारकम्। |

३. बालिका <u>लेखन्या</u> लिखति। — अत्र 'लेखन्या' इति पदं लेखनक्रियायाम् अन्वेति। अतः 'लेखन्या' इति कारकं, तत् करणकारकम्।

४. <u>बुभुक्षिताय</u> अन्नं ददाति। — अत्र 'बुभुक्षिताय' इति पदं दानक्रियायाम् अन्वेति। अतः 'बुभुक्षिताय' कारकम्। तत् सम्प्रदानकारकम्।

५. <u>वाटिकायाः</u> पुष्पाणि आनयति। — अत्र 'वाटिकायाः' इति पदम् आनयनक्रियायाम् अन्वेति अतः एतत् कारकम्। तत् अपादानकारकम्।

६. <u>कटे</u> उपविशति। — इह 'कटे' इति पदम् उपवेशनक्रियायाम् अन्वेति। अतः कटः कारकम्। तत् अधिकरण कारकम्।

कर्तृकारकं क्रियया साक्षात् अन्वेति। अन्यानि कारकाणि तु परम्परया क्रियया अन्वयं प्राप्नुवन्ति इतीदं ज्ञातव्यम्।

## प्रथमाविभक्तिः

**प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा** *(२.३.४६)*

**पदविभागः -** प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे (सप्तम्येकवचनम्), प्रथमा (प्रथमैकवचनम्)

**वृत्तिः -** नियतोपस्थितिकः प्रातिपदिकार्थः। मात्रशब्दस्य प्रत्येकं योगः। प्रातिपदिकार्थमात्रे लिङ्गमात्राधिक्ये परिमाणमात्रे सङ्ख्यामात्रे च प्रथमा स्यात्। उच्चैः। नीचैः। कृष्णः। श्रीः। ज्ञानम्। अलिङ्गा नियतलिङ्गाश्च प्रातिपदिकार्थमात्र इत्यस्युदाहरणम्। अनियतलिङ्गास्तु लिङ्गमात्राधिक्यस्य - तटः, तटी, तटम्। परिमाणमात्रे - द्रोणो व्रीहिः। द्रोणरूपं यत्परिमाणं तत्परिच्छिन्नो व्रीहिरित्यर्थः। प्रत्ययार्थे परिमाणे प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणम्, प्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीहौ विशेषणमिति विवेकः। वचनं संख्या। एकः। द्वौ। बहवः। इहोक्तार्थत्वाद्विभक्तेरप्राप्तौ वचनम्।

**उदाहरणानि - प्रातिपदिकार्थे -** उच्चैः, नीचैः, कृष्णः, श्रीः, ज्ञानम्। **लिङ्गमात्राधिक्ये -** तटः - तटी - तटम्। **परिमाणमात्रे -** द्रोणो व्रीहिः। **वचनमात्रे -** एकः, द्वौ, बहवः।

**सम्बोधने च** *(२.३.४७)*

**पदविभागः -** सम्बोधने (सप्तम्येकवचनम्), च (अव्ययम्)।

**वृत्तिः -** इह प्रथमा स्यात्। सम्बोधनं नाम अभिमुखीकृत्य बोधनं सम्यक् बोधनं वा इति।

**उदाहरणम् -** हे कृष्ण ! हे सीते ! हे देवि ! हे पितः ! हे गुरो ! हे श्रीमन् !

## कर्तृकारकम्

**स्वतन्त्रः कर्ता** *(पा.सू. १.४.५४)*

**पदविभागः -** स्वतन्त्रः (प्रथमैकवचनम्), कर्ता (प्रथमैकवचनम्)।

**वृत्तिः -** क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात्।

**उदाहरणानि -** १. **रामः** ग्रन्थम् अधीते। २. **दिनेशः** संस्कृतं पठति। ३. **त्वम्** अर्हसि। ४. **अहं** श्लोकं रचयामि। अत्र प्रथमवाक्ये अध्ययनक्रियायां रामः स्वतन्त्रः अस्ति। अतः यः स्वातन्त्र्येण क्रियां करोति स कर्ता भवति। यः कर्ता भवति तत्र प्रथमाविभक्तिः स्यात्। कर्तुः अनुगुणं क्रियायाः पुरुषवचने भवतः।

**तत्प्रयोजको हेतुश्च** *(पा.सू. १.४.५५)*

**पदविभागः -** तत्प्रयोजकः (प्रथमैकवचनम्), हेतुः (प्रथमैकवचनम्), च (अव्ययम्)।

**वृत्तिः -** कर्तुः प्रयोजको हेतुसंज्ञः कर्तृसंज्ञश्च स्यात्।

**उदाहरणानि -** १. देवदत्तः कटं करोति, तं यज्ञदत्तः प्रयुङ्क्ते, **यज्ञदत्तः** देवदत्तेन कटं कारयति।

२. **गुरुः** शिष्यान् वेदम् अध्यापयति।

३. **अधिकारी** भृत्येन कार्यं कारयति।

## कर्मकारकम्

**कर्तुरीप्सिततमं कर्म** *(पा.सू. १.४.४९)*

**पदविभागः -** कर्तुः (षष्ठी-एकवचनम्), ईप्सिततमम् (प्रथमैकवचनम्), कर्म (प्रथमैकवचनम्)।

त्रिपदं सूत्रमिदम्।

**वृत्तिः -** कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात्। कर्तुः किम् ? माषेष्वश्वं बध्नाति। कर्मण ईप्सिता माषाः, न तु कर्तुः। तमब्ग्रहणं किम् ? पयसा ओदनं भुङ्क्ते। 'कर्म' इत्यनुवृत्तौ पुनः कर्मग्रहणमाधारनिवृत्त्यर्थम्। अन्यथा गेहं प्रविशतीत्यत्रैव स्यात्।

**उदाहरणम् -** शिशुः चन्द्रं पश्यति। अत्र शिशोः (कर्तुः) दर्शनरूपक्रियया चन्द्रः इष्टतमः भवति, अतः चन्द्रम् इति पदस्य कर्मसंज्ञा अभवत्।

## द्वितीयाविभक्तिः

**कर्मणि द्वितीया** *(पा.सू. २.३.२)*

**पदविभागः -** कर्मणि (सप्तमी-एकवचनम्), द्वितीया (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** अनुक्ते कर्मणि द्वितीया स्यात्। हरिं भजति। अभिहिते तु कर्मणि 'प्रातिपदिकार्थमात्रे' इति प्रथमैव। अभिधानं तु प्रायेण तिङ्-कृत्-तद्धितसमासैः। तिङ् - हरिः सेव्यते। कृत् - लक्ष्म्या सेवितः। तद्धितः - शतेन क्रीतः शत्यः। समासः - प्राप्त आनन्दो यं स प्राप्तानन्दः। क्वचिन्निपातेनाभिधानम्। यथा - 'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्'। साम्प्रतमित्यस्य हि युज्यत इत्यर्थः।

**उदाहरणम् -** शिष्यः वेदम् अधीते। अत्र 'अधीते' इति क्रियापदेन वेदपदं नोक्तम्, अतः 'वेदम्' इत्यत्र प्रकृतसूत्रेण द्वितीयाविभक्तिः अभवत्।

**तथायुक्तं चानीप्सितम्** *(पा.सू. १.४.५०)*

**पदविभागः -** तथा (अव्ययम्), युक्तम् (प्रथमैकवचनम्), च (अव्ययम्), अनीप्सितम् (प्रथमैकवचनम्)। चतुष्पदात्मकं सूत्रमिदम्।

**वृत्तिः -** ईप्सिततमवत्क्रियया युक्तमनीप्सितमपि कारकं कर्मसंज्ञं स्यात्। ग्रामं गच्छन् तृणं स्पृशति। ओदनं भुञ्जानो विषं भुङ्क्ते।

**उदाहरणानि -** वेदपाठशालां गच्छन् वृक्षान् पश्यति। अत्र शिष्यस्य वेदपाठशालागमनम् इष्टतमम्, अतः 'कर्तुरीप्सिततमं कर्म' इत्यनेन सूत्रेण 'वेदपाठशालाम्' इत्यत्र कर्मसंज्ञा भवति। किन्तु वृक्षाणां दर्शनम् अनीप्सितं भवति, अतः अनीप्सितमपि वृक्षपदं प्रकृतसूत्रेण कर्मसंज्ञां प्राप्नोति।

**अकथितञ्च** *(पा.सू. १.४.५१)*

**पदविभागः -** अकथितम् (प्रथमैकवचनम्), च (अव्ययम्)। द्विपदात्मकं सूत्रमिदम्।

**वृत्तिः -** अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्।

**दुह्-याच्-पच्-दण्ड-रुधि-प्रच्छि-चि-ब्रू-शासु-जि-मथ्-मुषाम्।**
**कर्मयुक्-स्यादकथितं तथा स्यान्नी-हृ-कृष्-वहाम् ॥**

दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यद्युज्यते तदेवाकथितं कर्म इति परिगणनं कर्तव्यमित्यर्थः। अर्थनिबन्धेयं संज्ञा। बलिं भिक्षते वसुधाम्। माणवकं धर्मं भाषते, अभिधत्ते, वक्तीत्यादि। कारकं किम् ? माणवकस्य पितरं पन्थानं पृच्छति। "अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्" (वार्तिकम्)। कुरून् स्वपिति। मासमास्ते। गोदोहमास्ते। क्रोशमास्ते।

**उदाहरणानि -**

| अपादानादिकारकम् | अपादानादिविशेषैः अविवक्षितं कारकम् (अकथितञ्च, द्वितीया) |
|---|---|
| गोः दोग्धि पयः। (अपादानम्) | गां दोग्धि पयः। |
| बलेः याचते वसुधाम्। (अपादानम्) | बलिं याचते वसुधाम्। |
| तण्डुलैः ओदनं पचति। (करणम्) | तण्डुलान् ओदनं पचति। |
| गर्गेभ्यः शतं दण्डयति। (अपादानम्) | गर्गान् शतं दण्डयति |
| व्रजे अवरुणद्धि गाम्। (अधिकरणम्) | व्रजम् अवरुणद्धि गाम्। |
| माणवकात् पन्थानं पृच्छति। (अपादानम्) | माणवकं पन्थानं पृच्छति। |
| वृक्षात् अवचिनोति फलानि। (अपादानम्) | वृक्षम् अवचिनोति फलानि |
| माणवकाय धर्मं ब्रूते। (सम्प्रदानम्) | माणवकं धर्मं ब्रूते। |
| माणवकाय धर्मं शास्ति। (सम्प्रदानम्) | माणवकं धर्मं शास्ति। |
| देवदत्तात् शतं जयति। (अपादानम्) | देवदत्तं शतं जयति। |
| सुधायाम् क्षिरनिधौ मथ्नाति। (अधिकरणम्) | सुधां क्षिरनिधिं मथ्नाति। |
| देवदत्तात् शतं मुष्णाति। (अपादानम्) | देवदत्तं शतं मुष्णाति |
| ग्रामे अजां नयति, हरति, कर्षति, वहति। (अधिकरणम्) | ग्रामम् अजां नयति, हरति, कर्षति, वहति। |

**अधिशीङ्स्थाऽऽसां कर्म** *(पा.सू. १.४.४३)*

**पदविभागः -** अधिशीङ्स्थाऽऽसाम् (षष्ठी-बहुवचनम्), कर्म (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः** - अधिपूर्वाणामेषामाधारः कर्म स्यात्। अधिशेते अधितिष्ठति अध्यास्ते वा वैकुण्ठं हरिः।

**उदाहरणानि** - अधिशेते कैलाशं शिवः। शयनं करोति इत्यर्थः। अधितिष्ठति वैकुण्ठं हरिः। तिष्ठति इत्यर्थः। अध्यास्ते सत्यलोकं ब्रह्मा। उपविशति इत्यर्थः। अत्र प्रथमोदाहरणे अधिपूर्वकस्य शीङ्-धातोः आधारः भवति कैलाशः, तत्र आधारोऽधिकरणम् इत्यनेन अधिकरणम् प्राप्तमासीत्, परन्तु प्रकृतसूत्रेण आधारस्य कर्मसंज्ञा अभवत्।

**अभिनिविशश्च** *(पा.सू. १.४.४७)*

**पदविभागः** - अभिनिविशः (प्रथमैकवचनम्), च (अव्ययम्)। द्विपदं सूत्रम्।

**वृत्तिः** - अभिनीत्येतत्संघातपूर्वस्य विशतेराधारः कर्म स्यात्। अभिनिविशते सन्मार्गम्। परिक्रयणे सम्प्रदानम् (सू.) इति सूत्रादिह मण्डूकप्लुत्याऽन्यतरस्यां ग्रहणमनुवर्त्य व्यवस्थितविभाषाश्रयणात्क्वचिन्न। पापेऽभिनिवेशः।

**उदाहरणानि** - अभिनिविशते सन्मार्गम्। सन्मार्गे आग्रहवान् इत्यर्थः। अवश्यमिदं कर्तव्यमित्यादिरूपः अध्यवसायः। दृढसंकल्प इति। अत्र सन्मार्गः भवति अभिनिपूर्वकविश-धातोः आधारः, तत्र आधारोऽधिकरणम् इत्यनेन अधिकरणं प्राप्नुयात्, परन्तु प्रकृतसूत्रेण कर्म अभवत्।

**उपान्वध्याङ्वसः** *(पा.सू. १.४.४८)*

**पदविभागः** - उपान्वध्याङ्वसः (षष्ठी-एकवचनम्)।

**वृत्तिः** - उपादिपूर्वस्य वसतेराधारः कर्म स्यात्। उपवसति, अनुवसति, अधिवसति, आवसति वा वैकुण्ठं हरिः। अभुक्त्यर्थस्य न (वार्तिकम्)। वने उपवसति। वने उपवासं करोति इत्यर्थः।

**उदाहरणानि** - उपवसति, अनुवसति, अधिवसति, आवसति वा वैकुण्ठं हरिः। अत्र उपादिपूर्वकस्य वस-धातोः आधारः भवति वैकुण्ठः, अतः प्रकृतसूत्रेण तत्र कर्म अभवत्। प्रधानमन्त्रिवर्यः देहलीम् अधिवसति। कृषकाः ग्रामम् आवसन्ति। श्रीवेङ्कटेश्वरः तिरुपतिम् उपवसति। विष्णुः वैकुण्ठम् अनुवसति।

## उपपदविभक्तिः (द्वितीया)

**अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि** *(वार्तिकम्)*

**पदविभागः -** अभितः परितः समयानिकषाहाप्रतियोगे (सप्तमी-एकवचनम्), अपि (अव्ययम्)। द्विपदं वार्तिकम्।

**वार्तिकार्थः -** अभितादिभिः शब्दैः योगे द्वितीयाविभक्तिः स्यात्।

**उदाहरणानि -** **अभितः** - अभिमुखार्थकम् अव्ययम् एतत्। अभितः उपाध्यायम्। उपाध्यायस्य पुरतः इत्यर्थः।

**परितः** - चतुर्षु पार्श्वेषु इत्यर्थकम् अव्ययम्। परितः विद्यालयम्। विद्यालयस्य चतुर्षु पार्श्वेषु इत्यर्थः।

**समया** - समीपार्थकम् अव्ययम् इदम्। वेदपाठशालां समया। वेदपाठशालायाः समीपे इत्यर्थः।

**निकषा** - इदमपि समीपार्थकम् अव्ययम्। गुरुं निकषा। गुरोः निकटे इत्यर्थः।

**हा** - हा इति विषादार्थकम् आकारान्तम् अव्ययम्। 'हा विषादशुगर्तिषु' इति अमरकोशवचनम्। हा नास्तिकम्। नास्तिकस्य विषादः दुःखं वा इत्यर्थः।

**प्रति** - बुभुक्षितं न प्रतिभाति किञ्चित्। यः बुभुक्षितः अस्ति तस्य बुद्धौ किमपि न स्फुरति बुभुक्षाकारणात् इत्यर्थः।

**उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु।**
**द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥**

**वार्तिकार्थः** - उभयतः, सर्वतः, धिक्, उपरि-उपरि, अधि-अधि, अधोऽधः, इत्येतैः शब्दैः योगे द्वितीयाविभक्तिः स्यात्।

**उभयतः** - पार्श्वद्वये इत्यर्थकम् अव्ययमिदम्। उभयतः गुरुं शिष्याः। गुरोः पार्श्वद्वये शिष्याः सन्ति इत्यर्थः।

**सर्वतः** - सर्वेषु पार्श्वेषु इत्यर्थम् अव्ययम् इदम्। सर्वतः गुरुकुलम्। गुरुकुलस्य सर्वेषु पार्श्वेषु इत्यर्थः।

**धिक्** - धिक् इति निन्दार्थकम् अव्ययम्। 'धिङ्-निर्भर्त्सननिन्दयोः' इति अमरकोशवचनम्। धिक् नास्तिकम्। नास्तिकः निन्द्यः इत्यर्थः।

**उपर्युपरि** - वृक्षम् उपर्युपरि विहगाः। वृक्षस्य उपरि पक्षिण इत्यर्थः।

**अध्यधि** - अध्यधि लोकं हरिः। लोकस्य उपरि हरिः इत्यर्थः।

**अधोऽधः** - जलम् अधोऽधः मत्स्याः। जलस्य अधः मीना इत्यर्थः।

**अन्तरान्तरेण युक्ते** *(पा.सू. २.३.४)*

**पदविभागः** - अन्तरा-अन्तरेण (अव्ययम्), युक्ते (सप्तमी-एकवचनम्)।

**वृत्तिः** - आभ्यां योगे द्वितीया स्यात्। अन्तरा त्वां मां हरिः। अन्तरेण हरिं न सुखम्।

**उदाहरणानि** - अन्तरा त्वां माम् आचार्यः। तव मम मध्ये आचार्यः इत्यर्थः। अन्तरेण वेदार्थज्ञानं न सुखम्। वेदार्थज्ञानं विहाय सुखं नास्ति इत्यर्थः।

**कर्मप्रवचनीययुक्ते द्वितीया** *(पा.सू. २.३.८)*

**पदविभागः** - कर्मप्रवचनीय-युक्ते (सप्तमी-एकवचनम्), द्वितीया (प्रथमैकवचनम्)। द्विपदं सूत्रम्।

**वृत्तिः** - एतेन योगे द्वितीया स्यात्। जपमनु प्रावर्षत्। हेतुभूतजपोपलक्षितं वर्षणमित्यर्थः। परापि हेतौ इति तृतीयाऽनेन बाध्यते। लक्षणेत्थंभूत (सू.) इत्यादिना सिद्धे पुनः संज्ञाविधानसामर्थ्यात्।

**अनुर्लक्षणे** *(पा.सू. १.४.८४)*

**पदविभागः** - अनुः (प्रथमैकवचनम्), लक्षणे (सप्तम्येकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः** - लक्षणे द्योत्ये अनुः कर्मप्रवचनीयसंज्ञः स्यात्। गत्युपसर्गसंज्ञाऽपवादः।

**उदाहरणानि** - जपमनु प्रावर्षत्। लक्षणं नाम हेतुः इति। अत्र वर्षणस्य हेतुः जपः इति। स च हेतुः अनु इत्यनेन ज्ञायते। अतः अनु इत्यस्य कर्मप्रवचनीयसंज्ञा अभूत्। कर्मप्रवचनीयेन योगे 'जपम्' इत्यत्र 'कर्मप्रवचनीययुक्ते द्वितीया' इति सूत्रेण द्वितीयाविभक्तिः।

**हीने** *(पा.सू. १.४.८६)*

**पदविभागः** - हीने (सप्तमी-एकवचनम्)। एकपदं सूत्रम्।

**वृत्तिः** - हीने द्योत्येऽनुः प्राग्वत्। अनु हरिं सुराः। हरेर्हीना इत्यर्थः।

**उदाहरणम्** - अनु आस्तिकान् नास्तिकाः। आस्तिकेभ्यः हीनाः निकृष्टाः वा नास्तिकाः इत्यर्थः। 'आस्तिकान्' इत्यत्र 'कर्मप्रवचनीययुक्ते' द्वितीया इति सूत्रेण द्वितीयाविभक्तिः। अनु हरिं सुराः। हरेः अपेक्षया हीनाः देवताः इत्यर्थः।

**उपोऽधिके च** *(पा.सू. १.४.८७)*

**पदविभागः -** उपः (प्रथमैकवचनम्), अधिके (सप्तम्येकवचनम्), च (अव्ययम्)। त्रिपदमिदं सूत्रम्।

**वृत्तिः -** अधिके हीने च द्योत्ये उपेत्यव्ययं प्राक्संज्ञं स्यात्। अधिके सप्तमी वक्ष्यते। हीने - उप हरिं सुराः।

**उदाहरणम् -** उप विदुषः मूढाः। विद्वद्भ्यः हीनाः निकृष्टाः वा मूर्खाः इत्यर्थः।

**कालाध्वनोरत्यन्तसंयोगे** *(पा.सू. २.३.५)*

**पदविभागः -** कालाध्वनोः (सप्तमी-द्विवचनम्), अत्यन्तसंयोगे (सप्तमी-एकवचनम्)। द्विपदं सूत्रम्।

**वृत्तिः -** इह द्वितीया स्यात्। मासं कल्याणी। मासमधीते। मासं गुडधानाः। क्रोशं कुटिला नदी। क्रोशमधीते। क्रोशं गिरिः। अत्यन्तसंयोगे किम् ? मासस्य द्विरधीते। क्रोशस्यैकदेशे पर्वतः।

**उदाहरणानि -** **गुणक्रियाद्रव्यैः कालवाचकस्य।** यथा - **गुणः** - मासं कल्याणी। एकमासं यावत् मङ्गलवती इत्यर्थः। **क्रिया** - सप्तवर्षाणि वेदम् अधीते। सप्त वर्षाणि यावत् निरन्तरं वेदं पठति इत्यर्थः। अधीते इति क्रियया सह सप्त वर्षाणि इत्यस्य अत्यन्तसंयोगे द्वितीयाविभक्तिः। **द्रव्यम्** - मासं गुडधानाः। मासे प्रतिदिनं निरन्तरं गृहे गुडधानाः भवन्ति इत्यर्थः।

**गुणक्रियाद्रव्यैः अध्ववाचकस्य।** यथा - **गुणः** - क्रोशं कुटिला गङ्गा। एकं क्रोशं पर्यन्तं निरन्तरं गङ्गा वक्ररेखायां प्रवहति इत्यर्थः। **क्रिया** - क्रोशम् अधीते। क्रोशं पर्यन्तं निरन्तरं पठति इत्यर्थः। **द्रव्यम्** - क्रोशं वनम्। क्रोशं यावत् निरन्तरं वनं विस्तृतम् इत्यर्थः।

**पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्** *(पा.सू. २.३.३२)*

**पदविभागः -** पृथग्विनानानाभिः (तृतीया-बहुवचनम्), तृतीया (प्रथमैकवचनम्), अन्यतरस्याम् (सप्तम्येकवचनम्)। त्रिपदमिदं सूत्रम्।

**वृत्तिः -** एभिर्योगे तृतीया स्यात् पञ्चमीद्वितीये च। अन्यतरस्यां ग्रहणं समुच्चयार्थम्, पञ्चमीद्वितीये चानुवर्तेते। पृथग् रामेण रामाद् रामं वा। एवं विना, नाना।

**उदाहरणानि -** पृथक् गुरुं वेदार्थज्ञानं नास्ति। गुरुं विहाय वेदार्थज्ञानं न सम्भवति इत्यर्थः। नाना हरिं, हरिणा, हरेः वा न मुक्तिः। हरिं विहाय मुक्तिः नास्ति इत्यर्थः। जलं, जलेन, जलाद् वा विना जीवनं नास्ति। जलं विहाय जीवनं न सम्भवति इत्यर्थः।

## शब्दार्थाः

| | |
|---|---|
| आप्तुम् | लब्धुम् |
| ईप्सिततमम् | इष्टतमम् |
| अनीप्सितम् | अनभिष्टम् |
| अपादानादिविशेषैः | अपादानादिविशेषद्वारा |
| अविवक्षितम् | वक्तुं न इष्टम् |
| दोग्धि | दोहनं करोति |
| याचते | याचनां करोति |
| वसुधाम् | पृथिवीम् |
| अवरुणद्धि | अवरोधं करोति |
| अवचिनोति | चयनं करोति |
| शास्ति | उपदिशति |
| मथ्नाति | मन्थनं करोति |
| मुष्णाति | चोरयति |
| अभिनिविशते | मनोनिवेशं करोति |
| अन्तरा | मध्ये |
| अन्तरेण | विना |
| गुडधानाः | गुडं धान्यानि च |
| अभिहितः | उक्तः/प्रधानः |
| अनभिहितः | अनुक्तः/गौणः |

# अभ्यासः

१. **उच्चारणं कुरुत -**

पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्, कालाध्वनोरत्यन्तसंयोगे, अन्तरान्तरेण युक्ते, उपान्वध्याङ्वसः, षण्मार्गम्, चानीप्सितम्।

२. **वस्तुनिष्ठाः प्रश्नाः -**

(क) 'अकथितञ्च' इति सूत्रेण का संज्ञा भवति ?

(अ) कर्ता (आ) करणम्
(इ) अधिकरणम् (ई) कर्म

(ख) 'कर्मणि द्वितीया' इति सूत्रेण का विभक्तिः भवति ?

(अ) चतुर्थी (आ) तृतीया
(इ) द्वितीया (ई) पञ्चमी

(ग) 'उपवसति वैकुण्ठं हरिः' इति वाक्ये वैकण्ठुम् इत्यत्रः द्वितीया केन सूत्रेण ?

(अ) अधिशीङ्स्थासां कर्म (आ) उपान्वध्याङ्वसः
(इ) अभितः परितः समया...... (ई) अनुर्लक्षणे

(घ) 'वेदपाठशालां गच्छन् वृक्षान् पश्यति' इति वाक्ये वृक्षान् इत्यत्र कर्मकारकं केन सूत्रेण भवति ?

(अ) कर्तुरीप्सिततमं कर्म (आ) अकथितञ्च
(इ) तथायुक्तं चानीप्सितम् (ई) अभिनिविशश्च

(ङ) 'अनु आस्तिकान् नास्तिकाः' इत्यत्र अनु इत्यस्य कर्मप्रवचनीयसंज्ञा कस्मिन् अर्थे वर्तते ?

(अ) हीने (आ) अधिके
(इ) लक्षणे (ई) भागे

३. **रिक्तस्थानानि पूरयत -**

(क) ........................ तमं कर्म।

(ख) दुह्याचपच् ........................ न्नीहृकृष्वहाम्।

(ग) उभसर्वतसोः ........................ अन्यत्रापि दृश्यते।

(घ) अभितः ........................ योगेऽपि।

(ङ) कालाध्वनो ........................ संयोगे।

(च) हीने अर्थे ........................ कर्मप्रवचनीयसंज्ञः स्यात्।

४. **कोष्ठकात् समुचितकारकं चित्वा रिक्तस्थानं पूरयत -**

| पुत्रीम्, | पृच्छति, | बलिम्, | कर्मप्रवचनीयसंज्ञम्, | कर्तुः, | जपम् |
|---|---|---|---|---|---|

(क) ........................ क्रियया आप्तुम् इष्टतमं कारकं कर्मसंज्ञं स्यात्।

(ख) माणवकं पन्थानं ........................।

(ग) ........................ वसुधां याचते।

(घ) अधिके हीने चार्थे उप इति ........................ स्यात्।

(ङ) ........................ अनु प्रावर्षत्।

(च) पिता ........................ वेदं पाठयति।

५. **समुचितं मेलयत -**

| | |
|---|---|
| (क) अभितः | हीने |
| (ख) तथायुक्तं | अमरकोशवचनम् |
| (ग) अनु आस्तिकान् नास्तिकाः | उपाध्यायम् |
| (घ) धिक् इति | चानीप्सितम् |
| (ङ) हा विषादशुगर्तिषु इति | निन्दार्थकम् अव्ययम् |

६. **शुद्धवाक्यानां पुरतः 'आम्' इति तथा अशुद्धवाक्यानां पुरतः 'न' इति लिखत -**

(क) अर्जुनः वेदम् अधीते। ☐

(ख) वयं पाठशालां गच्छामि। ☐

(ग) यूयं वेदं पठथ। ☐

(घ) सः अस्मान् पश्यन्ति। ☐

(ङ) सा गीतं गायति। ☐

(च) भवन्तः पाठशालायाम् अधितिष्ठन्तु। ☐

## योग्यताविस्तारः

'डुकृञ् करणे' इत्यस्मात् धातोः 'ण्वुल्तृचौ' इति सूत्रेण ण्वुल्-प्रत्यये नपुंसकलिङ्गे कारकम् इति पदं निष्पद्यते। क्रियान्वयि कारकम्। अर्थात् यस्य पदस्य क्रियया अन्वयः भवति तद् कारकम् इति। यथा – काश्याः राजा तिष्ठति। अत्र 'तिष्ठति' क्रियया 'राजा' इति पदस्य अन्वयः भवति, अतः 'राजा' इति कारकं भवति। परन्तु 'काश्याः' इति षष्ठ्यन्तपदस्य 'तिष्ठति' इति क्रियया अन्वयः न भवति अपि तु 'राजा' इति पदेन अन्वयः भवति। अतः तत्र कारकं न भवति।

**अधिपरी अनर्थकौ** *(पा.सू. १.४.९३)*

**पदविभागः -** अधिपरी(प्रथमा-द्विवचनम्), अनर्थकौ(प्रथमा-द्विवचनम्)। द्विपदं सूत्रम्।

**वृत्तिः -** धात्वर्थमात्रबोधके अधि परि इत्येतौ कर्मप्रवचनीयसंज्ञौ भवतः।

**उदाहरणम् -** कुतः अध्यागच्छति ? कुतः पर्यागच्छति ? कुतः आगच्छति इत्यर्थः।

**धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्।**
**प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया॥**

**वसुदेवसुतं देवं कंसचाणूरमर्दनम्।**
**देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम्॥**

**अच्युतं केशवं रामनारायणं।**
**कृष्णदामोदरं वासुदेवं हरिम्॥**
**श्रीधरं माधवं गोपिकावल्लभं।**
**जानकीनायकं रामचन्द्रं भजे॥**

# चतुर्थः पाठः

# अच्सन्धिः

# (पररूप-पूर्वरूप-प्रगृह्यसन्धिश्च)

**सन्धिशब्दस्य व्युत्पत्तिः** - सम् उपसर्गपूर्वकात् डुधाञ् (धा) धातोः निष्पद्यते।

**सन्धिशब्दस्य परिभाषा** - द्वयोः वर्णयोः परस्परं मेलनं सन्धिः कथ्यते।

**पाणिनीयसूत्रम्** - "परः सन्निकर्षः संहिता" अर्थात् वर्णानाम् अत्यन्तनिकटता संहिता इति कथ्यते।

यदा वर्णाः परस्परं मिलित्वा तिष्ठन्ति तदा तेषु कदाचित् विकाराः जायन्ते। अज्झलोः सन्निधौ यदा विकारो भवति तदा सन्धिः उच्यते। विकारो नाम कस्यचिद् वर्णस्यादर्शनं कस्यचिद् इतरवर्णस्य प्रयोगो वा। यदा सन्धिः भवति तदा तत्र आदेशः, आगमः, लोपः, प्रकृतिभावो वा भवति।

**आदेशः** - आदेशः शत्रुवद् भवति। यस्य स्थाने आदेशः भवति तदुन्मूल्य स आदेशः तत्र तिष्ठति। यथा - दध्योदनम्। दधि + ओदनम् (इ = य्)।

**आगमः** - आगमः मित्रवद् भवति। यस्य स्थाने आगमो भवति तस्य वर्णस्य पार्श्वे उपविशति। यथा - कुर्वन्नपि - कुर्वन् + अपि = कुर्वन् न् + अपि।

**लोपः** - अत्र वर्णस्यादर्शनम् अर्थात् लोपो भवति। यथा - एष विष्णुः - एषस् + विष्णुः (स् = लोपः)

**अच्सन्धिः (स्वरसन्धिः)** - यत्र द्वयोः स्वरयोः मध्ये मेलनं जायते सः अच्सन्धिः (स्वरसन्धिः) कथ्यते।

**सन्धिः** - (अच्, हल्) पूर्वरूपम्, पररूपम्, अयादिः, जश्त्वम्, अनुनासिकः, अनुस्वारः परसवर्णः इत्यादीनां सन्धीनां ससूत्रं विवरणं प्रस्तूयते।

# अयादिसन्धिः

**एचोऽयवायावः** *(पा.सू. ६.१.७८)*

**पदविभागः -** एचः(षष्ठ्येकवचनम्), अयवायावः(प्रथमाबहुवचनम्) इति। द्विपदमिदं सूत्रम्।

**वृत्तिः -** एचः क्रमादय्, अव्, आय्, आव् एते स्युरचि।

**उदाहरणानि -** हरये - हरे + ए इति अवस्थायाम् एचोऽयवायावः इत्यनेन एकारस्य अयादेशे कृते हरये इति रूपं सिद्धम्।

एकारस्य स्थाने अय् आदेशः - ए - अय्

ओकारस्य स्थाने अव् आदेशः - ओ - अव्

ऐकारस्य स्थाने आय् आदेशः - ऐ - आय्

औकारस्य स्थाने आय् आदेशः - औ - आव्

| हरये | पवनम् | गायकः | भावकः |
|---|---|---|---|
| हरे + ए | पो + अनम् | गै + अकः | भौ + अकः |
| हर् + अय् + ए | प् + अव् + अनम् | ग् + आय् + अकः | भ् + आव् + अक |
| हरये | पवनम् | गायकः | भावकः |

**उपसर्गाः क्रियायोगे** (*पा.सू. १.४.५९*)

**पदविभागः** - उपसर्गाः (प्रथमाबहुवचनम्), क्रियायोगे (सप्तम्येकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः** - प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः। प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप एते प्रादयः।

## पररूपसन्धिः -

**एङि पररूपम्** *(पा.सू. ६.१.९४)* -

**पदविभागः -** एङि (सप्तम्येकवचनम्), पररूपम् (प्रथमैकवचनम्) इति। द्विपदमिदं सूत्रम्।

**वृत्तिः -** आदुपसर्गादेङादौ धातौ परे पररूपमेकादेशः स्यात्।

**उदाहरणानि -** प्रेजते। उपोषति।

उदाहरणम्

एङ् = ए, ओ

| ए | ओ |
|---|---|
| प्रेजते | उपोषति |
| प्र + एजते | उप + ओषति |
| प्रेजते | उपोषति |

**अचोऽन्त्यादि टि** *(पा.सू. १.१.६४)*

**पदविभागः** - अचः (षष्ठ्येकवचनम्), अन्त्यादि (प्रथमैकवचनम्), टि (प्रथमैकवचनम्)। त्रिपदमिदं सूत्रम्।

**वृत्तिः** - अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात्। शकन्ध्वादिषु पररूपं वाच्यम् *(वार्तिकम्)*। तच्च टेः *(वार्तिकम्)* । आकृतिगणोऽयम्।

**उदाहरणम्** - शक + अन्धुः = शकन्धुः। कर्क + अन्धुः = कर्कन्धुः।
मनस् + ईषा = मनीषा। मार्त + अण्डः = मार्तण्डः।
कुल + अटा = कुलटा।

## पूर्वरूपसन्धिः

**एङः पदान्तादति** *(पा.सू. ६.१.१०९)*

**पदविभागः** - एङः (पञ्चम्येकवचनम्), पदान्तात् (पञ्चम्येकवचनम्), अति (सप्तम्येकवचनम्) इति। त्रिपदात्मकं सूत्रम्।

**वृत्तिः** - पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात्। हरेऽव। विष्णोऽव।

**उदाहरणानि** -

एङ् - ए - ओ

| ए | ओ |
|---|---|
| हरेऽव | विष्णोऽव |
| हरे + अव - हरे + ऽ + व | विष्णो + अव - विष्णो + ऽ + व |
| हरेऽव | विष्णोऽव |

**अन्यानि उदाहरणानि** - एते + अपि = एतेऽपि, गुरुकुले + अस्मिन् = गुरुकुलेऽस्मिन्, विद्यामन्दिरे + अपि = विद्यामन्दिरेऽपि, सो + अहम् = सोऽहम्, देवदत्तो + अवदत् = देवदत्तोऽवदत्, अवसरो + अयम् = अवसरोऽयम्।

## प्रगृह्यसन्धिः

**ईदूदेद्द्विवचनं प्रगृह्यम्** *(१.१.११)*

**पदविभागः** - ईदूदेद्द्विवचनम् (प्रथमैकवचनम्), प्रगृह्यम् (प्रथमैकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः** - ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात्। हरी एतौ। विष्णू इमौ। गङ्गे अमू।

**उदाहरणानि** - मुनी, साधू, गङ्गे, पचेते, वन्दावहे।

**प्लुतप्रगृह्या अचि नित्यम्** *(६.१.१२५)*

**पदविभागः** - प्लुतप्रगृह्याः (प्रथमाबहुवचनम्), अचि (सप्तम्येकवचनम्), नित्यम् (प्रथमैकवचनम्)। त्रिपदात्मकं सूत्रमिदम्।

**वृत्तिः** - एतेऽचि प्रकृत्याः स्युः। आगच्छ कृष्ण ३ अत्र गौश्चरति।

**उदाहरणम्** - प्लुतस्योदाहरणम् - आगच्छ कृष्ण ३ अत्र गौश्चरति।
प्रगृह्यस्योदाहरणम् - हरी एतौ, वन्दावहे आवाम्, पचेते ऋत्विजौ।

## शब्दार्थाः

| सन्धिः | संहिता |
|---|---|
| पावनम् | पवित्रम् |
| हरेऽव = हरे + अव | हे हरे ! मां रक्ष |
| अत्र | इह |
| वन्दावहे | वन्दनं कुर्वः |
| प्रकृत्या | यथावत् (सन्धिनिषेधः) |
| एजते | कम्पते |

| | |
|---|---|
| उपोषति | उपवासं करोति |
| शकन्धुः | शकदेशस्य कूपः |
| कर्कन्धुः | बदरीफलम् |
| मनीषा | मतिः |
| मार्तण्डः | भानुः |

## अभ्यासः

### १. उच्चारणं कुरुत -

एङः पदान्तादति, ईदूदेद्विवचनं प्रगृह्यम्, प्लुतप्रगृह्या अचि नित्यम्,

एचोऽयवायावः, एङि पररूपम्।

### २. वस्तुनिष्ठाः प्रश्नाः -

(क) एकारस्य स्थाने कः आदेशः भवति ?

(अ) अय् (आ) आय्

(इ) अव् (ई) आव्

(ख) आव् आदेशः कस्य स्थाने भवति ?

(अ) ए (आ) ओ

(इ) ऐ (ई) औ

(ग) हरेऽव इति पदस्य कः सन्धिविच्छेदः ?

(अ) हर + एव (आ) हरे + अव

(इ) हरे + ऽव (ई) हर + अव

(घ) एषु अयादिसन्धेः उदाहरणं किम् ?

(अ) पावकः (आ) रमेशः

(इ) उपेन्द्रः (ई) सूर्योदयः

(ङ) मुनी इत्यस्य का संज्ञा ?

(अ) गुणसंज्ञा (आ) टिसंज्ञा

(इ) प्लुतसंज्ञा (ई) प्रगृह्यसंज्ञा

(च) उपसर्गाः कति भवन्ति ?

(अ) चतुर्दश (आ) द्वाविंशतिः

(इ) द्वादश (ई) अष्टादश

## ३. रिक्तस्थानानि पूरयत -

(क) एचो ........................ यावः।

(ख) ........................ पररूपं वाच्यम्।

(ग) प्लुत.......... अचि नित्यम्।

(घ) एङन्तात् पदान्तात् ह्रस्वाकारे परे ........... स्यात्।

(ङ) प्र, परा, अप, सम्, अनु ................... अभि, प्रति, परि, उप।

## ४. एकवाक्येन उत्तरं लिखत -

(क) एचोऽयवायावः इति सूत्रस्य कोऽर्थः ?

(ख) कर्क + अन्धुः इत्यस्य सन्धिं कुरुत।

(ग) विष्णोऽव इत्यत्र केन सूत्रेण कः सन्धिः भवति ?

(घ) वन्दावहे आवाम् इत्यत्र सन्धिनिषेधः केन सूत्रेण भवति ?

(ङ) प्रेजते, उपोषति इति कस्य सूत्रस्य उदाहरणम् ?

(च) वेदाभ्यासः इत्यत्र कः सन्धिः ?

## ५. समुचितं योजयत -

| | |
|---|---|
| (क) यण्-सन्धिः | उपोषति |
| (ख) अयादिसन्धिः | वेदाध्ययनम् |
| (ग) गुणसन्धिः | वेदेऽस्मिन् |
| (घ) वृद्धिसन्धिः | कवी इमौ |
| (ङ) पररूपम् | तथैव |
| (च) सवर्णदीर्घसन्धिः | उपेन्द्रः |
| (छ) पूर्वरूपम् | वागर्थाविव |
| (ज) प्रगृह्यम् | श्रुत्यध्ययनम् |

६. **अधोलिखितपदानां सन्धिं सन्धिविच्छेदं वा कुरुत -**

(क) शिष्यावपि ------------------- + -------------------

(ख) ग्रन्थालयः ------------------- + -------------------

(ग) पठत्वत्र ------------------- + -------------------

(घ) प्र + एजते -------------------

(ङ) मनस् + ईषा -------------------

(च) मार्तण्डः ------------------- + -------------------

(छ) पाठशालैषा ------------------- + -------------------

(ज) अन्ववद ------------------- + -------------------

(झ) वटो + ऋक्षः -------------------

(ञ) छात्र + ऋद्धिः -------------------

७. **'इको यणचि' इति सूत्रस्य उदाहरणपुरस्सरम् अर्थं लिखत।**

## योग्यता-विस्तारः

**संहितैकपदे नित्या नित्या धातूपसर्गयोः।**
**नित्या समासे वाक्ये तु सा विवक्षामपेक्षते॥**

| सूत्राणि | सन्धिकार्यम् | उदाहरणम् |
|---|---|---|
| एचोऽयवायावः | अयादिसन्धिः | कवये, भवनम्, गायकः |
| एङि पररूपम् | पररूपम् | प्रेजते, उपोषति |
| एङः पदान्तादति | पूर्वरूपम् | एतेऽपि, जशोऽन्ते |
| इको यणचि | यण्-सन्धिः | सुध्युपास्यः, अन्वगच्छत्, पित्रादेशः, लाकृतिः |
| वृद्धिरेचि | वृद्धिसन्धिः | संहितैकपदे, तण्डुलौदनम्, वेदैश्वर्यम् |
| आद्गुणः | गुणसन्धिः | वेदोक्तः, शास्त्रोपदेशः |
| अकः सवर्णे दीर्घः | सवर्णदीर्घः | वेदाभ्यासः, श्रीशः, होतृकारः |
| प्लुतप्रगृह्या अचि नित्यम् | प्रकृतिभावः | श्रुती इमे, बालिके एते, विष्णू इमौ |
| अचो रहाभ्यां द्वे | द्वित्वकार्यम् | गौर्य्यौ |
| उपसर्गादृति धातौ | वृद्धिसन्धिः | प्रार्च्छति |

# पञ्चमः पाठः

## श्वेतकेतुः

महर्षिः श्वेतकेतुः आरुण्युद्दालकयोः पुत्रः आसीत्। सः गुरुकुले द्वादश वर्षाणि यावत् वेदशिक्षां सम्प्राप्य यदा गृहं प्रत्यागतः, तदा तस्य पिता तमपृच्छत् - हे श्वेतकेतो ! इदानीमपि त्वं वेदाभ्यासं कर्तुम् इच्छसि अथवा परिणयं करिष्यसि ? श्वेतकेतुः सगर्वम् अब्रवीत् - एकवारं राज्ञः जनकस्य सभां गत्वा तत्र शास्त्रार्थं कृत्वा विजयं प्राप्य आगमिष्यामि तत्पश्चात् भवान् यथोचितम् आज्ञापयतु। पुत्रस्य ईदृशम् अहङ्कारयुक्तं वचनं श्रुत्वा उद्दालकस्य मनसि चिन्ता समुद्भूता। श्वेतकेतोः माता आरुणी पतिं चिन्तामग्नं दृष्ट्वा चिन्तायाः कारणं किम् इति अपृच्छत्। उद्दालकः अवदत् - श्वेतकेतोः जनकसभां गत्वा विजयं प्राप्स्यामि इति वचनम् एवं वदति यत् सः वेदानां मर्म नैव ज्ञातवान्, सः तु शाब्दिकशिक्षायाः भारं गृहीत्वा आगच्छत्।

श्वेतकेतुः यदा पितुः समीपम् अगच्छत्, तदा पिता तम् अकथयत् - अहं चिन्तयामि यत् त्वं वेदानां सारं न ज्ञातवान् इति। किं त्वं तद् जानासि ? यस्य ज्ञानेन अज्ञातं सर्वं ज्ञातं भवति। तदा सः उक्तवान् - पितः ! आचार्याः एतत् न अपाठयन्। श्वेतकेतोः प्रत्युत्तरं श्रुत्वा पिता उद्दालकः तं गृहात् बहिः आनीय काञ्चित् मृत्तिकां स्वीकृत्य अवदत् - यथा यदा त्वं मृत्तिकां जानासि तदा मृत्पात्राणां सर्वेषां ज्ञानं भवति यत् अत्र विद्यमानं द्रव्यमपि मृत्तिका इति, तथैव जडजगति विद्यमानेषु सर्वेषु वस्तुषु तन्मूलभूतं तत्त्वं विद्यते, यस्य ज्ञानेन सर्वो विषयो ज्ञातो भवति। तथा चोक्तम् -

**यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात्।**
**वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्॥**

तदा श्वेतकेतुः अवदत् - अहं तद् न जानामि इति। उद्दालकः अब्रवीत् - अहम् एव सच्चिदानन्दस्वरूपं ब्रह्म इति, मत्तः एव संसारः समुद्भूतः। श्वेतकेतुः अपृच्छत् - भोः तात ! सत्स्वरूपात् चेतनस्वरूपात् च विविधतापूर्णस्य संसारस्य उत्पत्तिः कथं सम्भवति ? उद्दालकः वटस्य लघूनि बीजानि दर्शयित्वा अवदत् - यथा चेतनतत्त्वात् विशालः वटवृक्षः अभवत्, तथैव एकस्मिन् कलशे लवणं जलं च मेलयित्वा श्वेतुकेतुं प्रति उक्तवान् - कलशस्य सर्वभागात् जलं पिब। तथा चोक्तम् - **लवणमेतदुदकेऽवधायाथ मा प्रातरूपसीदथा.....** *(छा.उप. ६.२)*। कलशस्य

जलं सर्वत्र लवणमयम् आसीत्। पुनः उद्दालकः अवदत् - यथा अदृश्यमानेऽपि लवणे जलस्य सर्वभागेषु लवणं विद्यते, तथैव अदृश्यमानेऽपि तच्चैतन्ये तत् त्वयि मयि सर्वत्र च विद्यते। इत्थं विविधानि उदाहरणानि प्रदर्श्य नववारं 'तत्त्वमसि' **स आत्मा तत्त्वमसि -** *(छा.उप. ६.६)* इति महावाक्यम् उद्घोषितवान्। श्वेतकेतुः तस्यार्थम् आत्मसात् न अकरोत्।

## शब्दार्थाः

| | |
|---|---|
| सम्प्राप्य | लब्ध्वा |
| सगर्वम् | गर्वेण सह |
| यथोचितम् | यथा सम्यक् भवेत् |
| समुद्भूता | उत्पन्ना अभवत् |
| चिन्तामग्नम् | चिन्तायां मग्नम् |
| अपाठयन् | पाठितवन्तः |
| सच्चिदानन्दस्वरूपम् | सत्यज्ञानानन्दस्वरूपम् |
| तत्त्वमसि | तत् त्वम् असि |
| परिणयः | विवाहः |
| उद्घोषितवान् | उद्घोषणां कृतवान् |
| प्रत्युत्तरम् | प्रश्नस्योत्तरम् |
| जडजगति | जडरूपसंसारे |
| वस्तुषु | पदार्थेषु |
| लवणम् | सैन्धवम् |
| वटस्य | वटवृक्षस्य |
| बहिः | बहिर्भागः |
| काचित् | काचन |
| विद्यते | वर्तते |

# अभ्यासः

## १. उच्चारणं कुरुत -

उद्दालकस्य, समुद्भूता, सोम्यैकेन, मृत्तिकेत्येव, सच्चिदानन्दस्वरूपम्, चेतनतत्त्वात्, अदृश्यमानेऽपि, वाचारम्भणम्, आत्मसात्, उद्घोषितवान्।

## २. एकवाक्येन उत्तरं लिखत -

(क) श्वेतकेतोः पितुः नाम किम् ?

(ख) श्वेतकेतोः मातुः नाम किम् ?

(ग) उद्दालकः श्वेतकेतुं किम् अपृच्छत् ?

(घ) आरुणी उद्दालकं किम् अपृच्छत् ?

(ङ) श्वेतकेतुः कस्य भारं गृहीत्वा आगच्छत् ?

(च) वेदानां सारं कः न ज्ञातवान् ?

## ३. यथोचितं मेलयत -

| | |
|---|---|
| (क) श्वेतकेतुः | संसारः |
| (ख) उद्दालकस्य पुत्रः | तत्त्वमसि |
| (ग) आरुणी कस्य भार्या | लवणम् |
| (घ) उद्दालकः जले मेलितवान् | उद्दालकस्य |
| (ङ) नवधा प्रोक्तवान् | शाब्दिकशिक्षायाः भारं गृहीतवान् |
| (च) चैतन्यतत्त्वात् जायते | श्वेतकेतुः |

## ४. कोष्ठकात् समुचितं पदं चित्वा रिक्तस्थानं पूरयत -

वेदशिक्षाम्, आरुण्याः, पितुः, चिन्तामग्नम्, उद्दालकः, चिन्तायाः

क) श्वेतकेतुः यदा ......................... समीपम् अगच्छत्।

ख) श्वेतकेतुः ......................... पुत्रः आसीत्।

ग) द्वादश वर्षाणि गुरुकुले ......................... सम्प्राप्य गृहं प्रत्यागतः।

घ) ......................... वटस्य लघूनि बीजानि दर्शयित्वा अवदत्।

ङ) आरुणी पतिं ............. दृष्ट्वा ............. कारणं किम् इति अपृच्छत्।

५. **कोष्ठकात् उचितविभक्तिं चित्वा रिक्तस्थानानि पूरयत -**

क) श्वेतकेतुः अध्ययनार्थं ............. गच्छति। (गुरुकुलं/गुरुकुलेन)

ख) अधुना अपि ............. कर्तुम् इच्छति अथवा परिणयं करिष्यसि ?

(वेदाभ्यासं/यथोचितम्)

ग) ............. यदा पितुः समीपम् अगच्छत्। (उद्दालकः/श्वेतकेतुः)

घ) अहं ............. ब्रह्म इति (सच्चिदानन्दस्वरूपं/अचैतन्यरूपम्)

ङ) ............. जगतः उत्पत्तिः भवति। (चेतनस्वरूपात्/आकाशात्)

६. **प्रसङ्गानुसारं मेलयत -**

| | |
|---|---|
| क) श्वेतकेतोः प्रसङ्गः | तत्त्वमसि |
| ख) स आत्मा | त्वयि मयि सर्वत्र |
| ग) वटस्य लघूनि बीजानि | छान्दोग्योपनिषदि |
| घ) तच्चैतन्ये अदृश्यमानेऽपि | उद्घोषितवान् |
| ङ) नववारं 'तत्त्वमसि' महावाक्यम् | उद्दालकः |

७. **अधोलिखितपदानां सन्धिविच्छेदपूर्वकं सन्धिसूत्राणि लिखत -**

| | सन्धिविच्छेदः | सन्धिसूत्राणि |
|---|---|---|
| (क) छान्दोग्योपनिषद् | ------------ + ------------ | -------------------- |
| (ख) वेदोक्तः | ------------ + ------------ | -------------------- |
| (ग) चोक्तम् | ------------ + ------------ | -------------------- |
| (घ) तन्मूलभूतम् | ------------ + ------------ | -------------------- |
| (ङ) नैव | ------------ + ------------ | -------------------- |
| (च) वेदाभ्यासम् | ------------ + ------------ | -------------------- |
| (छ) अदृश्यमानेऽपि | ------------ + ------------ | -------------------- |
| (ज) प्राप्स्यामीति | ------------ + ------------ | -------------------- |
| (झ) प्रत्युत्तरम् | ------------ + ------------ | -------------------- |
| (ञ) वटवृक्षः | ------------ + ------------ | -------------------- |
| (ट) श्रेष्ठम् | ------------ + ------------ | -------------------- |

## योग्यता-विस्तारः

श्वेतकेतोः आख्यानं छान्दोग्योपनिषदि षष्ठाध्याये वर्तते।

छान्दोग्यपनिषदि पञ्चदश खण्डानि विद्यन्ते।

अत्र अष्टौ प्रपाठकाः/अष्ट अध्यायाः सन्ति।

यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च

ह वै श्रेष्ठश्च भवति प्राणो वै ज्येष्ठश्च श्रेष्ठश्च

*बृहदारण्यकोपनिषद् – ६ अध्यायः*

सामवेदेन सम्बद्धा उपनिषद् (छान्दोग्योपनिषद्)

चत्वारि महावाक्यानि –

प्रज्ञानं ब्रह्म – ऐतरेयोपनिषद् (ऋग्वेदः)।

अयमात्मा ब्रह्म – माण्डुक्योपनिषद् (अथर्ववेदः)।

तत्त्वमसि – छान्दोग्योपनिषद् (सामवेदः)।

अहं ब्रह्मास्मि – बृहदारण्यकोपनिषद् (यजुर्वेदः)।

# षष्ठः पाठः

# सुभाषितानि

विना वेदं विना गीतां, विना रामायणीं कथाम्।
विना कविं कालिदासं, भारतं भारतं न हि॥ १॥
रामं स्कन्दं हनूमन्तं वैनतेयं वृकोदरम्।
शयने यः स्मरेन्नित्यं दुःस्वप्नस्तस्य नश्यति ॥ २ ॥
अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति!।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्॥ ३ ॥
अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यासनं चैव वाङ्मयं तपः उच्यते॥ ४ ॥
अजीर्णे भेषजं वारि जीर्णे वारि बलप्रदम्।
भोजने चामृतं वारि भोजनान्ते विषापहम्॥ ५ ॥
अजरामरवत् प्राज्ञो विद्यामर्थं च साधयेत्।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत्॥ ६ ॥
येषां न विद्या न तपो न दानं, ज्ञानं न शीलं न गुणो न धर्मः।
ते मृत्युलोके भुवि भारभूताः, मनुष्यरूपेण मृगाश्चरन्ति॥ ७ ॥
साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः।
तृणन्न खादन्नपि जीवमानस्तद् भागधेयं परमं पशूनाम्॥ ८ ॥
यस्यास्ति वित्तं स नरः कुलीनः, स पण्डितः सः श्रुतवान् गुणज्ञः।
स एव वक्ता स च दर्शनीयः, सर्वे गुणाः काञ्चनमाश्रयन्ति॥ ९ ॥
अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च।
वश्यश्च पुत्रोऽर्थकरी च विद्या षड् जीवलोकस्य सुखानि राजन्!॥ १० ॥

# शब्दार्थाः

| | |
|---|---|
| स्कन्दम् | षण्मुखम् |
| शीलम् | चरितम् |
| मृत्युलोके | संसारे |
| भुवि | धरण्याम् |
| अपूर्वः | यत् पूर्वं न घटितम् |
| कोशः | आकरग्रन्थः |
| आयाति | आगच्छति |
| अनुद्वेगकरम् | अकष्टदम् |
| प्रियहितम् | प्रीतिकरम् |
| स्वाध्यायाभ्यासनम् | वैदिकशास्त्रस्य पाठः |
| वाङ्मयम् | वाक्यात्मकम् |
| पुच्छविषाणहीनः | पुच्छश्रृङ्गरहितः |
| जीवमानः | प्राणवन्तः |
| कुलीनः | उत्तमकुलोद्भवः |
| गुणज्ञः | गुणस्य ज्ञाता |
| दर्शनीयः | द्रष्टव्यः |
| काञ्चनम् | हेमम् |
| आश्रयन्ति | आश्रयं यान्ति |
| वृकोदरम् | भीमम् |
| वैनतेयम् | गरुडम् |
| हनूमन्तम् | आञ्जनेयम् |

# अभ्यासः

१. **उच्चारणं कुरुत -**

काञ्चनमाश्रयन्ति, दर्शनीयः, मनुष्यरूपेण, रामायणीम्, स्वाध्यायाभ्यासनम्, अनुद्वेगकरम्, पुच्छविषाणहीनः, पशूनाम्, तृणन्नपि, जीवमानस्तद्।

२. **अधोलिखितानां प्रश्नानामुत्तराणि संस्कृतभाषया लिखत -**

(क) कुतः वृद्धिमायाति ?

(ख) कान् विना भारतं भारतं न ?

(ग) के जनाः मृत्युलोके भुवि भारभूता ?

(घ) निर्धनानां धनं किम् अस्ति ?

(ङ) कुत्र भेषजं वारि ?

(च) शयने रामादीनां स्मरणेन कः नश्यति ?

३. **एकवाक्येन उत्तरं लिखत -**

(क) कः चिन्तयेत् ?

(ख) कीदृशं वाक्यं वदेत् ?

(ग) कीदृशं वाङ्मयं तपः उच्यते ?

(घ) 'येषाम्' इति पदस्य का विभक्तिः अस्ति ?

(ङ) भोजनान्ते वारि कथं भवति ?

४. **सन्धिविच्छेदं कुरुत -**

| | | सन्धिविच्छेदः |
|---|---|---|
| (क) | कोशोऽयम् | ------------- + ------------- |
| (ख) | यस्यास्ति | ------------- + ------------- |
| (ग) | भोजनान्ते | ------------- + ------------- |
| (घ) | कोऽपि | ------------- + ------------- |
| (ङ) | चैव | ------------- + ------------- |

५. **रिक्तस्थानानि पूरयत -**

(क) .......................... विद्यामर्थं च साधयेत्।

(ख) .......................... वाङ्मयं तपः उच्यते।

(ग) अपूर्वः कोऽपि कोशोऽयं ..........................।

(घ) येषां न विद्या ..........................।

(ङ) अजीर्णे भेषजं वारि ..........................।

६. **श्लोकांशान् यथोचितं योजयत -**

| | |
|---|---|
| (क) येषां न विद्या न तपो न दानं | विद्यामर्थं च चिन्तयेत्। |
| (ख) विना वेदं विना गीतां | सत्यं प्रियं हितं च यत्। |
| (ग) अनुद्वेगकरं वाक्यं | विना रामायणीं कथाम् |
| (घ) अजरामरवत् प्राज्ञो | ज्ञानं न शीलं न गुणो न धर्मः। |

७. **शुद्धकथनानां समक्षम् 'आम्' अशुद्धकथनानां समक्षं न इति लेखनीयम् -**

(क) सर्वदा प्रियवाक्यं वक्तव्यम्। [ ]

(ख) विद्वान् सर्वत्र पूज्यते। [ ]

(ग) निर्बलानां बलं विद्या। [ ]

(घ) अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च वाङ्मय तपः उच्यते। [ ]

(ङ) भोजने चामृतं वारि। [ ]

८. **श्लोकाधारेण रिक्तस्थानानि पूरयत -**

येषां न ............... न ............... न दानं, ज्ञानं न ............... न ............... न धर्मः।

ते .................. लोके भुवि .................. मनुष्यरूपेण .................. चरन्ति ॥

९. **पर्यायपदानि लिखत -**

| | | | |
|---|---|---|---|
| (क) स्कन्दः | .................. | (ख) विद्या | .................. |
| (ग) हनूमान् | .................. | (घ) वित्तम् | .................. |
| (ङ) वृकोदरः | .................. | (च) जलम् | .................. |
| (छ) वैनतेयः | .................. | (ज) वेदः | .................. |

(झ) भार्या ................. (ञ) रात्रीः .................

१०. **अधोलिखितश्लोकस्य संस्कृतभाषया मातृभाषया वा भावार्थं लिखत।**

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति !।

व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्॥

## योग्यता विस्तारः

पञ्च विद्यां न गृह्णन्ति चण्डाः स्तब्धाश्च ये नराः।

अलसा रोगिणश्चैव येषां च विस्मृतं मनः॥

अहेरिव गणाद्भीतः सम्मानान्नरकादिव।

राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति॥

न भोजनविलम्बी स्यात् न च नारीनिबन्धनः।

सुदूरमपि विद्यार्थं व्रजेद् गरुडहंसवत्॥

हयानामिव जात्यानामर्धरात्रार्धशायिनाम्।

न हि विद्यार्थिनां निद्रा चिरं नेत्रेषु तिष्ठति॥

विधिनाऽप्यविधिज्ञानमविधानान्न लभ्यते।

अविधानपरो नित्यं प्रायश्चित्तीयते नरः॥

# सप्तमः पाठः

# कारकम्

## करणकारकम्, सम्प्रदानकरकम्, उपपदविभक्तिश्च

## करणकारकम्

**साधकतमं करणम्** *(पा.सू. १.४.४२)*

**पदविभागः** - साधकतमम् (प्रथमैकवचनम्), करणम् (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः** - क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात्। तमब्ग्रहणं किम्? गङ्गायां घोषः।

**उदाहरणम्** - वृद्धः दण्डेन चलति। अत्रः कर्तुः वृद्धस्य चलनक्रियायां दण्डः अतिशयेन सहायकम् अस्ति अतः दण्डः इति करणकारकं भवति।

**कर्तृकरणयोस्तृतीया** *(पा.सू. 2.३.१८)*

**पदविभागः** - कर्तृकरणयोः (सप्तमीद्विवचनम्), तृतीया (प्रथमैकवचनम्)

**वृत्तिः** - अनभिहिते कर्तरि करणे च तृतीया स्यात्। रामेण बाणेन हतो वाली।

प्रकृत्यादिभ्य उपसंख्यानम् (वार्तिकम्)। प्रकृत्या चारुः। प्रायेण याज्ञिकः। गोत्रेण गार्ग्यः। समेनैति। विषमेणैति। द्विद्रोणेन धान्यं क्रीणाति। सुखेन दुःखेन वा यातीत्यादि।

**उदाहरणानि** - **अनभिहिते कर्तरि तृतीया** -

१. ब्रह्मचारिभिः सन्ध्याचरणं क्रियते।

२. मया पुस्तकं पठ्यते।

३. छात्रया लेखः लिख्यते।

४. कविना काव्यं रच्यते।

५. जनन्या पाकः क्रियते।

६. शिष्यैः वेदाः पठ्यन्ते।

७. छात्राभिः उपनिषद्वाक्यानि उच्चार्यन्ते।

८. अन्तेवासिभिः ब्रह्ममुहूर्ते जागर्यते।

## करणकारकस्य तृतीयाविभक्तेः अन्यानि उदाहरणानि

(क) शिक्षकः सुधाखण्डेन लिखति।

(ख) भक्ताः दुग्धेन शिवं पूजयन्ति।

(ग) कृषकः जलेन पादपान् सिञ्चति।

(घ) बालकः लेखन्या मन्त्रं लिखति।

(ङ) यशोदा रज्वा कृष्णं बध्नाति।

(च) शिष्यः कायेन मनसा वाचा गुरुं प्रणमति।

(छ) अध्यापिका शिष्यान् संस्कृतभाषया बोधयति।

**सहयुक्तेऽप्रधाने** *(पा.सू. २.३.१९)*

**पदविभागः** - सहयुक्ते (सप्तम्येकवचनम्), अप्रधाने (सप्तम्यैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः** - सहार्थेन युक्तेऽप्रधाने तृतीया स्यात्। पुत्रेण सह आगतः पिता। एवं साकंसार्धसमंयोगेऽपि। विनापि तद्योगं तृतीया। 'वृद्धो यूना' (सू.) इत्यादिनिर्देशात्।

**वृत्तिः** - सह, साकं, सार्धं, समं इति पदानां योगे तृतीया विभक्तिः भवति। विना तद्योगं तृतीया। पुत्रेण आगतः पिता।

**उदाहरणम्** -
१. सीतया सह रामः वनम् अगच्छत्।
२. पुत्रः पित्रा सार्धं वेदपाठशालां याति।
३. अर्जुनः भगिन्या साकं क्रीडति।
४. शिशुः मात्रा समम् अस्ति।
५. शिक्षकः छात्रैः सह वार्तालापं करोति।
६. बालाभिः सह शिशुः क्रीडति।

**येनाङ्गविकारः** *(पा.सू. २.३.२०)*

**पदविभागः** - येन (तृतीयैकवचनम्), अङ्गविकारः (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः** - येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततः तृतीया स्यात्। अक्ष्णा काणः। अक्षिसम्बन्धिकाणत्वविशिष्टः इत्यर्थः। अङ्गविकारः किम् ? अक्षि काणमस्य।

**उदाहरणानि** -
१. वृद्धः <u>अक्ष्णा</u> काणः अस्ति।
२. दुर्जनः <u>पादेन</u> खञ्जः।

३. वृद्धा शिरसा खल्वाटा विद्यते।

४. सः कर्णेन बधिरः।

**इत्थंभूतलक्षणे** *(पा.सू. २.३.२१)*

**पदविभागः** - इत्थंभूतलक्षणे (सप्तम्येकवचनम्)। एकपदात्मकं सूत्रमिदम्।

**वृत्तिः** - कञ्चितप्रकारं प्राप्तस्य लक्षणे तृतीया स्यात्। जटाभिस्तापसः। जटाज्ञाप्यतापसत्वविशिष्ट इत्यर्थः।

**उदाहरणानि** - १. सः शिखया वेदाध्यायी प्रतीयते।

२. अयं जटाभिस्तापसः।

३. काषायवस्त्रेण यतिः।

४. पुस्तकेन छात्रः।

**हेतौ** *(पा.सू. २.३.२३)*

**पदविभागः** - हेतौ (सप्तम्येकवचनम्)। एकपदात्मकं सूत्रमिदम्।

**वृत्तिः** - हेत्वर्थे तृतीया स्यात्। द्रव्यादिसाधारणं निर्व्यापारसाधारणं च हेतुत्वम्। करणत्वं तु क्रियामात्रविषयं व्यापारनियतं च। दण्डेन घटः। पुण्येन दृष्टो हरिः। फलमपीह हेतुः। अध्ययनेन वसति। 'गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका' (वार्तिकम्)। अलं श्रमेण। साध्यं नास्तीत्यर्थः। इह साधनक्रियां प्रति समः करणम्। शतेन शतेन वत्सान् पाययति पयः। शतेन परिच्छिद्येत्यर्थः। 'अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया' (वार्तिकम्)। दास्या संयच्छते कामुकः। धर्मे तु भार्यायै संयच्छति।

**वृत्तिः** - क्रियासिद्धौ यः कारणभूतः अस्ति तस्मिन् तृतीया विभक्तिः भवति।

**उदाहरणानि** - १. दण्डेन घटः।

२. पुण्येन दृष्टो हरिः।

३. धनेन पुस्तकं क्रीतम्।

४. अभ्यासेन वेदज्ञानं प्राप्तम्।

५. गुरुमुखेन वेदाध्ययनं भवति।

६. विद्यया यशः

७. बुभुक्षया शिशुः क्रन्दति।

'विना' इति पदस्य योगे तृतीया विभक्तिः भवति।

**उदाहरणम् -** १. सूर्येण विना प्रकाशः न भवति।

२. वेदैः विना भारतस्य प्रसिद्धिः नास्ति।

३. सः मित्रेण विना आपणं न गच्छति।

४. बालकः कन्दुकेन विना न क्रीडति।

५. ज्ञानेन विना जीवनं वृथा।

'अलम्' इति पदस्य योगे निषेधार्थे तृतीया विभक्ति भवति।

यथा - १. अलं रोदनेन।

२. अलं विवादेन।

३. अलं भोजनेन।

४. अलं कोलाहलेन।

५. अलं निद्रया।

६. अलं श्रुतिनिन्दया।

७. अलं विकृतस्वरसन्धानेन।

८. अलं प्रमादेन।

## सम्प्रदानकारकम्

**कर्मणा यमभिप्रैति स सम्प्रदानाम्** *(पा.सू. १.४.३२)*

**पदविभागः -** कर्मणा (तृतीयैकवचनम्), यम् (द्वितीयैकवचनम्), अभिप्रैति (क्रियापदम्), सः (प्रथमैकवचनम्), सम्प्रदानम् (प्रथमैकवचनम्)। पञ्चपदमिदं सूत्रम्।

**वृत्तिः -** दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञः स्यात्।

**चतुर्थी सम्प्रदाने** *(पा.सू. २.३.१३)*

**पदविभागः -** चतुर्थी (प्रथमैकवचनम्), सम्प्रदाने (सप्तम्येकवचनम्)। द्विपदात्मकं सूत्रमिदम्।

**वृत्तिः -** विप्राय गां ददाति। अनभिहिते इत्येव। दीयतेऽस्मै दानीयो विप्रः। 'क्रियया यमभिप्रैति सोऽपि सम्प्रदानम्' (वार्तिकम्)। पत्ये शेते। 'यजेः कर्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा' (वार्तिकम्)। पशुना रुद्रं यजते। पशुं रुद्राय ददातीत्यर्थः।

**उदाहरणानि -** १. नृपः विप्राय गां ददाति। २. गुरुः शिष्याय पुस्तकं ददाति। ३. रामः सीतायै फलम् अददात्। ४. राजा ब्राह्मणाय धनम् अयच्छत्। ५. राजा विदुषे ग्रन्थं दद्यात्। प्रथमवाक्ये कर्ता नृपः दानरूपकर्मणा विप्रम् अभिसम्बद्धुम् इच्छति। अत्र विप्र इति सम्प्रदानसंज्ञकं भवति। सम्प्रदानसंज्ञकात् विप्र इति पदे चतुर्थीविभक्तिः भवति। अर्थात् कर्मसंज्ञकं वस्तु यः लभते तस्य सम्प्रदानसंज्ञा जायते। यथा - गुरुः शिष्याय वेदं ददाति। इत्यत्र वेदम् इति कर्मसंज्ञकं पदं वर्त्तते। एतं वेदं कः लभते ? शिष्यः। यः प्राप्नोति तस्य का संज्ञा भवति ? सम्प्रदानसंज्ञा। सम्प्रदानसंज्ञकात् शब्दात् का विभक्तिः भवति ? चतुर्थीविभक्तिः। अतः अस्मिन् वाक्ये शिष्यशब्दात् चतुर्थीविभक्तिः अजायत। इत्थम् अन्येष्वपि वाक्येषु चिन्तयितुं शक्यते।

**रुच्यर्थानां प्रीयमाणः** *(पा.सू. १.४.३३)*

**पदविभागः -** रुच्यर्थानाम् (षष्ठीबहुवचनम्), प्रीयमाणः (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणोऽर्थः सम्प्रदानं स्यात्। हरये रोचते भक्तिः। अन्यकर्तृकोऽभिलाषो रुचिः। हरिनिष्ठप्रीतेर्भक्तिः कर्त्री। प्रीयमाणः किम् ? देवदत्ताय रोचते मोदकः पथि।

**उदाहरणानि -** १. शिशवे क्षीरं रोचते। २. बालिकायै पाटलपुष्पाणि रोचन्ते। ३. गृहिण्यै पाककार्यं रोचते। ४. गुरवे वेदाध्यापनं रोचते। ५. मह्यं भोजनम् अरोचत।

**स्पृहेरीप्सितः** *(पा.सू. १.४.३६)*

**पदविभागः -** स्पृहेः (षष्ठ्येकवचनम्), ईप्सितः (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** स्पृहयतेः प्रयोगे इष्टः सम्प्रदानं स्यात्। पुष्पेभ्यः स्पृहयति। ईप्सितः किम् ? पुष्पेभ्यो वने स्पृहयति। ईप्सितमात्रेयं संज्ञा। प्रकर्षविवक्षायां तु परत्वात् कर्मसंज्ञा। पुष्पाणि स्पृहयति।

**उदाहरणानि -** १. बालिका पुष्पेभ्यः स्पृहयति। २. देवः फलेभ्यः स्पृहयति। ३. वयं वेदेभ्यः स्पृहयेम। ४. गुरुः शिष्येभ्यः स्पृहयेत्। ५. त्वं दूरवाण्यै मा स्पृहय।

## उपपदविभक्तिः

**नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च** *(पा.सू. २.३.१६)*

**पदविभागः -** नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगात् (पञ्चम्येकवचनम्), च (अव्ययम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** एभिर्योगे चतुर्थी स्यात्। हरये नमः। उपपदविभक्तेः कारकविभक्तिर्बलीयसी (परिभाषा)। नमस्करोति देवान्। प्रजाभ्यः स्वस्ति। अग्नये स्वाहा। पितृभ्यः स्वधा। अलमिति पर्याप्त्यर्थग्रहणम् (वार्तिकम्)। तेन दैत्येभ्यो हरिरलं, प्रभुः, समर्थः, शक्त इत्यादि। प्रभ्वादियोगे षष्ठ्यपि साधुः। तस्मै प्रभवति (सू.), स एषां ग्रामणीः (सू.) इति निर्देशात्। तेन प्रभुर्बुभूषुर्भुवनत्रयस्य इति सिद्धम्। वषडिन्द्राय। चकारः पुनर्विधानार्थः, तेनाशीर्विवक्षायां परामपि 'चतुर्थी चाशिषि' (सू.) इति षष्ठीं बाधित्वा चतुर्थ्येव भवति। स्वस्ति गोभ्यो भूयात्।

**उदाहरणानि -** **नमः योगे** - वेदपुरुषाय नमः, वेदमूर्त्तये नमः, हरये नमः।

**स्वस्ति योगे** - प्रजाभ्यः स्वस्ति। **स्वाहा** - अग्नये स्वाहा। **स्वधा** - पितृभ्यः स्वधा। **अलं योगे** - असुरेभ्यः हरिः अलम्। **वषड्** - इन्द्राय वषड्।

**तादर्थ्ये चतुर्थी वाच्या** *(वार्तिकम्)* -

**पदविभागः -** तादर्थ्ये (सप्तम्येकवचनम्), चतुर्थी (प्रथमैकवचनम्), वाच्या (प्रथमैकवचनम्)। त्रिपदात्मकं वार्तिकमिदम्।

**वार्तिकार्थः -** तस्मै इदं तदर्थम्, तदर्थस्य भावः तादर्थ्यम्। तस्मिन् चतुर्थीविभक्तिः सात्।

**उदाहरणानि -** १. प्रह्लादः मुक्तये हरिं भजति। २. शिशुः क्षीराय रोदिति। ३. शिष्यः विद्यायै गुरुं निकषा गच्छति।

**क्लृपि सम्पद्यमाने च** *(वार्तिकम्)*

**वार्तिकार्थः -** क्लृप्यर्थकधातूनां प्रयोगे यः सम्पद्यते तत्र चतुर्थीविभक्तिः भवति।

**उदाहरणानि -** १. विद्या मुक्तये कल्पते। २. श्रद्धा ज्ञानाय भवति। ३. भक्तिः ज्ञानाय जायते। ४. क्रोधः सम्मोहाय सम्पद्यते।

**तुमर्थाच्च भाववचनात्** *(३.३.१५)*

**पदविभागः -** तुमर्थात् (पञ्चम्येकवचनम्), च (अव्ययम्), भाववचनात् (पञ्चम्येकवचनम्)। त्रिपदमिदं सूत्रम्।

**वृत्तिः -** भाववचनाश्च इति सूत्रेण यो विहितः तदन्तात् चतुर्थी स्यात्। यागाय याति यष्टुं यातीत्यर्थः।

**उदाहरणम् -** यागाय याति। यष्टुं यातीत्यर्थः। दानाय (दातुं) धनम् अर्जयति। स्नानाय (स्नातुं) गङ्गातटं याति।

**क्रियार्थोपपदस्य च कर्मणि स्थानिनः** *(२.३.१४)*

**पदविभागः** -क्रिया-अर्थ-उपपदस्य (षष्ठ्येकवचनम्), च (अव्ययम्), कर्मणि (सप्तम्येकवचनम्), स्थानिनः (षष्ठ्येकवचनम्)। चतुष्पदं सूत्रमिदम्।

**वृत्तिः -** क्रियार्था क्रिया उपपदं यस्य तस्य स्थानिनोऽप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी स्यात्। फलेभ्यो याति। फलान्याहर्तुं यातीत्यर्थः। नमस्कुर्मो नृसिंहाय नृसिंहमनुकूलयितुमित्यर्थः। एवं, स्वयंभुवे नमस्कृत्य इत्यादावपि।

**उदाहरणम् -** फलेभ्यो याति। फलानि आहर्तुं यातीत्यर्थः। वनाय (गन्तुं) गां मुमोच। गणपतये (प्रीणयितुं) नमस्करोति।

## शब्दार्थः

| | |
|---|---|
| सहायकम् | सहायम् |
| अतिशयेन | अधिकतया |
| अनभिहिते | अनुक्ते/अप्रधाने |
| कर्तृकरणयोः | कर्तृकरणकारकयोः |
| रज्वा | रज्जुद्वारा |
| प्रणमति | प्रणामं करोति |
| जागर्यते | उत्थीयते |
| अन्तेवासिभिः | गुरुकुलवासिभिः शिष्यैः |
| सिञ्चति | सेचनं करोति |
| बधिरः | एडः/कल्लः |
| खञ्जः | विकलगतिः/खोडः |
| अक्ष्णा | चक्षुषा |
| काणः | एकचक्षुः |
| यशः | कीर्तिः/सुख्यातिः |
| स्पृहयेत् | इच्छेत् |

# अभ्यासः

१. **उच्चारणं कुरुत -**

क्लृपि सम्पद्यमाने च, तुमुर्थाच्च भाववचनात्, क्रियार्थोपपदस्य च कर्मणि स्थानिनः, नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च, तादर्थ्ये चतुर्थी वाच्या।

२. **वस्तुनिष्ठाः प्रश्नाः -**

(क) 'साधकतमम्' इत्यनेन किं कारकं भवति ?

(अ) करणम् (आ) कर्मम्

(इ) सम्प्रदानम् (ई) अपादानम्

(ख) अनभिहिते कर्तरि करणे च का विभक्तिः भवति ?

(अ) द्वितीया (आ) चतुर्थी

(इ) तृतीया (ई) पञ्चमी

(ग) सहयुक्तेऽप्रधाने का विभक्तिः भवति ?

(अ) द्वितीया (आ) तृतीया

(इ) चतुर्थी (ई) षष्ठी

(घ) 'जटाभिस्तापसः' इति कस्य सूत्रस्योदाहरणम् ?

(अ) कर्तृकरणयोस्तृतीया (आ) हेतौ

(इ) येनाङ्गविकारः (ई) इत्थंभूतलक्षणे

(ङ) हेतौ इत्यस्य किमुदाहरणम् ?

(अ) विद्यया यशः (आ) लेखन्या लिखति

(इ) शिखया वेदाध्यायी (ई) सीतया सह रामः व्रजति।

(च) फलेभ्यो याति इत्यत्र केन सूत्रेण चतुर्थी विभक्तिः भवति ?

(अ) रुच्यर्थानां प्रीयमाणः (आ) क्रियार्थोपपदस्य च कर्मणि स्थानिनः

(इ) तुमुर्थाच्च भाववचनात् (ई) स्पृहेरीप्सितः

### ३. रिक्तस्थानपूर्तिः क्रियताम् -

(क) कर्तृकरणयोः ..........................।

(ख) .......................... ऽप्रधाने।

(ग) येनाङ्ग ..........................।

(घ) इत्थं .......................... लक्षणे।

(ङ) कञ्चित्प्रकारं प्राप्तस्य लक्षणे .......................... स्यात्।

(च) कर्मणा .......................... अभिप्रैति ..........................।

(छ) .......................... वषड्योगाच्च।

(ज) क्लृपि ..........................।

(झ) रुच्यर्थानां ..........................।

### ४. कोष्ठकात् शुद्धं रूपं चित्वा रिक्तस्थानं पूरयत -

(क) वयं .......................... विना न जीवामः। (जले / जलेन)

(ख) त्वं .......................... सह गच्छसि। (पित्रा / मातुः)

(ग) रामः .......................... सह लङ्काम् अगच्छत्। (कपयः / लक्ष्मणेन)

(घ) वयं .......................... वदामः। (संस्कृतेन / संस्कृतात्)

(ङ) सः .......................... खञ्जः। (पादेन / पादम्)

(च) गुरवे वेदाध्यापनं ..........................। (रोदिति/रोचते)

### ५. अधोलिखितानां प्रश्नानामुत्तराणि लिखत -

(क) करणकारके का विभक्तिः भवति ?

(ख) 'येनाङ्गविकारः' सूत्रस्य अर्थं लिखत ?

(ग) 'सहयुक्तेऽप्रधाने' इति सूत्रस्य त्रीणि उदाहरणानि लिखत।

(घ) 'दण्डेन घटः' इति कस्य सूत्रस्य उदाहरणम् अस्ति ?

(ङ) 'साधकतमं करणम्' इति सूत्रस्य वृत्तिं लिखत।

(च) विद्या मुक्तये कल्पते इत्युदाहरणं कस्य वार्तिकस्य ?

### ६. समुचितमेलनं कुरुत -

(क) बालकः पाणिना लक्षणे

| | | |
|---|---|---|
| (ख) | कृष्णः भ्रात्रा | बधिरः |
| (ग) | कृषकः रज्जुभिः | रोदिति |
| (घ) | शिशुः बुभुक्षया | नमः |
| (ङ) | इत्थंभूत | बलरामेण सह गच्छति |
| (च) | सः कर्णेन | काष्ठानि बध्नाति |
| (छ) | अनभिहिते कर्तरि | वेदज्ञानं प्राप्तम् |
| (ज) | अभ्यासेन | तृतीया |
| (झ) | गणेशाय | खादति |

७. अलम्, विना, सह इत्येतेषां प्रयोगेण वाक्यानि रचयत।

८. मातृभाषायाम् अनुवादं कुरुत -

(क) विद्यालयं परितः वृक्षाः सन्ति।

(ख) युवकः तरुभ्यां जलं ददाति।

(ग) अहं प्रातः उत्थाय योगासनं कृत्वा क्षीरं पिबामि।

(घ) बालिका प्रातः आसन्दे उपविश्य उच्चैः पाठं पठति।

(ङ) अहं भोजनं कृत्वा वेदं पठितुं विद्यालयं गच्छामि।

(च) प्रह्लादः मुक्तये हरिं भजति।

(छ) वयं धनाय न स्पृहयामः।

## योग्यता-विस्तारः

**प्रकृत्यादिभ्य उपसंख्यानम्** *(वार्तिकम्)* - १. बालोऽयं प्रकृत्या चारुः। २. शिष्यः सुखेन वेदं पठति। ३. भगिनी महता आनन्देन गीतं गायति। ४. अनाथः दुःखेन क्रन्दति। ५. वृद्धः समेन याति। ६. प्रकृत्या गवां पयः मधुरम्। ७. प्रकृत्या साधुः।

**परिक्रयणे सम्प्रदानमन्यतरस्याम्** *(पा.सू. १.४.४४)*

**वृत्तिः -** नियतकालं भृत्या स्वीकरणं परिक्रयणं तस्मिन् साधकतमं कारकं सम्प्रदानसंज्ञं वा स्यात्। शतेन शताय वा परिक्रीतः। उत्पातेन ज्ञापिते च (वार्तिकम्)। वाताय कपिला विद्युत्। हितयोगे च (वार्तिकम्)। ब्राह्मणाय हितम्।

**उदाहरणानि -** १. अहं दशभिः रूप्यकैः एतां लेखनीं क्रीतवान्। २. बालिका पञ्चाशत रूप्यकैः पाञ्चालिकाम् अक्रीणात्। २. भवती कियता मूल्येन दूरवाणीं क्रीतवती।

**क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः** *(१.४.३७)*

**वृत्तिः -** क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपः स उक्तसंज्ञः स्यात्। हरये क्रुध्यति द्रुह्यति ईर्ष्यति असूयति वा। यं प्रति कोपः किम् ? भार्यामीर्ष्यति। मैनामन्यो द्राक्षीदिति। क्रोधोऽमर्षः। द्रोहोऽपकारः। ईर्ष्याऽक्षमा। असूया गुणेषु दोषाविष्करणम्। द्रोहादयोऽपि कोपप्रभवा एव गृह्यन्ते। अतो विशेषणं सामान्येन यं प्रति कोप इति।

**उदाहरणानि -** १. सज्जनः दुर्जनाय क्रुध्यति। २. रावणः श्रीरामाय द्रुह्यति। ३. रमा सख्यै ईर्ष्यति। ४. देवदत्तः यज्ञदत्ताय असूयति।

**धारेरुत्तमर्णः** *(पा.सू. १.४.३५)*

**वृत्तिः -** धारयतेः प्रयोगे उत्तमर्णः उक्तसंज्ञः स्यात्। भक्ताय धारयति मोक्षं हरिः। उत्तमर्णः किम् ? देवदत्ताय शतं धारयति ग्रामे।

**उदाहरणानि -** १. हरिः भक्ताय मोक्षं धारयति। २. सः मह्यं शतं धारयति।

मणिना वलयं वलयेन मणिर्मणिना वलयेन विभाति करः।
कविना च विभुर्विभुना च कविः कविना विभुना च विभाति सभा॥ १॥
शशिना च निशा निशया च शशी शशिना निशया च विभाति नभः।
पयसा कमलं कमलेन पयः पयसा कमलेन विभाति सरः॥ २॥
क्षमया दयया प्रेम्णा सुनृतेनार्जवेन च।
वशीकुर्याज्जगत् सर्वं विनयेन च सेवया॥ ३॥
गन्धेन हीनं सुमनं न शोभते दन्तैर्विहीनं वदनं न भाति।
सत्येन हीनं वचनं न दीप्यते पुण्येन हीनः पुरुषो जघन्यः॥ ४॥
दम्भेन धर्मं कपटेन मैत्रीं सुखेन विद्यां परुषेण नारीम्।
परोपतापेन समृद्धभावं वाञ्छन्ति ये व्यक्तमपण्डितास्ते ॥ ५॥
विना शीलेन वनिता वाग्मिता विद्यया विना।
विनयेन विना वित्तं मास्तु कस्यापि देहिनः ॥ ६॥
विद्यया वपुषा वाचा वस्त्रेण विभवेन च।

वकारैः पञ्चभिर्युक्तैः नरो भवति पूजितः ॥७॥

पञ्चभिः सह गन्तव्यं स्थातव्यं पञ्चभिः सह।

पञ्चभिः सह वक्तव्यं न दुःखं पञ्चभिः सह ॥८॥

विष्णवे जिष्णवे शङ्खिने चक्रिणे रुक्मिणीरागिणे जानकीजानये

वल्लभीवल्लभायार्चितात्मने कंसविध्वंसिने वंशिने ते नमः॥९॥

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्त्तये।

स्वनुभूत्येकमानाय नमः शान्ताय तेजसे॥१०॥

रामाय रामभद्राय रामचन्द्राय वेधसे।

रघुनाथाय नाथाय सीतायाः पतये नमः ॥११॥

विनाहीनादिभिर्योगे सहार्थैश्च विशेषणे।

विकृताङ्गे तृतीया स्याद् योगे तुल्यार्थकैरपि॥१२॥

सम्प्रदाने चतुर्थी स्यात् तादर्थ्ये च क्रियायुते।

रुच्यर्थानां प्रीयमाणे नमो योगे च सा भवेत् ॥१३॥

ज्ञानज्ञाप्येऽङ्गीकारे हतावपि इष्यते।

तादर्थ्ये सम्प्रदाने च चतुर्थी स्याच्च सर्वदा ॥१४॥

रुचादिधातुयोगे च चतुर्थी विहिता भवेत्।

क्रिययाऽभीप्सिताच्चैव धारि-रुचि-स्पृहादिषु ॥१५॥

तादर्थ्ये क्लृपि-योगे चोत्पादकज्ञान एव च।

हितयोगे तुमुन्योगे दान आदिप्रयोगतः ॥१६॥

आशीर्वादे चतुर्थी स्यात् क्रुधादेः कर्मतस्तथा ॥

# अष्टमः पाठः

## हल्सन्धिः

हल्वर्णैः हल्वर्णानां सम्मेलनेन जायमानः सन्धिः हल्सन्धिरुच्यते। हलः हलि परे केषुचित् स्वरेषु परेषु सत्सु हल्-सन्धिः भवति। हल्भिः सह अचां हलां च मेलनेन यः विकारः उत्पद्यते सः हल्-सन्धिः उच्यते।

### श्चुत्वसन्धिः

**स्तोः श्चुना श्चुः** *(८.४.४०)*

**पदविभागः -** स्तोः (षष्ठ्येकवचनम्), श्चुना (तृतीयैवचनम्), श्चुः (प्रथमैकवचनम्)। त्रिपदं सूत्रमिदम्।

**वृत्तिः -** सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः। रामश्शेते। रामश्चिनोति। सच्चित्। शार्ङ्गिञ्जय।

| स्थानी | स् | त् | थ् | द् | ध् | न् |
|---|---|---|---|---|---|---|
| आदेशः | श् | च् | छ् | ज् | झ् | ञ् |

**उदाहरणानि -** (क) रामस् + शेते = रामश्शेते (ख) सत् + चरित्रम् = सच्चरित्रम्

(ग) उद् + ज्वलम् = उज्ज्वलम् (घ) शार्ङ्गिन् + जय = शार्ङ्गिञ्जय

(ङ) तपस् + चर्या = तपश्चर्या

### ष्टुत्वसन्धिः

**ष्टुना ष्टुः** *(८.४.४१)*

**पदविभागः -** ष्टुना (तृतीयैकवचनम्), ष्टुः (प्रथमैकवचनम्)।

**वृत्तिः -** स्तोः ष्टुना योगे ष्टुः स्यात्। रामष्षष्ठः। रामष्टीकते। पेष्टा। तट्टीका। चक्रिण्ढौकसे।

| स्थानी | स् | त् | थ् | द् | ध् | न् |
|---|---|---|---|---|---|---|
| आदेशः | ष् | ट् | ठ् | ड् | ढ् | ण् |

**उदाहरणानि -** (क) बालस् + षष्ठः = बालष्षष्ठः (ख) बृहत् + टीका = बृहट्टीका

(ग) आकृष् + तः = आकृष्टः (घ) षण् + नगर्यः = षण्णगर्यः

(ङ) उद् + डयनम् = उड्डयनम् (च) चक्रिन् + ढौकसे = चक्रिण्ढौकसे

## जश्त्वसन्धिः

**झलां जशोऽन्ते** *(पा.सू. ८.२.३९)*

**पदविभागः -** झलाम् (षष्ठीबहुवचनम्), जशः (प्रथमाबहुवचनम्), अन्ते (सप्तम्येकवचनम्) इति। त्रिपदात्मकं सूत्रम्।

**वृत्तिः -** पदान्ते झलां जशः स्युः। वागीशः।

**उदाहरणम् -** वागीशः

वाक् + ईशः

वा + ग् + ईशः = वागीशः(क् = ग्)

झलां स्थाने जशः आदेशाः एवं भवन्ति।

| झलः | स्थानम् | आदेशाः(जश्) |
|---|---|---|
| क्, ख्, ग्, घ्, ह् | कण्ठः | ग् |
| च्, छ्, ज्, झ्, श् | तालु | ज् |
| ट्, ठ्, ड्, ढ्, ष् | मूर्धा | ड् |
| त्, थ्, द्, ध्, स् | दन्तः | द् |
| प्, फ्, ब्, भ् | ओष्ठौ | ब् |

**अन्यानि उदाहरणानि -** सुप् +अन्तः = सुबन्तः(प् = ब्), जगत् + ईशः = जगदीशः(त् = द्), अच् + अन्तः = अजन्तः(च् = ज्), षट् + अङ्गानि = षडङ्गानि(ट् = ड्), विराष् + अस्ति = विराडस्ति (ष् = ड्), षष् + दर्शनानि = षड्दर्शनानि (ष् = ड्)

## अनुनासिकसन्धिः

**यरोऽनुनासिकेऽनुनासिको वा** *(पा.सू. ८.४.४५)*

**पदविभागः -** यरः (षष्ठ्येकवचनम्), अनुनासिके (सप्तम्येकवचनम्), अनुनासिकः (प्रथमैकवचनम्), वा (अव्ययम्) इति। चतुष्पदात्मकं सूत्रम्।

**वृत्तिः -** यरः पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात्। एतन्मुरारिः, एतद् मुरारिः। 'प्रत्यये भाषायां नित्यम्' (वार्तिकम्)। तन्मात्रम्। चिन्मयम्।

(१) यर् प्रत्याहारः - य, व, र्, ल्, ञ, म, ङ्, ण, न, झ, भ, घ, ढ्, घ, ज, ब, ग, ड्, द्, ख, फ, छ्, ठ्, थ, च, ट्, त, क्, प, श, ष, स्

(२) अनुनासिकाः वर्णाः - ञ, म, ङ्, ण, न, म्

**उदाहरणानि -** एतन्मुरारिः = एतद् + मुरारिः = एतन् मुरारिः(द् = न्) = एतन्मुरारिः/एतद् मुरारिः।

स्वाध्यायाद् + मा प्रमदः = स्वाध्यायान्मा प्रमदः(द् = न्)

वाक् + मुखम् = वाङ्मुखम् (क् = ङ्) / वाग् मुखम्

षड् + मासाः = षण्मासाः(ड् = ण्) / षड् मासाः

भगवत् + नाम = भगवन्नाम(त् = न्) / भगवद् नाम

अप् + मग्नः = अम्मग्नः(प् = म्) / अब् मग्नः

**प्रत्यये भाषायां नित्यम्** *(वार्तिकम्)* **-**

पदान्तस्य यरः अनुनासिकादिप्रत्यये परे नित्यम् अनुनासिकः आदेशः भवति।

**उदाहरणानि -** वाक् + मयम् = वाङ्मयम्, चिद् + मयम् = चिन्मयम्,

तद् + मात्रम् = तन्मात्रम्, अप् + मयम् = अम्मयम्।

## चर्त्वसन्धिः

**खरि च** *(पा.सू. ८.४.५५)*

**पदविभागः -** खरि (सप्तम्येकवचनम्), च (अव्ययम्)। द्विपदात्मकं सूत्रमिदम्।

**वृत्तिः -** खरि झलां चरः स्युः। इत्युदो दस्य तः। उत्थानम्। उत्तम्भनम्। शकार-षकार-सकाराणां चर्त्वे कृते तत्स्थाने स एव वर्णः विधीयते।

| स्थानी | आदेशः | निमित्तम् | उदाहरणम् |
|---|---|---|---|
| क, ख, ग, घ | क | खरि परे | दिक्पालः |
| च, छ, ज, झ | च | खरि परे | तच्छिवः |
| ट, ठ, ड, ढ | ट | खरि परे | षड्कु |
| त, थ, द, ध | त | खरि परे | रुणत्सि |

| प, फ, ब, भ | प | खरि परे | लप्स्यते |
|---|---|---|---|

**उदाहरणानि -**

(क) सद् + कारः = सत्कारः (द् = त्)

(ख) वाग् + पटुः = वाक्पटुः (ग् = क्)

(ग) तज् + श्लोकः = तच्छ्लोकः (ज् = च्)

(घ) विराड् + पुरुषः = विराट् पुरुषः (ड् = ट्)

(ङ) आरभ् + स्यते = आरप्स्यते (भ् = प्)

## छत्वसन्धिः

**शश्छोऽटि** *(पा.सू. ८.४.६३)*

**पदविभागः -** शः(षष्ठ्येकवचनम्), छः(प्रथमैकवचनम्), अटि (सप्तम्येकवचनम्)।

**वृत्तिः -** झयः परस्य शस्य छो वाऽटि। तद् शिव इत्यत्र दस्य श्चुत्वेन जकारे कृते खरि चेति जकारस्य चकारः। तच्छिवः, तच्शिवः। छत्वममीति वाच्यम् (वार्तिकम्)। तच्छ्लोकेन।

| स्थानी | आदेशः | निमित्तम् |
|---|---|---|
| श् | छ् | अटि परे |

**उदाहरणानि -**

१. तद् + शिवः = तज् + शिवः = तच् + शिवः = तच्छिवः/तच्शिवः (श् = छ)

२. बृहद् + शक्तिः = बृहज् + शक्तिः = बृहच् + शक्तिः = बृहच्छक्तिः/बृहच्शक्तिः।

३. तत् + शास्त्रम् = तद् + शास्त्रम् = तज् + शास्त्रम् = तच्छास्त्रम्/तच्शास्त्रम्।

## अनुस्वारसन्धिः

**मोऽनुस्वारः** *(८.३.२३)*

**पदविभागः -** मः (षष्ठ्येकवचनम्), अनुस्वारः (प्रथमैकवचनम्) इति। द्विपदं सूत्रम्।

**वृत्तिः -** मान्तस्य पदस्याऽनुस्वारः स्याद्धलि। हरिं वन्दे। पदस्येति किम्? गम्यते।

**उदाहरणानि -** हरिम् + वन्दे = हरिं वन्दे (म् = अं)

अहम् + वदामि = अहं वदामि

वेदवाक्यम् + शृण्वन्तु = वेदवाक्यं शृण्वन्तु।

सत्यम् + वद् = सत्यं वद्

वाणीम् + वन्दे = वाणीं वन्दे

वीणाम् + वादयति = वीणां वादयति

**नश्चापदान्तस्य झलि** *(८.३.२४)*

**पदविभागः -** नः (षष्ठ्येकवचनम्), च (अव्ययम्), अपदान्तस्य (षष्ठ्येकवचनम्), झलि (सप्तम्येकवचनम्) इति। चतुष्पदं सूत्रम्।

**वृत्तिः -** नस्य मस्य च पदान्तस्य झल्यनुस्वारः स्यात्। यशांसि। आक्रंस्यते। झलि किम् ? मन्यते।

**उदाहरणानि -** यशान् + सि = यशांसि (न् = अं), (म् = न्),

आक्रम् + स्यते = आक्रंस्यते (म् = अं), सरान् + सि = सरांसि(न् = अं),

सङ्क्रम् + स्यते = सङ्क्रंस्यते (म् + अं)

## परसवर्णसन्धिः

**अनुस्वारस्य ययि परसवर्णः** *(८.४.५८)*

**पदविभागः -** अनुस्वारस्य (षष्ठ्येकवचनम्), ययि (सप्तम्येकवचनम्), परसवर्णः (प्रथमैकवचनम्) इति। त्रिपदात्मकं सूत्रम्।

**वृत्तिः -** अनुस्वारस्य ययि परसवर्णः स्यात्। अङ्कितः। अञ्चितः। कुण्ठितः। शान्तः। गुम्फितः।

**उदाहरणानि -** अन् + कितः = अं + कितः = अङ्कितः (न् + अं = ङ्)

सिन् + चति = सिं + चति = सिञ्चति (न् = अं = ञ्)

लुन् + ठनम् = लुं + ठनम् = लुण्ठनम् (न् = अं = ण्)

शाम् + तिः = शां + तिः = शान्तिः (म् = अं = न्)

कम् + पते = कं + पते = कम्पते (म् = अं = म्)

## ङमुडागमसन्धिः

**ङमो ह्रस्वादचि ङमुण् नित्यम्** *(पा.सू. ८.४.५५)*

**पदविभागः -** ङमः (पञ्चम्येकवचनम्), ह्रस्वाद् (पञ्चम्येकवचनम्), अचि (सप्तम्येकवचनम्), ङमुट् (प्रथमैकवचनम्), नित्यम् (द्वितीयैकवचनम्)। पञ्चपदं सूत्रमिदम्।

**वृत्तिः -** ह्रस्वात्परो यो ङम्, तदन्तं यत्पदं तस्मात्परस्याचो ङमुट्। प्रत्यङ्ङात्मा। सुगण्णीशः। सन्नच्युतः।

**उदाहरणानि -**

१. प्रत्यङ् + आत्मा = प्रत्य + ङ् + ङ् + आत्मा = प्रत्यङ्ङात्मा

२. सुगण् + ईशः = सुग् + ण् + ण् + ईशः = सुगण्णीशः

३. सर्वस्मिन् + अपि = सर्वस्मिन् + न् + अपि = सर्वस्मिन्नपि

४. पचन् + अस्ति = पचन् + न् + अस्ति = पचन्नस्ति

५. कस्मिन् + इह - कस्मिन् + न् + इह = कस्मिन्निह

६. गच्छन् + एषः = गच्छन् + न् + एषः = गच्छन्नेषः

७. पचन् + ओदनम् = पचन् + न् + ओदनम् = पचन्नोदनम्

८. भगवन् + ऐमि(आङ्+एमि) = भगवन् + न् + ऐमि = भगवन्नैमि

९. कस्मिन् + औषधे = कस्मिन् + न् + औषधे = कस्मिन्नौषधे

**नश्छव्यप्रशान्** *(पा.सू. ८.३.७)*

**पदविभागः -** नः (षष्ठ्येकवचनम्), छवि (सप्तम्येकवचनम्), अप्रशान् (प्रथमैकवचनम्)। त्रिपदं सूत्रमिदम्।

**वृत्तिः -** अम्परे छवि नकारान्तस्य पदस्य रुः स्यान्न तु प्रशान्शब्दस्य।

**अत्रानुनासिकः पूर्वस्य तु वा** *(पा.सू ८.३.२)*

**पदविभागः -** अत्र (अव्ययम्), अनुनासिकः (प्रथमैकवचनम्), पूर्वस्य (षष्ठ्येकवचनम्), तु (अव्ययम्), वा (अव्ययम्)। पञ्चपदमिदं सूत्रम्।

**वृत्तिः -** अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा।

**अनुनासिकात् परोऽनुस्वारः** *(पा.सू ८.३.४)*

**पदविभागः -** अनुनासिकात् (पञ्चम्येकवचनम्), परः (प्रथमैकवचनम्), अनुस्वारः (प्रथमैकवचनम्)। त्रिपदमिदं सूत्रम्।

**वृत्तिः -** अनुनासिकं विहाय रोः पूर्वस्मात्परोऽनुस्वारागमः।

**खरवसानयोर्विसर्जनीयः** *(पा.सू ८.३.१५)*

**पदविभागः -** खरवसानयोः (सप्तमीद्विवचनम्), विसर्जनीयः (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** खरि अवसाने च पदान्तस्य रेफस्य विसर्गः। संपुंकानां सो वक्तव्यः (वार्तिकम्)। सँस्स्कर्ता। संस्स्कर्ता।

**उदाहरणानि -** १. तान् + छात्रान् = तार्(रु)+ छात्रान् = तांर्/ताँर् + छात्रान् = तांश्छात्रान्/ताँश्छात्रान्।

२. भवान् + चिनोतु = भवाँश्चिनोतु/भवांश्चिनोतु

३. दुर्जनान् + त्यजेत् = दुर्जनाँस्त्यजेत्/दुर्जनांस्त्यजेत्

४. कस्मिन् + चित् = कस्मिंश्चित्/कस्मिँश्चित्

५. पतन् + तरुः = पतंस्तरुः/पतँस्तरुः

६. चक्रिन् + त्रायस्व = चक्रिंस्त्रायस्व/चक्रिँस्त्रायस्व

## शब्दार्थाः

| | |
|---|---|
| रामश्शेते | रामः शयनं करोति |
| शार्ङ्गिञ्जय | हे विष्णो ! त्वं जय |
| तपश्चर्या | तपस्या |
| बालष्षष्ठः | षष्ठः बालकः |
| षण्णगर्यः | षड् नगर्यः |
| उड्डयनम् | नभोगतिः |
| दिक्पालः | दिशां रक्षकः |
| प्रत्यङ्ङात्मा | अन्तरात्मा |
| सुगण्णीशः | सुष्ठु गणकस्य प्रभुः/सुष्ठु गणकः ईश्वरः |
| पचन्नस्ति | पाकं कुर्वन्नस्ति |
| ऐमि | आगच्छामि |

| | |
|---|---|
| गच्छन्नेषः | एषः गच्छन् अस्ति |
| आक्रंस्यते | उदेष्यति |
| अम्मग्नः | अप्सु मग्नः |
| यशांसि | कीर्त्तयः |
| सङ्गंस्यते | सम्भूय गमिष्यति |
| सरांसि | तडागाः |
| सिञ्चति | सिञ्चनं करोति |
| अङ्कितः | चिह्नितः |

## अभ्यासः

१. **उच्चारणं कुरुत -**

अङ्कितः, षण्णवतिः, विराडस्ति, षण्मासाः, सङ्गंस्यते, यरोऽनुनासिकेऽनुनासिको वा, स्वाध्यायान्मा प्रमदः, नश्चापदान्तस्य झलि, रामश्शेते, बालष्षष्ठः, ङमुण्नित्यम्, शार्ङ्गिञ्जय, प्रत्यङ्ङात्मा, सुगण्णीशः, गच्छन्नेषः, भगवन्नौमि, दुर्जनांस्त्यजेत्, ताँश्छात्रान्।

२. **प्रश्नानाम् उत्तराणि लिखत -**

(क) सकारस्य स्थाने शकारः केन सूत्रेण भवति ?

(ख) ष्टुत्वं केन सूत्रेण भवति ?

(ग) केन सूत्रेण झल्-वर्णस्य स्थाने चर्-वर्णाः भवन्ति ?

(घ) ङमुट्-पदस्य कोऽर्थः ?

(ङ) 'शार्ङ्गिञ्जय' इति कस्य सूत्रस्योदाहरणम् ?

(च) पदान्ते झलः स्थाने किं भवति ?

(छ) मोऽनुस्वारः इत्यस्य उदाहरणं लिखत।

(ज) सिञ्चति इत्यत्र केन सूत्रेण सन्धिः भवति।

(झ) मकारस्य स्थाने अनुस्वारः कदा भवति ?

(ञ) मोऽनुस्वारः इति सूत्रस्य पञ्च उदाहरणानि लिखत।

### ३. वैकल्पिकाः प्रश्नाः -

(क) 'स्तोः श्चुना श्चुः' इति सूत्रस्य उदाहरणम् अस्ति -

(अ) बालष्षष्ठः (आ) सत्कारः

(इ) उज्ज्वलम् (ई) कोऽपि न

(ख) 'ष्टुना ष्टुः' इति सूत्रेण भवति -

(अ) श्चुत्वम् (आ) ष्टुत्वम्

(इ) जश्त्वम् (ई) चर्त्वम्

(ग) पचन्नस्ति इत्युदाहरणं कस्य सूत्रस्य ?

(अ) स्तोः श्चुना श्चुः (आ) ष्टुना ष्टुः

(इ) ङमो ह्रस्वादचि ङमुण् नित्यम् (ई) खरि च

(घ) दुर्जनांस्त्यजेत् इति कस्योदाहरणम् ?

(अ) खरि च (आ) शश्छोऽटि

(इ) समः सुटि (ई) नश्छव्यप्रशान्

(ङ) अत्र शश्छोऽटि इत्यस्य उदाहरणं नास्ति।

(अ) तच्छक्तिः (आ) तच्छिष्यः

(इ) भवाँश्चिनोतु (ई) तच्छयनम्

(च) पदान्ते झलः स्थाने कः आदेशः भवति ?

(अ) यण् (आ) खर्

(इ) जश् (ई) अच्

(छ) मोऽनुस्वारः इत्यस्योदाहरणं भवति -

(अ) सरस्वतीं वन्दे (आ) कम्पते

(इ) तन्मात्रम् (ई) शान्तः

(ज) 'षण्मासाः' इत्युदाहरणं कस्य सूत्रस्य ?

(अ) मोऽनुस्वारः (आ) नश्चापदान्तस्य झलि

(इ) यरोऽनुनासिकेऽनुनासिको वा (ई) प्रत्यये भाषायां नित्यम्

## ४. रिक्तस्थानानि पूरयत -

(क) .................. श्चुः।

(ख) .................. ङमुण् नित्यम्।

(ग) .................. विसर्जनीयः।

(घ) .................. पूर्वस्य .................. वा।

(ङ) नश् ..................।

(च) पदान्ते विद्यमानस्य झल्-वर्णस्य स्थाने .................. आदेशः भवति।

(छ) आक्रंस्यते इति .................. इति सूत्रस्योदाहरणम्।

(ज) यरोऽनु .................. सिक्तो वा।

(झ) .................. ययि परसवर्णः।

## ५. अधोलिखितानां पदानां सन्धिविच्छेदं सन्धिं वा कुरुत -

| | |
|---|---|
| (क) सच्चरित्रम् | ...........+...........। |
| (ख) विपद् + कालः | ........................। |
| (ग) आकृष्टः | ...........+...........। |
| (घ) रामस् + शेते | ........................। |
| (ङ) विराट्पुरुषः | ...........+...........। |
| (च) उद् + पतति | ........................। |
| (छ) सुगण्णीशः | ...........+...........। |
| (ज) प्रत्यङ् + आत्मा | ........................। |
| (झ) तच्छङ्करः | ...........+...........। |
| (ञ) तान् + छात्रान् | ........................। |

## ६. (क) भागस्थपदैः सह (ख) भागस्थानां समानसन्धिमेलनं क्रियताम् -

| (क) | (ख) |
|---|---|
| (क) दिक्पालः | (क) रामश्शेते |
| (ख) सर्वस्मिन्नपि | (ख) उड्डयनम् |
| (ग) आकृष्टः | (ग) शार्ङ्गिञ्जयः |

(घ) तपश्चर्या

(ङ) उज्ज्वलम्

(घ) कस्मिन्निह

(ङ) सत्कारः

७. **अधोलिखितसूत्राणां कार्यनिर्देशनपुरस्सरम् उदाहरणं लिखत -**

यथा - इको यणचि - यण्-विधायकं सूत्रम्। उदाहरणम् - करोम्यहम्।

| | सूत्रनियमः | उदाहरणम् |
|---|---|---|
| (क) अदेङ्गुणः | .................. | .................. |
| (ख) वृद्धिरेचि | .................. | .................. |
| (ग) मोऽनुस्वारः | .................. | .................. |
| (घ) स्तोः श्चुना श्चुः | .................. | .................. |
| (ङ) झलां जशोऽन्ते | .................. | .................. |
| (च) खरि च | .................. | .................. |
| (छ) ङमो ह्रस्वादचि ङमुण् नित्यम् | .................. | .................. |

## योग्यता-विस्तारः

### हल्सन्धिः

| सूत्राणि | सन्धिकार्यम् | उदाहरणम् |
|---|---|---|
| स्तोः श्चुना श्चुः | श्चुत्वसन्धिः | रामश्शेते, रामश्चिनोति, सच्चित् |
| ष्टुना ष्टुः | ष्टुत्वसन्धिः | रामष्षष्ठः, रामष्टीकते, तट्टीका |
| झलां जशोऽन्ते | जश्त्वसन्धिः | वागीशः, सुबन्तम् |
| यरोऽनुनासिकेऽनुनासिको वा | अनुनासिकसन्धिः | एतन्मुरारिः, तन्मात्रम्, चिन्मयम् |
| खरि च | चर्त्वसन्धिः | उत्थानम्, लप्स्यते, सत्कारः |
| शश्छोऽटि | छत्वसन्धिः | तच्छिवः |
| मोऽनुस्वारः | पदान्त-अनुस्वारसन्धिः | हरिं वन्दे |
| नश्चापदान्तस्य झलि | अपदान्त-अनुस्वारसन्धिः | यशांसि, आक्रंस्यते |
| वा पदान्तस्य | पदान्त-परसवर्णसन्धिः | त्वङ्करोषि, त्वं करोषि |
| अनुस्वारस्य ययि परसवर्णः | अपदान्त-परसवर्णसन्धिः | शान्तः, गङ्गा |

| | | |
|---|---|---|
| ङमो ह्रस्वादचि ङमुण्नित्यम् | ङमुडागमसन्धिः | सुगण्णीशः, सन्नच्युतः |
| डः सि धुट् | धुडागमसन्धिः | षट्त्सन्तः |
| नश्छव्यप्रशान् | अनुनासिक-अनुस्वारसन्धिः | चक्रिंत्रायस्व, चक्रिँत्रायस्व |

# नवमः पाठः

## पुत्रीं रक्ष, पुत्रीं पाठय

(ग्रीष्मकालस्य अवकाशे पितृगृहं प्राप्तवत्याः लतायाः सर्वे प्रसन्नमनसा स्वागतं कुर्वन्ति। तत्र लतायाः भ्रातृजाया खिन्ना प्रतिभाति।)

लता - भ्रातृजाये ! चिन्तिता असि वा ? सर्वं कुशलं खलु ?

दीक्षा - आम्। लते ! कुशलिनी अहम्। तव कृते किम् आनयामि, शीतपेयम् उत चायम् ?

लता - इदानीम् अहं किमपि नेच्छामि। रात्रौ सर्वैः सह भोजनमेव करिष्यामि।

(रात्रौ भोजनसमये लता दीक्षां अवलोकयति, तस्याः मनोदशा सम्यक् न प्रतिभाति स्म, अतः सा तूष्णीमेव अतिष्ठत्।)

दिनेशः - भगिनि ! दिष्ट्या त्वं समागता। मम कार्यालये एका महत्त्वपूर्णा संगोष्ठी सहसैव सम्पादनीया वर्तते। अद्यैव त्वं दीक्षां वैद्यालयं नयेः, तत्र दीक्षायाः चिकित्सिकया सह मेलनस्य समयः निर्धारितः अस्ति, तस्याः परामर्शानुसारं यद् विधेयं तत् सम्पादय।

लता - किमभवत् ? भ्रातृजायायाः स्वास्थ्यं समीचीनं नास्ति किम् ? अहं तु ह्यः प्रभृति तां पौनःपुन्येन पश्यामि परन्तु सा स्वस्था न प्रतिभाति।

दिनेशः - चिन्तायाः विषयो नास्ति। त्वं दीक्षां नय। मार्गे सा त्वां सर्वं ज्ञापयिष्यति।

(दीक्षा लता च चिकित्सिकां प्रति गच्छन्त्यौ वार्तां कुरुतः)

लता - भ्रातृजाये ? किमभवत् ? का समस्याऽस्ति ?

दीक्षा - लते ! अहं मासत्रयस्य गर्भं स्वकुक्षौ धारयामि। तव भ्रातुः आग्रहः अस्ति यत् अहं लिङ्गपरीक्षणं कारयेयम्। कुक्षौ कन्या अस्ति चेत् गर्भं पातयेयम्। अहं अतीव खिन्ना उद्विग्ना चास्मि, किन्तु तव भ्राता मम वचनं न शृणोति एव।

लता - अहो ! भ्राता एवं चिन्तयितुम् अपि कथं प्रभवति ? आश्चर्यमिदम् ? शिशुः कन्याऽस्ति चेत् वधार्हा ? जघन्यं इदं कृत्यम्। कथं विरोधं नाकरोः ? सः तव शरीरे स्थितम् शिशुं मारयितुं चिन्तयति, तथापि त्वं मौनं तिष्ठसि ? अधुना एव

गृहं चल, नास्ति आवश्यकता भ्रूणपरीक्षणस्य। भ्राता यदा गृहम् आगमिष्यति, तदा अहं सम्भाषिष्ये।

(सन्ध्यायां लतायाः भ्राता आगत्य पाणिपादं प्रक्षाल्य वस्त्राणि च परिवर्त्य पूजाप्रकोष्ठं गत्वा दीपं प्रज्वलयति भगवत्याः स्तुतिं चापि करोति। तदनन्तरं चायपानार्थं सर्वेऽपि सम्मिलिता भवन्ति।)

दिनेशः - दीक्षे ! त्वं चिकित्सिकां प्रति गतवती आसीः ? किम् अकथयत् सा ?

(दीक्षा तूष्णीं तिष्ठति। तदैव क्रीडन्ती त्रिवर्षीया पुत्री पुष्पा पितुः अङ्के उपविशति तस्मात् चाकलेहं च याचते। दिनेशः बालिकां लालयति चाकलेहं प्रदाय तां क्रोडात् अवतारयति। पुनः दीक्षां पृच्छति। लता एतत् सर्वं श्रुत्वा उत्तरं ददाति।)

लताः - भोः भ्रातः ! त्वं किं ज्ञातुमिच्छसि ? तस्याः कुक्षौ पुत्री अस्ति वा पुत्रः ? किमर्थम् ? षण्मासानन्तरं सर्वं स्पष्टं भविष्यति, समयात् पूर्वं किमर्थम् एतादृशः आयासः ?

दिनेशः - भगिनि ! त्वं तु जानास्येव, अस्माकं गृहे पुष्पा पुत्रीरूपेण अस्त्येव अधुना एकस्य पुत्रस्य आवश्यकता अस्ति तर्हि ........

लता - तर्हि कुक्षौ पुत्री अस्ति चेत् हन्तव्या ? (उच्चैः) भ्रूणहत्यायाः पापं कर्तुं प्रवृत्तोऽसि त्वम्।

दिनेशः - हननं तु न .........

लता - तर्हि घृणितं कृत्यमिदं किमस्ति ? सर्वं विस्मृतवान्, अस्माकं जनकः कदापि पुत्रीपुत्रयोः भेदं न कृतवान् सः सर्वदा एव मनुस्मृतेः इमां पंक्तिं वदति स्म -

**"आत्मा वै जायते पुत्रः पुत्रेण दुहिता समा"**

त्वं प्रातः सायं देव्याः स्तुतिं करोषि। एवं सृष्टेः नियमं तिरस्करोषि ? तव मनसि एतादृशः कुत्सितः विचारः आगतः, इदं चिन्तयित्वैव अहं खिन्नास्मि। तव शिक्षा वृथा।

दिनेशः - भगिनि ! विरम विरम अहं ममापराधं ज्ञातवान् लज्जितश्च अस्मि। अद्य प्रभृति कदाऽपि गर्हितं कार्यं स्वप्नेऽपि न चिन्तयिष्यामि। यथा पुष्पा मम

सम्पूर्णस्नेहस्य अधिकारिणी अस्ति, तथैव आगन्ता शिशुः अपि स्नेहाधिकारी भविष्यति पुत्रः भवतु पुत्री वा। अहं स्वगर्हितं चिन्तनं प्रति अनुतापं करोमि, श्लोकोऽयं विस्मृतो मया।

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**
**यत्रैताः न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥**
**मातृवत् परदारेषु परद्रव्येषु लोष्टवत्।**
**आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः।**

*हितोपदेशः*

**अनुव्रतः पितुः पुत्रो माता भवतु सम्मनाः।**
**जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम्॥**

*अथर्ववेद*

**अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते।**
**जननी जन्मभूमिश्च स्वर्गादपि गरीयसी॥**

*वा.रा.*

**नास्ति मातृसमा छाया, नास्ति मातृसमा गतिः।**
**नास्ति मातृसमं त्राणं, नास्ति मातृसमा प्रिया॥**

*महाभारत*

दिनेशः - लते ! त्वं मां सन्मार्गं अदर्शयः। वयसा कनिष्ठाऽपि त्वं मम गुरुरसि।

लता - अलं पश्चात्तापेन। प्रसन्नताया विषयोऽयम् तव मनसः अन्धकारः नष्टः। भ्रातृजाये ! आगच्छ सर्वाः चिन्ताः त्यज, आगन्तुः शिशोः स्वागताय च सन्नद्धो भव। भ्रातः त्वं संकल्पं कुरु - कन्यायाः रक्षणे पालने पोषणे च दत्तचित्तो भविष्यामि इति। **"पुत्रीं रक्ष पुत्रीं पाठय"** इति सर्वकारस्य इमाम् उद्घोषणां वयं सम्भूय सार्थकीं करिष्यामः।

# शब्दार्थाः

| वाञ्छामि | इच्छामि |
|---|---|
| भ्रातृजाया | भ्रातुः भार्या |
| ह्यः | ह्यस्तनं दिनम् |
| साकम् / सार्द्धम् | समम् |
| दिष्ट्या | भाग्येन |
| उभे | उभौ |
| कुक्षौ | गर्भे |
| उद्विग्ना | खिन्ना |
| क्रोडे | अङ्के |
| आयासः | प्रयासः |
| घृणितम् | निन्द्यम् |
| कृत्यम् | कर्म |
| निधाय | संस्थाप्य |
| दुहिता | पुत्री |
| गर्हितम् | कुत्सितम् |
| कनिष्ठा | अनुजा |
| सन्नद्धः | प्रस्तुतः/सज्जः |
| अपगतः | दूरीभूतः |
| सबला | बलयुक्ता |
| पुत्री | सुता |

# अभ्यासः

## १. उच्चारणं कुरुत -

लोष्टवत्, शान्तिवाम्, सर्वास्तत्राफलाः, आश्चर्यमिदम्, षण्मासानन्तरम्, प्रसन्नमनसा, भ्रातृजाया, जन्मभूमिश्च, आत्मा वै जायते पुत्रः पुत्रेण दुहिता समा।

## २. पूर्णवाक्येन उत्तरत-

(क) अवकाशे पितृगृहं का प्राप्नोति ?

(ख) लतायाः भ्रातृजाया कथं प्रतिभाति ?

(ग) दिष्ट्या त्वं समागता इति कः कथयति ?

(घ) दिनेशः सहसैव किं सम्पादयितुमिच्छति ?

(ङ) जघन्यं कृत्यं कः कर्तुमिच्छति ?

## ३. समुचितं मेलयत -

| | |
|---|---|
| (क) मनोदशा | कृत्यम् |
| (ख) महत्त्वपूर्णा | मनसः |
| (ग) क्रीडन्ती | भयहेतुः |
| (घ) जघन्यम् | पुत्री |
| (ङ) अन्धकारः | संगोष्ठी |

## ४. अधोलिखितानि पदानि संयोज्य वाक्यानि लिखत -

(क) ह्यः (ख) कुक्षौ (ग) श्रीरामात् (घ) घृणितम् (ङ) अपगतः
(च) आयासः (छ) वाञ्छामि (ज) अधीते

## ५. रिक्तस्थानं पूरयत -

(क) यत्र नार्यस्तु पूज्यन्ते .................. तत्र देवताः।

(ख) पितुर्दशगुणा ..................।

(ग) मातृवत् .................. परद्रव्येषु लोष्टवत्।

(घ) जननी .................. स्वर्गादपि गरीयसी।

(ङ) नास्ति मातृसमा ..................।

(च) पुत्रीं रक्ष .................. पाठय।

६. **अधोलिखिताभ्यां श्लोकाभ्यां क्रियापदानि चित्वा वाक्यानि लिखत**

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैताः न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥
अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी॥

७. **'पुत्रीं रक्ष पुत्रीं पाठय' इति पाठात् युष्मदस्मच्छब्दयोः रूपाणि चित्वा पृथक् पृथक् लिखत।**

८. **कोष्ठके प्रदत्तेषु पदेषु तृतीयाचतुर्थीविभक्ती प्रयुज्य रिक्तस्थानानि पूरयत -**

(क) प्रह्लादः .................. हरिं भजति। (मुक्तये/मुक्तिं)

(ख) वृद्धः .................. काणः। (चक्षुः/चक्षुषा)

(ग) वयं .................. स्पृहयेम। (वेदेभ्यः/वेदानाम्)

(घ) रामः .................. सह वनं जगाम। (सीतां/सीतया)

(ङ) देवदत्तः .................. शतं धारयति। (मां/मह्यं)

## योग्यता-विस्तारः

प्राचीनकाले नारीणां दशा सुदृढा आसीत्। तस्मिन् काले ब्रह्मवादिन्यः वेदज्ञाऋषिकाः आसन् यथा गार्गी, मैत्रेयी, अरुन्धती, लोपामुद्रा, आरुणी इत्यादयः।

वेदेषु नारीणां स्थानं विशिष्टमासीत्

**जायेदस्तम् जाया एव अस्तं गहमित्यर्थः।** *ऋग्वेद 10.85.46*

मातैव शिशोर्विविधकार्यसम्पादनात् शक्ति-धात्री-जननी-अम्बा-इत्यादिभिः शब्दैः स्तूयते। उक्तञ्च -

**कुक्षौ सन्धारणाद् धात्री जननाज्जननी तथा।**
**अङ्गानां वर्धनादम्बो वीरसूत्वेन वीरसूः॥**
**शिशोः शुश्रूषणाच्छक्तिर्माता स्यान्माननाच्च सा॥**

# दशमः पाठः

# कारकम्

## अपादानकारकम्, अधिकरणकारकम्, उपपदविभक्तिश्च

### अपादानकारकम्

**ध्रुवमपायेऽपादानम्** *(पा.सू. १.४.२४)*

**पदविभागः -** ध्रुवम् (प्रथमैकवचनम्), अपाये (सप्तम्येकवचनम्), अपादानम् (प्रथमैकवचनम्)। त्रिपदं सूत्रमिदम्।

**वृत्तिः -** अपायो विश्लेषः, तस्मिन्साध्ये ध्रुवमवधिभूतं कारकमपादानं स्यात्।

**उदाहरणानि -** (१) वृक्षेभ्यः पत्राणि पतन्ति। (२) वाटिकायाः पुष्पम् आनयति। (३) शिष्यः पाठशालायाः गृहमागच्छति। प्रथमवाक्ये वृक्षः ध्रुवः(स्थिरः), तस्मात् पत्राणि पृथग्भवन्ति, अत्र विभागस्य आश्रयभूतानि भवन्ति पत्राणि।

**अपादाने पञ्चमी** *(पा.सू. २.३.२८)*

**पदविभागः -** अपादाने (सप्तम्येकवचनम्), पञ्चमी (प्रथमैकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** अनुक्तेऽपादाने कारके पञ्चमी स्यात्। ग्रामादायाति। धावतोऽश्वात्पतति। कारकं किम् ? वृक्षस्य पर्णं पतति। जुगुप्साविरामप्रमादार्थानामुपसङ्ख्यानम् (वार्तिकम्)। पापाज्जुगुप्सते, विरमति। धर्मात् प्रमाद्यति।

**उदाहरणानि -** (१) राकेशः ग्रामाद् आयाति। (२) तस्मात् लेखनीं स्वीकुरु। (३) बालिका विद्यालयात् गच्छति। (४) अश्वारोही धावतो अश्वात् पतति। (५) पथिकः माणवकात् पन्थानं पृच्छति।

**भीत्रार्थानां भयहेतुः** *(पा.सू. १.४.२५)*

**पदविभागः -** भीत्रार्थानाम् (षष्ठीबहुवचनम्), भयहेतुः (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** भयार्थानां त्राणार्थानाञ्च प्रयोगे हेतुरपादानं स्यात्। चोराद्बिभेति। चोरात्त्रायते। भयहेतुः किम् ? अरण्य बिभेति त्रायते वा।

**उदाहरणानि -** (१) शिशुः बिडालाद् बिभेति। (२) बालिका तैलपाद् बिभेति। (३) शिष्याः गुरोः बिभ्यति। (४) श्रीरामः ऋषीन् राक्षसेभ्यः अत्रायत। (५) माता अग्नेः शिशुं त्रायते। (६) श्रीकृष्णः कौरवेभ्यः पाण्डवान् रक्षति।

**जुगुप्साविरामप्रमादार्थानामुपसङ्ख्यानम्** *(वार्तिकम्)* - जुगुप्साद्यर्थकधातुभिर्योगे जुगुप्सादि-विषयस्य अपादानं स्यात्। उदाहरणम् - पापाद् जुगुप्सते, पापाद् विरमति, धर्मात् प्रमाद्यति।

**आख्यातोपयोगे** *(पा.सू. १.४.२९)*

**पदविभागः -** आख्याता (प्रथमैकवचनान्तम्), उपयोगे (सप्तम्येकवचनान्तम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** नियमपूर्वकविद्यास्वीकारे वक्ता अपादानसंज्ञः स्यात्। उपाध्यायादधीते। उपयोगे किम् ? नटस्य गाथां श्रृणोति।

**उदाहरणानि -** (क) गुरोः वेदम् अधीते। (ख) पुत्रः पितुः व्याकरणं पठति। (ग) इन्द्रः ब्रह्मणः व्याकरणम् अध्यैत। (घ) पार्वती शिवात् तन्त्रविद्याम् अधीतवती। (ङ) छात्रः शिक्षिकायाः संगणकं शिक्षते।

**पराजेरसोढः** *(पा.सू. १.४.२६)*

**पदविभागः -** पराजेः (षष्ठ्येकवचनम्), असोढः (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** पराजेः प्रयोगेऽसह्योऽर्थोऽपादानं स्यात्। अध्ययनात्पराजयते। ग्लायतीत्यर्थः। असोढः किम् ? शत्रून् पराजयते। अभिभवतीत्यर्थः।

**उदाहरणानि -** (क) बालकः अध्ययनात् पराजयते। (ख) हिडिम्बः भीमात् पराजयत। (ग) कंसः श्रीकृष्णात् पराजयते। (ङ) निन्द्यकर्मणः पराजयते। (च) अन्यायात् पराजयते। (ज) अनादरात् पराजयते।

**भुवः प्रभवः** *(पा.सू. १.४.३१)*

**पदविभागः -** भुवः (षष्ठ्येकवचनम्), प्रभवः (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** भवतेः कर्तुः प्रभवः, तत्कारकमपादानसंज्ञं स्यात्। भवनं भूः। भूकर्तुः प्रभवस्तथा, हिमवतो गङ्गा प्रभवति। तत्र प्रकाशते इत्यर्थः।

**उदाहरणानि -** (क) हिमालयात् गङ्गा प्रभवति। अत्र हिमालयः गङ्गायाः उत्पत्तिस्थानं वर्तते, अतः हिमालयात् इत्यत्र अपादानमभवत्। (ख) अमरकण्टकात् नर्मदा प्रभवति।

**जनिकर्तुः प्रकृतिः** *(पा.सू. १.४.३१)*

**पदविभागः -** जनिकर्तुः (षष्ठ्येकवचनम्), प्रकृतिः (प्रथमैकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** जायमानस्य हेतुरपादानं स्यात्। ब्रह्मणः प्रजाः प्रजायन्ते।

**उदाहरणानि -** ब्रह्मणः प्रजाः प्रजायन्ते। अत्र प्रजानां जननस्य कारणं/हेतुः भवति ब्रह्मा, अतः प्रकृतसूत्रेण अत्र ब्रह्मणः इत्यत्र अपादानकारकं जातम्।

**वारणार्थानामीप्सितः** *(पा.सू. १.४.२७)*

**पदविभागः -** वारणार्थानाम् (षष्ठीबहुवचनम्), ईप्सितः (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** प्रवृत्तिविघातो वारणम्, वारणार्थानां धातूनां प्रयोगे ईप्सितोऽर्थोऽपादानं स्यात्। यवेभ्यो गां वारयति। ईप्सितः किम् ? यवेभ्यो गां वारयति क्षेत्रे।

**उदाहरणानि -** यवेभ्यो गां वारयति। यवेभ्यो गां निवर्तयतीत्यर्थः। गुरुः शिष्यं पापाद् वारयति।

## उपपदविभक्तिः

**अन्यारादितरर्त्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते** *(पा.सू. २.३. २९)*

**पदविभागः -** अन्यारादितरर्त्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते (सप्तम्येकवचनान्तम्)। एकपदमिदं सूत्रम्।

**वृत्तिः -** एतैर्योगे पञ्चमी स्यात्। अन्येत्यर्थग्रहणम्। इतरग्रहणं प्रपञ्चार्थम्। अन्यो भिन्न इतरो वा कृष्णात्। आराद्वनात्। ऋते कृष्णात् पूर्वो ग्रामात्। दिशि दृष्टः शब्दो दिक्शब्दः। तेन सम्प्रति देशकालवृत्तिना योगेऽपि भवति। चैत्रात्पूर्वः फाल्गुनः। अवयववाचियोगे तु न। तस्य परमाम्रेडितम् (सू.) इति निर्देशात्। पूर्वं कायस्य। अञ्चूत्तरपदस्य तु दिक्शब्दत्वेऽपि षष्ठ्यतसर्थ.... (सू.) इति षष्ठीं बाधितुं पृथग्ग्रहणम्। प्राक् प्रत्यग् वा ग्रामात्। आच् - दक्षिणा ग्रामात्। आहि - दक्षिणाहि ग्रामात्। अपादाने पञ्चमी (सू.) इति सूत्रे कार्तिक्याः प्रभृति इति भाष्यप्रयोगात्प्रभृत्यर्थयोगे पञ्चमी। भवात् प्रभृति आरभ्य वा सेव्यो हरिः। अपपरिबहिः (सू.) इति समासविधानाद् ज्ञापकाद्बहिर्योगे पञ्चमी। ग्रामाद्बहिः।

**उदाहरणानि -** (क) कृष्णात् अन्यः बलरामः। (ख) तस्य गृहम् आराद् वनाद् अस्ति। (ग) अर्जुनात् इतरः भीमः। (घ) ज्ञानात् ऋते मुक्तिः नास्ति। (ङ) चैत्रात्

पूर्वः फाल्गुनः। (च) ग्रामात् दक्षिणा क्षेत्रम् अस्ति। (छ) ग्रामात् दक्षिणाहि नदी अस्ति।

## अधिकरणकारकम्

**आधारोऽधिकरणम्** *(पा.सू. १.४.४५)*

**पदविभागः -** आधारः (प्रथमैकवचनम्), अधिकरणम् (प्रथमैकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञः स्यात्।

**सप्तम्यधिकरणे च** *(पा.सू. २.३.३६)*

**पदविभागः -** सप्तमी (प्रथमैकवचनम्), अधिकरणे (सप्तम्येकवचनम्), च (अव्ययम्)। त्रिपदमिदं सूत्रम्।

**वृत्तिः -** अधिकरणे सप्तमी स्यात्। चकारात् दूरान्तिकार्थेभ्यः। औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा। कटे आस्ते। स्थाल्यां पचति। मोक्षे इच्छास्ति। सर्वस्मिन्नात्मास्ति। वनस्य दूरे अन्तिके वा। दूरान्तिकार्थेभ्यः (सू.) इति विभक्तित्रयेण सह चतस्रोऽत्र विभक्तयः फलिताः। विग्रहे इष्टादिभ्यश्च (सू.) इति कर्तरीनिः।

### औपश्लेषिकः -

कटे आस्ते, अर्जुनः रथे उपविशति, माता स्थाल्यां पचति, अरण्ये व्याघ्रः भ्रमति, पाठशालायाम् उपाध्यायः पाठयति। अत्र संयोगसम्बन्धः। अतः अयम् औपश्लेषिकः आधारः।

### वैषयिकः -

मोक्षे इच्छास्ति, वेदाध्ययने रुचिः वर्तते, बालिकायाः गीते आसक्तिः अस्ति, गुरौ श्रद्धा अस्ति। अत्र विषयसम्बन्धः संयोगः। अतोऽयम् वैषयिक आधारः।

### अभिव्यापकः -

संयोगसमवायमूलकः सकलावयवव्याप्तिरूप आधारोऽभिव्यापकः। यथा - सर्वस्मिन् आत्मा अस्ति। तिलेषु तैलम् अस्ति, दध्नि घृतम्, गीतायां ज्ञानमस्ति। सर्वत्राभिव्याप्तम् इत्यर्थः।

**निमित्तात् कर्मयोगे** *(वार्तिकम्)* - कर्मयोगे हेतुवाचकाच्छब्दात् सप्तमी वाच्या इत्यर्थः।

**उदाहरणानि -**

**चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्।**

**केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः॥**

**क्तस्येन्विषयस्य कर्मण्युपसङ्ख्यानम्** *(वार्तिकम्)* -

इन्परकक्तप्रत्ययान्तस्य कर्मणः सप्तमीविभक्तिः स्यात्।

**उदाहरणानि** - अधीती व्याकरणे। अधीती चतुर्षु आम्नायेषु।

**साध्वसाधुप्रयोगे च** *(वार्तिकम्)* - साधुः कृष्णो मातरि। असाधुर्मातुले।

**षष्ठी चानादरे** *(२.३.३८)*

**पदविभागः** - षष्ठी (प्रथमैकवचनम्), च (अव्ययम्), अनादरे (सप्तम्येकवचनम्)। त्रिपदं सूत्रमिदम्।

**वृत्तिः** - अनादराधिक्ये भावलक्षणे षष्ठीसप्तम्यौ स्तः।

**उदाहरणम्** - रुदति रुदतो वा प्राव्राजीत्। रुदन्तं पुत्रादिकमनादृत्य संन्यस्तवानित्यर्थः।

**यस्य च भावेन भावलक्षणम्** *(पा.सू. २.३.३७)*

**पदविभागः** - यस्य (षष्ठ्येकवचनम्), च (अव्ययम्), भावेन (तृतीयैकवचनम्), भावलक्षणम् (प्रथमैकवचनम्)।

**वृत्तिः** - यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी स्यात्। यत्र एकक्रियायाः अनन्तरम् अपरा क्रिया भवति तदा पूर्वक्रियायाः कर्तरि सप्तमीविभक्तिः भवति।

**उदाहरणानि** - (क) गोषु दुह्यमानासु गतः। गोदोहनकाले गतः इत्यर्थः। (ख) सूर्ये अस्तं गते सर्वे ब्रह्मचारिणः सन्ध्यार्थम् अगच्छन्। (ग) गुरौ आगते शिष्याः उत्तिष्ठन्ति।

## शब्दार्थः

| अपायः | विश्लेषः |
|---|---|
| आरात् | समीपम्/दूरम् |
| दक्षिणा | दक्षिणस्यां दिशि |
| दक्षिणाहि | दक्षिणस्यां दिशि |
| दिक्षु | सर्वासु दिक्षु |
| औपश्लेषिकः | उप (समीपे) सम्बन्धः यस्य |
| वैषयिकः | विषयसम्बन्धी |

| | |
|---|---|
| अभिव्यापकः | सकलावयवव्याप्तिः |
| दुह्यमानासु | गोदोहनकालः |
| अनादरः | न आदरः |
| द्वीपिनम् | व्याघ्रम् |
| कुञ्जरम् | करिणम् |
| चमरीम् | धेनुविशेषम् |
| सीम्नि | नाभौ |
| पुष्कलकः | गन्धमृगः |
| मातुले | मातुः भ्रातरि |

## अभ्यासः

१. **उच्चारणं कुरुत -**

भीत्रार्थानां भयहेतुः, आख्यातोपयोगे, पराजेरसोढः, अन्यारादितरर्तेदिक्छब्दाञ्चूत्तर-पदाजाहियुक्ते, अमरकण्टकात्, ध्रुवमपायेऽपादानम्।

२. **एकवाक्येन उत्तरत -**

(क) उपाध्यायात् अधीते इत्यत्र पञ्चमीविभक्तिः केन सूत्रेण ?

(ख) पराजेरसोढः इत्यस्योदाहरणं किम् ?

(ग) कृष्णात् इतरः अत्र पञ्चमी केन सूत्रेण ?

(घ) ब्रह्मणः प्रजाः प्रजायन्ते इति कस्य सूत्रस्योदाहरणम् ?

(ङ) भयार्थानां त्राणार्थकानाञ्च धातूनां प्रयोगे का विभक्ति भवति ?

(च) असाधुर्मातुले कृष्णः इत्यत्र सप्तमीविभक्तिः केन वार्तिकेन ?

(छ) अनादराधिक्ये भावलक्षणे के विभक्ती भवतः ?

३. **पूर्णवाक्येन सर्वान् प्रश्नान् समाधत्त -**

(क) 'भुवः प्रभवः' इति सूत्रस्यार्थम् उदाहरणञ्च लिखत।

(ख) पृथग्विनानानाभिर्योगे का विभक्तिः भवति ?

(ग) अन्यारादि...... इत्यादिसूत्राणामर्थं लिखत ।

(घ) 'गोषु दुह्यमानासु गतः' इत्यत्र केन सूत्रेण का विभक्तिः ?

(ङ) आधाराः कतिधा ? के च ते ?

(च) निमित्तात् कर्मयोगे इत्यस्य उदाहरणानि लिखत।

## ४. कोष्ठके प्रदत्तेषु पदेषु पञ्चमीं सप्तमीञ्च विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत -

(क) ............ अस्तं गते सर्वे ब्रह्मचारिणः सन्ध्यार्थम् अगच्छन्। (सूर्यस्य/सूर्ये/सूर्यात्)

(ख) .................. प्राव्राजीत्। (रुदते/रुदन्तं/रुदति)

(ग) श्रीरामः ऋषीन् .................. अत्रायत। (राक्षसः)

(घ) जननी जन्मभूमिश्च .................. गरीयसी। (स्वर्गम्)

(ङ) पथिकः .................. पन्थानं पृच्छति। (माणवकः)

## ५. रिक्तस्थानं पूरयत -

(क) पृथग्विना ..................।

(ख) अन्यारादितरर्त्ते .................. युक्ते।

(ग) चर्मणि द्वीपिनं हन्ति ..................।

.................. सीम्नि पुष्कलको हतः ॥

(घ) अधीती ............. आम्नायेषु।

(ङ) वारणार्थानां धातूनां प्रयोगे .................. स्यात्।

## ६. अधोलिखितसूत्राणाम् उदाहरणानि मञ्जूषातः चित्वा लिखत -

असज्जनात् कस्य भयं न जायते, शिष्यः अध्ययनात् पराजयते, आसने उपविशति, रामे वनं गते दशरथः प्राणान् तत्याज, कवीनां कविषु वा कालिदासः श्रेष्ठः, उपाध्यायाद् अधीते, केशेषु चमरीं हन्ति।

(क) आधारोऽधिकरणम् ................................।

(ख) भीत्रार्थानां भयहेतुः ................................।

(ग) यस्य च भावेन भावलक्षणम् ......................।

(घ) आख्यातोपयोगे ...................................।

(ङ) यतश्च निर्धारणम् ..................................।

(च) निमित्तात् कर्मयोगे ................................।

(छ) पराजेरसोढः ........................................।

## योग्यताविस्तारः

हेत्वपादानयोः पञ्चमी षष्ठी तु कर्तृकर्मसम्बन्धे।
अधिकरणनिमित्ते सप्तमी स्यात् विषयेऽपि ॥
अपाये यदुदासीनं चलं वा यदि वाऽचलम्।
ध्रुवमेवाऽतदावेशात् तदपादानमुच्यते ॥
पततो ध्रुव एवाऽश्वो यस्मात् पतत्यसौ।
तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमिष्यते ॥
अपादाने ल्यबर्थे च योगे पूर्वादिभिस्तथा।
उत्कर्षे पञ्चमी ज्ञेया हेत्वर्थे तु विभाषया ॥
ऋते विनादिभिर्योगे पञ्चमी च स्मृता बुधैः ॥
आधारे च तथा भावे विभक्तिः सप्तमी भवेत्।
अनादरे च निर्धारे षष्ठी स्यात् सप्तमी तथा ॥
सप्तमी त्रिविधाधाराद् दूरान्तिकार्थोऽपि च।
भावान्तरं यतो लक्ष्यं कर्मयोगे निमित्ततः ॥
रामो राजमणिः सदा विजयते रामं रमेशं भजे।
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः ॥
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहं।
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ॥
कृष्णो रक्षतु मां चराचरगुरुः कृष्णं नमस्याम्यहं।
कृष्णेनाखिलशत्रवो विनिहताः कृष्णाय तस्मैः नमः॥
कृष्णादेव समुत्थितं जगदिदं कृष्णस्य दासोऽस्म्यहम्।
कृष्णे भक्तिरचञ्चलास्तु भगवन् हे कृष्ण तुभ्यं नमः॥
**सङ्गात्स**ञ्जायते कामः **कामात्क्रो**धोऽभिजायते।
**क्रोधाद्भ**वति सम्मोहः **सम्मोहात्स्मृ**तिविभ्रमः ॥

**स्मृतिभ्रंशाद्** बुद्धिनाशो **बुद्धिनाशात्** प्रणश्यति ॥

# एकादशः पाठः

## विसर्गसन्धिः

यत्र विसर्गस्य स्थाने सकाराद्यादेशाः भवन्ति अथवा कस्यचित् स्थाने विसर्गादेशो भवति स एव विसर्गसन्धिः।(विसर्गमाश्रित्य विधीयमानः सन्धिः विसर्गसन्धिः)। विसर्गस्य अष्टविधाः परिणामाः भवन्ति, ते यथा - १. ओकारः २. लोपः ३. शकारः ४. षकारः ५. सकारः ६. रेफः ७. जिह्वामूलीयः ८. उपध्मानीयः।

**ओभावश्च विवृत्तिश्च शसषा रेफ एव च।**
**जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः॥**

**विसर्जनीयस्य सः** *(पा.सू. ८.३.३४)*

**पदविभागः -** विसर्जनीयस्य (षष्ठ्येकवचनम्), सः (प्रथमैकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** खरि परे विसर्गस्य स्थाने सः स्यात्। विष्णुस्त्राता।

**उदाहरणानि -**

| | | | |
|---|---|---|---|
| विष्णुः + त्राता | = | विष्णुस्त्राता | (: = स्) |
| बालः + तत्र | = | बालस्तत्र | (: = स्) |
| रामः + च | = | रामश्च | (: = श्) |
| कृष्णः + छात्र | = | कृष्णश्छात्रः | (: = श्) |
| छात्रः + षष्ठः | = | छात्रष्षष्ठः | (: = ष्) |

**शर्परे विसर्जनीयः** *(पा.सू. ८.३.३५)*

**पदविभागः -** शर्परे (सप्तम्येकवचनम्), विसर्जनीयः (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** शर्परे खरि विसर्जनीयस्य विसर्जनीयः न त्वन्यत्। कः त्सरुः। घनाघनः क्षोभणः। इह यथायथं सत्वं जिह्वामूलीयश्च न।

**उदाहरणम् -** घनाघनः क्षोभणः, पयः क्षीरम्, घृतैः प्सातम्।

**वा शरि** *(पा.सू. ८.३.३६)*

**पदविभागः -** वा (अव्ययम्), शरि (सप्तम्येकवचवनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** शरि परे विसर्जनीयस्य विसर्जनीय एव वा स्यात्। हरिः शेते, हरिश्शेते।

**उदाहरणानि -**

| | | | | | |
|---|---|---|---|---|---|
| हरिः + शेते | = | हरिस् + शेते | = | हरिश्शेते/हरिः शेते | (: = स्) |
| प्रजाभ्यः + स्वस्ति | = | प्रजाभ्यस् + स्वस्ति | = | प्रजाभ्यस्स्वस्ति/प्रजाभ्यः स्वस्ति। | |
| शिष्यः + षष्ठः | = | शिष्यस् + षष्ठः | = | शिष्यष्षष्ठः/ शिष्यः षष्ठः। | |
| विष्णोः + स्तुतिः | = | विष्णोस् + स्तुतिः | = | विष्णोस्स्तुतिः/विष्णोः स्तुतिः। | |

**ससजुषो रुः** *(पा.सू. ८.२.६६)*

**पदविभागः -** ससजुषोः (षष्ठीद्विवचनम्), रुः (प्रथमैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** पदान्तस्य सस्य सजुषश्च रुः स्यात्।

**खरवसानयोर्विसर्जनीयः** *(पा.सू. ८.३.१५)*

**पदविभागः -** खरवसानयोः (सप्तमीद्विवचनम्), विसर्जनीयः (प्रथमैकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** खरि अवसाने च पदान्तस्य रेफस्य विसर्गः।

**उदाहरणम् -** शिशुः पिबति, राम+स् = राम+र् = रामर् = रामः।

**अतो रोरप्लुतादप्लुते** *(पा.सू. ६.१.११३)*

**पदविभागः -** अतः (पञ्चम्येकवचनम्), रोः (षष्ठ्येकवचनम्), अप्लुतात् (पञ्चम्येकवचनम्), अप्लुते (सप्तम्येकवचनम्)। चतुष्पदं सूत्रदमिदम्।

**वृत्तिः -** अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति। शिवोऽर्च्यः।

**उदाहरणानि -** शिवस् + अर्च्यः = शिव रु + अर्च्यः(स् = रु) = शिव उ + अर्च्यः (रु = उ) = शिवो + अर्च्यः (अ+उ = ओ, आद्गुणः) = शिवोऽर्च्यः (ओ + अ = ओ, एङः पदान्तादति) वेदस् + अयम् = वेदरु + अयम् = वेद उ + अयम् = वेदोऽयम्, मन्त्रोऽयम्, श्यामोऽत्र, ग्रन्थोऽस्मिन्, बालकोऽगच्छत्, यज्ञोऽभूत्।

**हशि च** *(पा.सू. ६.१.११४)*

**पदविभागः -** हशि (सप्तम्येकवचनम्), च (अव्ययम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** अप्लुतादतः परस्य रोरुः स्याद्धशि। शिवो वन्द्यः। रोरित्युकारानुबन्धग्रहणान्नेह। प्रातरत्र। भ्रातर्गच्छ। देवास् इह इति स्थिते रुत्वम्।

**उदाहरणानि -** शिवस् + वन्द्यः = शिव रु + वन्द्यः = शिव उ + वन्द्यः = शिवो वन्द्यः (अ+उ = ओ, आद्गुणः) (१) बालो हसति (२) कृष्णो जयति (३) यतो धर्मः (४) ततो जयः (५) मन्त्रो हीनः (६) स्वरतो वर्णतो वा

**भोभगोअघोअपूर्वस्य योऽशि** *(पा.सू. ८.३.१७)*

**पदविभागः -** भोभगोअघोअपूर्वस्य (षष्ठ्येकवचनम्), यः (प्रथमैकवचनम्), अशि (सप्तम्येकवचनम्)। त्रिपदं सूत्रमिदम्।

**वृत्तिः -** भोपूर्वस्य भगोपूर्वस्य अघोपूर्वस्य अवर्णपूर्वस्य रोर्यादेशः स्यात् अशि परे।

**उदाहरणम् -** देवा इह, देवायिह। भोस् भगोस् अघोस् इति सान्ता निपाताः। तेषां रोर्यत्वे कृते।

**हलि सर्वेषाम्** *(पा.सू. ८३२२)*

**पदविभागः -** हलि (सप्तम्येकवचनम्), सर्वेषाम् (षष्ठीबहुवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** भोभगोअघोअपूर्वस्य यस्य लोपः स्याद् हलि।

**उदाहरणानि -** भो देवाः। भगो देवाः। भगो नमस्ते। अघो याहि।

**रोऽसुपि** *(पा.सू.८.२.६९)*

**पदविभागः -** रः (प्रथमैकवचनम्), असुपि (सप्तम्येकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** अह्नो रेफादेशः स्यात् न तु सुपि। रोरपवादः। अहरहः। अहर्गणः। असुपि किम् ? अहोभ्याम्। अत्राहन्निति रुत्वम्। रूपरात्रिरथन्तरेषु रुत्वं वाच्यम् (वार्तिकम्)। अहोरूपम्। गतमहोरात्रिरेषा। एकदेशविकृतस्यानन्यत्वादहोरात्रः। अहोरथन्तरम्। अहरादीनां पत्यादिषु वा रेफः (वार्तिकम्)। विसर्गापवादः। अहर्पतिः गीर्पतिः। धूर्पतिः। पक्षे विसर्गोपध्मानीयौ।

**उदाहरणानि -** अहन् + अहः = अहरु + अहः(न् = रु) = अहरहः।
(१) अहर्गणः (२) अहर्निशम् (३) अहोरात्रः (४) अहर्भाति।

**रो रि** *(पा.सू.८.२.६९)*

**पदविभागः -** रः (षष्ठ्येकवचनम्), रि (सप्तम्येकवचनम्)। द्विपदमिदं सूत्रम्।

**वृत्तिः -** रेफस्य रेफे परे लोपः स्यात्।

**ढ्रलोपे पूर्वस्य दीर्घोऽणः** *(६.३.१११)*

**पदविभागः -** ढ्रलोपे (सप्तम्येकवचनम्), पूर्वस्य (षष्ठ्येकवचनम्), दीर्घः (प्रथमैकवचनम्), अणः (षष्ठ्येकवचनम्)। चतुष्पदं सूत्रमिदम्।

**वृत्तिः -** ढरेफयोर्लोपनिमित्तयोः पूर्वस्याणो दीर्घः। पुनारमते। हरी रम्यः। शम्भू राजते। अणः किम् ? तृढः। वृढः। मनस् रथ इत्यत्र रुत्वे कृते हशि चेत्युत्वे रोरीति लोपे च प्राप्ते।

**उदाहरणानि -** पुनर् + रमते = पुन + रमते (र् = लोपः 'रो रि') = पुना रमते (अ = आ)।

मनस् + रथः = मनरु + रथः = मन उ + रथः = मनोरथः (हशि च)

(१) हरी रम्यः (२) शम्भू राजते (३) विष्णू रक्षति (४) गुरू राति।

**एतत्तदोः सुलोपोऽकोरनञ्समासे हलि** *(पा.सू. ६.१.१६२)*

**पदविभागः -** एतत्तदोः (षष्ठीद्विवचनम्), सुलोपः (प्रथमैकवचनम्), अकोः (षष्ठीद्विवचनम्), अनञ्समासे (सप्तम्येकवचनम्), हलि (सप्तम्येकवचनम्)। पञ्चपदमिदं सूत्रम्।

**वृत्तिः -** अककारयोरेतत्तदोर्यः सुस्तस्य लोपो हलि न तु नञ्समासे। एष विष्णुः। स शम्भुः। अकोः किम् ? एषको रुद्रः। अनञ्समासे किम् ? असः शिवः। हलि किम् ? एषोऽत्र।

**उदाहरणानि -** एषसु + विष्णुः = एष + विष्णुः(सु = लोपः)। (१) स शम्भुः (२) स पठति (३) एष याति (४) एष वासुदेवः (५) एष रक्षकः (६) स लक्ष्मणः।

**सोऽचि लोपे चेत्पादपूरणम्** *(पा.सू. ६.१.१३२)*

**पदविभागः -** सः (प्रथमैकवचनम्, षष्ठ्या विपरिणम्यते), अचि (सप्तम्येकवचनम्), लोपे (सप्तम्येकवचनम्), चेत् (अव्ययम्), पादपूरणम् (प्रथमैकवचनम्)। पञ्चपदं सूत्रमिदम्।

**वृत्तिः -** स इत्यस्य सोर्लोपः स्यादचि पादश्चेल्लोपे सत्येव पूर्येत।

**उदाहरणम् -** सैष दाशरथी रामः सैष राजा युधिष्ठिरः।
सैष कर्णो महादानी सैष भीमो महाबलः॥
सेमामविड्ढि प्रभृतिम्।

# शब्दार्थाः

| | |
|---|---|
| विष्णुस्त्राता | विष्णुः रक्षकः |
| शिवोऽर्च्यः | शिवः अर्चनीयः |
| यज्ञोऽभूत् | यज्ञः अभवत् |
| यतो धर्मः | यत्र धर्मः |
| ततो जयः | तत्र जयः |
| अहरहः | प्रतिदिनम् |
| अहोरात्रः | दिवानिशम् |
| अहर्गणः | अह्नां गणः |
| पुना रमते | पुनः रमणं करोति |
| शम्भू राजते | शम्भुः शोभते |
| मनोरथः | इच्छा |
| गुरू राति | गुरुः ददाति |

# अभ्यासः

१. **उच्चारणं कुरुत -**

बालष्षष्ठः, ढ्लोपे पूर्वस्य दीर्घोऽणः, एतत्तदोः सुलोपोऽकोरनञ्समासे, अतो रोरप्लुतादप्लुते, अहरहः, ससजुषो रुः, शर्परे विसर्जनीयः।

२. **वस्तुनिष्ठप्रश्नाः -**

(क) 'विष्णुस्त्राता' इति पदस्य सन्धिविच्छेदोऽस्ति -

(अ) विष्णुस् + त्राता (आ) विष्णुः + त्राता

(इ) विष्णु + त्राता (ई) विष्णो + त्राता

(ख) 'ससजुषो रुः' इति सूत्रेण आदेशो भवति -

(अ) सः (आ) सजुषः

(इ) रुः (ई) आगमः

(ग) ‘शिवोऽर्च्यः’ इत्यस्य सन्धिविच्छेदोऽस्ति -

(अ) शिवाः + अर्च्यः (आ) शिव + अर्च्यः

(इ) शिवोस् + अर्च्यः (ई) शिवस् + अर्च्यः

(घ) रेफस्य लोपो भवति -

(अ) द्विरेफे (आ) सुपि परे

(इ) रेफे परे (ई) हशि परे

(ङ) ‘मनोरथः’ इत्यत्र सन्धिविच्छेदोऽस्ति -

(अ) मनसा + रथः (आ) मनस् + रथः

(इ) मनो + रथः (ई) मनर् + अथः

(च) ‘हशि च’ इति सूत्रेण किं भवति -

(अ) रकारस्य उकारः (आ) विसर्गस्य उकारः

(इ) सकारस्य उकारः (ई) रकारस्य यकारः

## ३. अधोलिखितानां प्रश्नानाम् उत्तरं लिखत -

(क) ‘विसर्जनीयस्य सः’ इति सूत्रस्योदाहरणं लिखत।

(ख) ‘हशि च’ इति सूत्रस्यार्थं लिखत।

(ग) निम्नाङ्कितपदानां ससूत्रं सिद्धिः कार्या।

हरिः शेते, शिवोऽर्च्यः, अहरहः, पुना रमते।

(घ) अधोलिखितानां पदानां सन्धिं कुरुत।

हरिस् + रम्यः, सस् + शम्भुः, विष्णुः + तिष्ठति

(ङ) ‘हशि च’ इति सूत्रेण अप्लुतात् अकारात् परस्य रकारस्य उकारः कदा भवति ?

(च) विसर्गस्य कति भेदाः वर्तन्ते ?

(छ) गणेशो वन्द्यः इत्यत्र केन सूत्रेण सन्धिः विधीयते ?

(ज) अहर्भाति इत्यत्र केन सूत्रेण सन्धिः जायते ?

## ४. संयोजयत -

| | |
|---|---|
| (क) विसर्जनीयस्य सः | अहरहः। अहर्गणः। |
| (ख) वा शरि | विष्णुस्त्राता |

(ग) हशि च — हरिश्शेते

(घ) रो रि — शिवो वन्द्यः

(ङ) रोऽसुपि — पुना रमते

### ५. अधोलिखितसूत्राणि पूरयत -

(क) अतो रोर ......................।

(ख) ढ्रलोपे ...................... ऽणः।

(ग) शर्परे ..........................।

(घ) एतत्तदोः ...................... हलि।

(ङ) .............................. पादपूरणम् ।

### ६. अधोलिखितसूत्राणां कार्याणाञ्च संयोजनं कुरुत -

(क) विसर्जनीयस्य सः — हरिश्शेते

(ख) ससजुषो रुः — एष विष्णुः

(ग) अतो रोरप्लुतादप्लुते — वेदोऽर्च्यः

(घ) ढ्रलोपे पूर्वस्य दीर्घोऽणः — अन्ताराष्ट्रियः

(ङ) एतत्तदो......हलि — श्यामो वन्द्यः

(च) सोऽचि......पादपूरणम् — रामर्

(छ) वा शरि — विष्णुस्त्राता

(ज) हशि च — सैष राजा युधिष्ठिरः

## योग्यता-विस्तारः

### विसर्गसन्धिबोधकचक्रम्

| पूर्ववर्णः | अ | आ | इ-औ | परवर्णः |
|---|---|---|---|---|
| | (उ) ओ | लोप य | र | अ |
| | लोप | = | = | इ-औ |
| | उ ओ | लोप | = | हश् |
| | ⨯ : | ⨯ : | ⨯ : | क ख |

| | | | | |
|---|---|---|---|---|
| स्थानी स्/र् | श् | श् | श् | च छ |
| | ष् | ष् | ष् | ट् ठ |
| | स् | स् | स् | त थ |
| | × : | × : | × : | प फ |
| | शः | शः | शः | श |
| | षः | षः | षः | ष |
| | सः | सः | सः | स |

## स्थानी स्/र् परवर्णः

| पूर्ववर्णः | अ | आ-औ | ह् श् | क ख | च छ | ट ठ | त थ | प फ | श | ष | स |
|---|---|---|---|---|---|---|---|---|---|---|---|
| अ | उ (ओ) | लोपः | उ (ओ) | × : | श् | ष् | स् | × : | शः | षः | सः |
| आ | लोपः य् | लोपः य | लोप | " | " | " | " | " | " | " | " |
| इ तः ओ पर्यन्तम् | र | र | र | " | " | " | " | " | " | " | " |

## विसर्गसन्धिः

| सूत्राणि | सन्धिकार्यम् | उदाहरणम् |
|---|---|---|
| विसर्जनीयस्य सः | विसर्गस्य स्थाने सकारादेशः | विष्णुस्त्राता |
| वा शरि | विसर्गस्य विकल्पेन विसर्गादेशः | हरिः शेते, हरिश्शेते |
| ससजुषो रुः | सस्य रुः आदेशः | रामर् |
| अतो रोरप्लुतादप्लुते | रोः उः आदेशः | शिवोऽर्च्यः |
| रोऽसुपि | अह्नः रेफादेशः | अहरहः, अहर्गणः |
| रोरि | रेफस्य लोपादेशः | पुना रमते, हरी रम्यः |
| ढ्रलोपे पूर्वस्य दीर्घोऽणः | अणः दीर्घादेशः | पुना रमते, शम्भू राजते, |
| एतत्तदोः.......हलि | सोर्लोपादेशः | एष विष्णुः, स शम्भुः |
| सोऽचि.....पादपूरणम् | सोर्लोपादेशः | सैष दाशरथी रामः |
| हशि च | रोः उः आदेशः | रामो गच्छति |

# द्वादशः पाठः

## उपसर्गाणां परिचयः षष्ठीविभक्तिश्च




**उपसर्गाः क्रियायोगे** *(पा.सू. १.४.५९)*

**वृत्तिः** - प्रादयः क्रियायोगे उपसर्गसंज्ञा स्युः।

उपसर्गाः द्वाविंशतिः सन्ति। ते च - प्र, परा, अप्, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप चैते प्रादयः। उपसर्गः धातोः पूर्वं भवति।

**उपसर्गेण धात्वर्थः बलादन्यत्र नीयते।**
**प्रहाराहारसंहारविहारपरिहारवत्॥**

## उपसर्गनियमाः

१. **उपसर्गः धातोः पूर्वं भवति।**

यथा - आ + गच्छति - **आगच्छति**

२. **उपसर्गेण कदाचिद् धातोः अर्थः परिवर्तते।**

यथा - स्मरति। विस्मरति।

३. **कदाचित् उपसर्गः धातोः अर्थस्य पोषणं करोति।**

यथा - शोभते। सुशोभते।

लिखति। विलिखति।

४. **कदाचित् धातोः पूर्वं द्वित्राः उपसर्गाः अपि भवन्ति।**

यथा - प्रति + आ + गच्छति - प्रत्यागच्छति

निर् + आ + करोति - निराकरोति

सम् + उत् + आ + हरति - समुदाहरति

वि + अव + स्थापयति - व्यवस्थापयति

५. **उपसर्गकारणात् कदाचित् परस्मैपदिधातुः आत्मनेपदिरूपम्, आत्मनेपदिधातुः परस्मैपदिरूपं च प्राप्नोति।**

यथा - (क) वि + जयति (परस्मैपदी) - विजयते (आत्मनेपदी)।

(ख) प्र + तिष्ठति (परस्मैपदी) - प्रतिष्ठते (आत्मनेपदी)।

(ग) वि + क्रीणाति (परस्मैपदी) - विक्रीणीते (आत्मनेपदी)।

(घ) वि + रमते (आत्मनेपदी) - विरमति (परस्मैपदी)

**धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्त्तते।**

**तमेव विशिनष्ट्यन्यः उपसर्गगतिस्त्रिधा॥**

(क) कश्चित् उपसर्गः धात्वर्थं बाधते। गच्छति - आगच्छति

(ख) कश्चिदुपसर्गः धात्वर्थम् अनुवर्त्तते। वदति - अनुवदति

(ग) अन्यः उपसर्गः धात्वर्थं विशेषयति। वदति - प्रवदति।

## (शिक्षकः कक्ष्यां प्रविशति)

सर्वे छात्राः - नमो नमः महोदय !

शिक्षकः - नमो नमः। स्वासने उपविशन्तु।

(सर्वे छात्राः उपविशन्ति)

शिक्षकः - अद्य चैत्रमासस्य शुक्लपक्षस्य नवमी तिथिः अस्ति।

अद्य कस्य प्रसिद्धस्य पुरुषस्य जन्मदिनम् **आ**चरन्ति॥

केशवः - श्रीरामस्य जन्मदिनम् **आ**चरन्ति ?

शिक्षकः - श्रीरामस्य कथा कुत्र वर्णिता अस्ति ?

रमा - वाल्मीकिरामायणे, रामचरितमानसे तथा अन्येषु पुराणग्रन्थेष्वपि **उप**वर्णिता अस्ति।

शिक्षकः - रामायणस्य रचयिता कः ?

| | | |
|---|---|---|
| उमा | - | रामायणस्य रचयिता महर्षिः वाल्मीकिः। |
| शिक्षकः | - | प्रदीप ! श्रीरामः कस्य पुत्रः ? |
| प्रदीपः | - | श्रीरामः अयोध्यायाः राज्ञः दशरथस्य पुत्रोऽस्ति। |
| शिक्षकः | - | दशरथस्य पत्नीनां नामानि कानि ? कृष्ण ! त्वं वद। |
| कृष्णः | - | कौशल्या, सुमित्रा, कैकेयी च। |
| शिक्षकः | - | श्रीरामस्य मातुः नाम किम् ? सुरेश ! त्वं वद। |
| सुरेशः | - | श्रीरामस्य मातुः नाम कौसल्या। |
| शिक्षकः | - | सुमित्राकैकेय्योः पुत्राणां नामानिः कः वदति ? |
| गीता | - | अहं वदामि। सुमित्रायाः पुत्रौ लक्ष्मणः शत्रुघ्नश्च, भरतः कैकेय्याः पुत्रः। |
| शिक्षकः | - | श्रीरामस्य **अनु**गमनं कौ कुरुतः ? |
| लक्ष्मीः | - | श्रीरामस्य **अनु**गमनं सीतालक्ष्मणौ कुरुतः। |
| शिक्षकः | - | सुग्रीवः केषां राजा ? लङ्कायाः **अधि**पतिः कः ? |
| गीता | - | सुग्रीवः वानराणां राजा। लङ्कायाः **अधि**पतिः रावणः। |
| शिक्षकः | - | श्रीरामस्य भार्यायाः नाम किम् ? तां कः **अप**हृतवान् ? |
| केशवः | - | श्रीरामस्य भार्यायाः नाम सीता। तां रावणः **अपा**हरत्। |
| शिक्षकः | - | वने रामं परितः के सन्ति ? |
| लक्ष्मीः | - | वने रामं परितः वानराः सन्ति। |
| शिक्षकः | - | वनवासे भगवान् श्रीरामः चित्रकूटे कति वर्षाणि अयापयत् ? |
| रमाः | - | वनवासे भगवान् श्रीरामः चित्रकूटे द्वादशवर्षाणि अयापयत्। |
| शिक्षकः | - | साधु ! सर्वेऽपि रामायणस्य कथां सम्यक्तया जानन्तु। रामायणस्य ज्ञातारो जनाः रामादिवत् **आ**चरन्ति। उक्तमपि - |
| शिक्षकः | - | रामादिवत् वर्त्तितव्यं न च रावणादिवत्। वाल्मीकिप्रणीतं रामायणं सर्वासु भाषासु समुपलभ्यते। रामकथा **अति**रमणीया वर्तते। सज्जनानां कृते तु रामकथा पराविद्यारूपा अस्ति। |

## षष्ठीविभक्तिः

**षष्ठी शेषे** *(पा.सू. २.३.५०)*

**पदविभागः -** षष्ठी (प्रथमैकवचनम्), शेषे (सप्तम्येकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः, तत्र षष्ठी स्यात्। राज्ञः पुरुषः। कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव। सतां गतम्। सर्पिषो जानीते। मातुः स्मरति। एधोदकस्योपस्कुरुते। भजे शम्भोश्चरणयोः। फलानां तृप्तः।

**उदाहरणानि -** (१) राज्ञः पुरुषः (२) दशरथस्य पुत्रः (३) अस्माकं भारतदेशः (४) अस्माकं संस्कृतिः (५) भारतस्य वैज्ञानिकाः। (६) अस्माकं ज्ञाननिधयः वेदाः।

कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव। (१) मातुः स्मरति। कर्मत्वस्य शेषत्वविवक्षायां मातृसम्बन्धिस्मरणम् इत्यर्थः। अत्र षष्ठी शेषे इति कर्मणः शेषत्वविवक्षायां षष्ठीविभक्तिर्भवति। (२) सतां गतम् (३) सर्पिषो जानीते (४) एधोदकस्योपस्कुरुते (५) भजे शम्भोश्चरणयोः।

**कर्तृकर्मणोः कृति** *(पा.सू. २.३.६५ )*

**पदविभागः -** कर्तृकर्मणोः (सप्तमीद्विवचनम्), कृति (सप्तम्येकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात्। कृष्णस्य कृतिः। जगतः कर्ता कृष्णः। गुणकर्मणि वेष्यते (वार्तिकम्)। नेता अश्वस्य स्रुघ्नस्य स्रुघ्नं वा। कृति किम् ? तद्धिते मा भूत्, कृतपूर्वी कटम्।

**उदाहरणानि -** (क) कृष्णस्य कृतिः। (ख) रामस्य लेखः। (ग) गुरोः आगमनम्। (घ) भोजनस्य परिवेषणम्। (ङ) लोकस्य सर्जकः ब्रह्मा। (च) देव्याः दर्शनम्।

**यतश्च निर्धारणम्** *(पा.सू. २.३.४१)*

**पदविभागः -** यतः (अव्ययम्), च (अव्ययम्), निर्धारणम् (प्रथमैकवचनम्)। त्रिपदमिदं सूत्रम्।

**वृत्तिः -** जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं यतस्ततः षष्ठीसप्तम्यौ स्तः। नृणां नृषु वा ब्राह्मणः श्रेष्ठः। गवां गोषु वा कृष्णा बहुक्षीरा। गच्छतां गच्छत्सु वा धावञ्छीघ्रः। छात्राणां छात्रेषु वा मैत्रः पटुः।

**उदाहरणानि -** (१) शिष्याणाम्/शिष्येषु अर्जुनः श्रेष्ठः। (२) गवां गोषु वा कृष्णा बहुक्षीरा। (३) क्रीडतां/क्रीडत्सु सचिनः प्रवीणः। (४) लिखतां/लिखत्सु व्यासः श्रेष्ठः।

**षष्ठी हेतुप्रयोगे** *(पा.सू. २.३.२३)*

**पदविभागः -** षष्ठी (प्रथमैकवचनम्), हेतुप्रयोगे (सप्तम्येकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात्। अन्नस्य हेतोर्वसति।

**उदाहरणम् -** अन्नस्य हेतोः वसति। अध्ययनस्य हेतोः काश्यां तिष्ठति। वेदाध्ययनस्य हेतोः महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानमधितिष्ठति।

**सर्वनाम्नस्तृतीया च** *(पा.सू. २.३.७३)*

**पदविभागः -** सर्वनाम्नः (षष्ठ्येकवचनम्), तृतीया (प्रथमैकवचनम्), च (अव्ययम्)। त्रिपदमिदं सूत्रम्।

**वृत्तिः -** सर्वनाम्नो हेतुशब्दस्य च प्रयोगे हेतौ द्योत्ये तृतीया स्यात् षष्ठी च। केन हेतुना वसति। कस्य हेतोः। निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम् (वार्तिकम्)। किं निमित्तं वसति, केन निमित्तेन, कस्मै निमित्ताय इत्यादि। एवं किं कारणम्, को हेतुः, किं प्रयोजनम् इत्यादि। प्रायग्रहणादसर्वनाम्नः प्रथमाद्वितीये न स्तः। ज्ञानेन निमित्तेन हरिः सेव्यः, ज्ञानाय निमित्ताय इत्यादि।

**उदाहरणम् -** केन हेतुना वसति। कस्य हेतोः। किं निमित्तं वसति, केन निमित्तेन, कस्मै निमित्ताय। प्रायग्रहणाद् असर्वनाम्नः प्रथमाद्वितीये न स्तः, ज्ञानेन निमित्तेन हरिः सेव्यः, ज्ञानाय निमित्ताय इत्यादि।

**षष्ठ्यतसर्थप्रत्ययेन** *(पा.सू. २.३.३०)*

**पदविभागः -** षष्ठी (प्रथमैकवचनम्), अतसर्थप्रत्ययेन (तृतीयैकवचनम्)। द्विपदं सूत्रमिदम्।

**वृत्तिः -** एतद्योगे षष्ठी स्यात्। दिक्शब्द.... (सू.) इति पञ्चम्याः अपवादः। ग्रामस्य दक्षिणतः पुरः पुरस्ताद् उपरि उपरिष्टात्।

**उदाहरणम् -** दक्षिणतो ग्रामस्य, उत्तरतो वेदपाठशालायाः, पुरस्तात् मन्दिरस्य, उपरि वृक्षस्य, उपरिष्टाद् यानस्य।

**तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्** *(पा.सू. २.३.७२)*

**पदविभागः -** तुल्यार्थैः (तृतीयाबहुवचनम्), अतुलोपमाभ्याम् (तृतीयाद्विवचनम्), तृतीया (प्रथमैकवचनम्), अन्यतरस्याम् (सप्तम्येकवचनम्)। चतुष्पदं सूत्रमिदम्।

**वृत्तिः -** तुल्यार्थैः योगे तृतीया वा स्यात्पक्षे षष्ठी। तुल्यः सदृशः समो वा कृष्णस्य कृष्णेन वा। अतुलोपमाभ्यां किम् ? तुला उपमा वा कृष्णस्य नास्ति।

**उदाहरणम्** - वेदेन वेदस्य वा तुल्यं ज्ञानं नास्ति। अर्जुनस्य अर्जुनेन वा सदृशः अन्यो धनुर्धारी नास्ति।

## शब्दार्थाः

| | |
|---|---|
| उपविशन्तु | उपवेशनं कुर्वन्तु |
| आचर्यते | आचरणं क्रियते |
| अयोध्यायाः | अवधदेशस्य |
| अपहृतवान् | अपहरणं कृतवान् |
| परितः | सर्वतः |
| अयापयत् | यापितवान् |
| लोकेष्वपि | संसारेऽपि |
| दुःसाध्या | दुष्करः |
| लिखताम्/लिखत्सु | लेखकेषु |
| आचरन्ति | व्यवहरन्ति |
| अधिपतिः | कुलपतिः |
| अपाहरत् | अपहृतवान् |
| अयापयत् | यापितवान् |
| पराविद्यारूपा | अलौकिकी विद्या |
| वर्तितव्यम् | भवितव्यम् |

# अभ्यासः

१. **उच्चारणं कुरुत -**

चैत्रमासस्य, शुक्लपक्षस्य, वाल्मीकिरामायणे, पुराणग्रन्थेषु, पत्नीनां, सुमित्रायाः, शत्रुघ्नश्च, कैकेय्याः, सुग्रीवः, लङ्कायाः, अपहृतवान्, द्वादशवर्षाणि, सम्यक्तया, लोकेष्वपि, रामादिवत्, वर्त्तितव्यम्, समुपलभ्यते, असज्जनानां, दुःसाध्या, इन्द्रियाणाम्।

२. **एकवाक्येन उत्तरत -**

(क) रामायणस्य रचयिता कः ?

(ख) रामचरितमानसस्य रचयिता कः ?

(ग) उपसर्गाः कति वर्तन्ते ?

(घ) श्रीरामस्य जन्मदिनं कस्मिन् दिने आचर्यते ?

(ङ) श्रीरामस्य पितुः नाम किम् ?

(च) लोकस्य सर्जकः ब्रह्मा अत्र केन सूत्रेण षष्ठी ?

(छ) अस्माकं वेदः इत्यत्र केन सूत्रेण षष्ठी विभक्तिः ?

(ज) कर्तृकर्मणोः कृति इत्यस्यार्थं लिखत।

३. **अधोलिखितप्रश्नानाम् उत्तरं लिखत -**

(क) आदिकविः कः ?

(ख) अयोध्यानगरी कस्मिन् प्रदेशे अस्ति ?

(ग) दशरथस्य पत्नीनां नामानि कानि ?

(घ) लक्ष्मणस्य मातुः नाम किम् ?

(ङ) कैकय्याः पुत्रस्य नाम किम् ?

(च) वानराणां राजा कः ?

(छ) श्रीरामस्य भार्यायाः नाम किम् ? तां कः अपहृतवान् ?

(ज) रामस्य जन्मदिनं कस्मिन् मासे भवति ?

(झ) वनवासकाले श्रीरामः कति वर्षाणि अयापयत् ?

(ञ) तुल्यार्थे के विभक्ती भवतः ?

## ४. रिक्तस्थानानि पूरयत -

(क) वाल्मीकिरामायणे रामचरितमानसे .................... अस्ति।

(ख) रामस्य भार्या .................... अपहृतवान्।

(ग) .................... द्वादश वर्षाणि अयापयत्।

(घ) रामकथा तु .................... समुपलभ्यते।

(ङ) .................... सरलश्च वर्त्तते।

(च) तुल्यार्थैरतु.....................।

## ५. उचितपदानां सम्मेलनं कुरुत -

| | | |
|---|---|---|
| (क) | रामचरितमानसः | कैकेयी |
| (ख) | रामायणम् | कस्य हेतोः वसति |
| (ग) | रामः | षष्ठ्यतसर्थप्रत्ययेन |
| (घ) | सीता | वाल्मीकिः |
| (ङ) | भरतः | कौसल्या |
| (च) | दक्षिणतो ग्रामस्य | तुलसीदासः |
| (छ) | सर्वनाम्नस्तृतीया च | जनकः |

## ६. पाठेऽस्मिन् समागतानाम् उपसर्गवाक्यानां प्रयोगं कुरुत -

| | | | | |
|---|---|---|---|---|
| **यथा-** | (क) | उपविशन्तु | = | स्व आसने **उपविशन्तु।** |
| | (ख) | प्रविशति | = | ........................................................ |
| | (ग) | उपविशन्ति | = | ........................................................ |
| | (घ) | अपि | = | ........................................................ |
| | (ङ) | जानामि | = | ........................................................ |
| | (च) | अनुगमनम् | = | ........................................................ |
| | (छ) | अधिपतिः | = | ........................................................ |
| | (ज) | परितः | = | ........................................................ |
| | (झ) | अयापयत् | = | ........................................................ |
| | (ञ) | समुपलभ्यते | = | ........................................................ |

## ७. अधोलिखितपदानां सन्धिविच्छेदपूर्वकं सन्धिसूत्राणि लिखत -

| | | सन्धिविच्छेदः | सन्धिसूत्राणि |
|---|---|---|---|
| (क) | सप्तम्येकवचनम् | ------------ + ------------ | ------------------- |
| (ख) | यज्ञासने | ------------ + ------------ | ------------------- |
| (ग) | धात्वर्थः | ------------ + ------------ | ------------------- |
| (घ) | यथोचितम् | ------------ + ------------ | ------------------- |
| (ङ) | छात्रैक्यम् | ------------ + ------------ | ------------------- |
| (च) | सीतैषा | ------------ + ------------ | ------------------- |
| (छ) | विष्णोऽव | ------------ + ------------ | ------------------- |
| (ज) | पुत्रोऽस्ति | ------------ + ------------ | ------------------- |

## ८. उदाहरणानुरूपम् उपसर्गेण वाक्यानि रचयत -

धर्मराजः राजसिंहासनम् **अधितिष्ठति।** (अधि+स्था)

(क) शिष्यः गुरुकुलम् ................................। (उप+वस्)

(ख) सैनिकाः शत्रून् ................................। (सं+हृ)

(ग) उद्याने पुष्पाणि ................................। (सु+शुभ्)

(घ) वेदात् सर्वं ................................। (प्र+सिध्)

(ङ) बालिकाः कक्ष्याम् ................................। (आङ्+गम्)

(च) गङ्गा हिमालयात् ................................। (निस्+सृ)

(छ) विष्णुः क्षीरसागरे ................................। (नि+वस्)

(ज) कविः काव्यं ................................। (वि+लिख्)

(झ) गुरवः छात्रान् ................................। (परि+पृच्छ्)

(ञ) अन्तेवासिनः वेदं ................................। (अव+गम्)

(ट) प्राचार्यः कार्यालयात् ................................। (निर्+गम्)

## योग्यता-विस्तारः

संस्कृतभाषायां द्वाविंशतिः (२२) उपसर्गाः विद्यन्ते। तद्यथा -

| | | | |
|---|---|---|---|
| १. | प्र | प्रभवति, प्रकर्षः, प्रयत्नः, प्रतिष्ठा | गङ्गा हिमालयात् प्रभवति। |
| २. | परा | पराजयते, पराभवति | अध्ययनात् पराजयते। |

| | | | |
|---|---|---|---|
| ३. | अप | अपहरति, अपकरोति | चौरः धनम् अपहरति। |
| ४. | सम् | संस्करोति, सङ्गच्छते | अध्यापकः छात्रं संस्करोति। |
| ५. | अनु | अनुगच्छति, अनुकरोति | शिष्यः गुरुम् अनुगच्छति। |
| ६. | अव | अवगच्छति, अवतरति | रामः पाठम् अवगच्छति। |
| ७. | निर् | निर्गच्छति, निराकरोति | प्राचार्यः कार्यालयात् निर्गच्छति। |
| ८. | निस् | निष्कारणम्, निस्सरति | अमरकण्टकात् नर्मदा निस्सरति। |
| ९. | दुस् | दुस्त्याज्यः, दुष्प्रयोजनम् | स्वभावः दुस्त्याज्यः भवति। |
| १०. | दुर् | दुर्बोध्यः, दुर्लभः | अयं गूढविषयः दुर्बोध्योऽस्ति। |
| ११. | वि | विजयते, विहरति | धर्मः सदा विजयते। |
| १२. | आङ् | आकण्ठम्, आजीवनम् | आकण्ठं जलं पीतम्। |
| १३. | नि | निगदति, निपतति | पुत्रः पितरं निगदति। |
| १४. | अधि | अधिराजते, अधिशेते | विद्वान् सर्वत्र अधिराजते। |
| १५. | अति | अतिवादः, अत्याचारः | अतिवादो न कर्तव्यः |
| १६. | सु | सुपुत्रेण, सुशोभते | उद्याने पुष्पानि सुशोभन्ते। |
| १७. | उत् | उड्डयते, उत्पतितः | पक्षिणः आकाशे उड्डयन्ते। |
| १८. | अभि | अभिगच्छति, अभ्यागतः | अभ्यागतः सर्वैः सदा पूजनीयः। |
| १९. | प्रति | प्रत्युपकारः, प्रत्यवदत् | पुत्री मातरं प्रत्यवदत्। |
| २०. | परि | परित्यजामि, परिवर्तनम् | अहं दुष्टं परित्यजामि। |
| २१. | उप | उपगच्छति, उपहरति | शिष्यः अध्ययनार्थं गुरुम् उपगच्छति |
| २२. | अपि | अपिद्धाति | द्वारपालः द्वारम् अपिद्धाति/पिद्धाति |

**अलम्, बहिस्, अन्तर् -** इत्यादयः उपसर्गतुल्याः एव भवन्ति।

यथा- अलम् + करोति - अलङ्करोति।

बहिस् + करोति - बहिष्करोति।

अन्तर् + भवति- अन्तर्भवति।

**स्वी, उष्णी, सज्जी -** इत्यादयः अपि उपसर्गतुल्याः वर्तन्ते।

यथा- स्वी + करोति - स्वीकरोति।

उष्णी + करोति - उष्णीकरोति।

सज्जी + करोति - सज्जीकरोति।

# त्रयोदशः पाठः

# समासपरिचयः

**विभक्तिर्लुप्यते यत्र तदर्थस्तु प्रतीयते।**
**पदानां चैकपद्यञ्च समासः सोऽभिधीयते॥**

'सम्' उपसर्गपूर्वकात् 'असु क्षेपणे' इत्यस्माद् धातोः 'घञ्' प्रत्यये कृते सति समासः इति रूपं निष्पद्यते। सङ्क्षेपः इति, अपि च - समसनं समासः। अनेकपदानाम् एकपदीभवनं समासः। बहूनां पदानां मिलित्वैकपदभवनं समासः। समस्यते एकीक्रियते प्रयोक्तृभिः इति समासः।

- ❖ समासः प्रायः सुबन्तानामेव भवति, न तु तिङन्तानाम्।
- ❖ समासः युगपद् द्वयोः सुबन्तयोः अथवा बहूनां सुबन्तानां भवति।
- ❖ परस्परान्वितयोः सुबन्तयोः एव समासो भवति। यत्र परस्परान्वयो नास्ति तत्र समासो न जायते। यथा - राज्ञः पुरुषः - राजपुरुषः। अत्र द्वयोः पदयोः परस्परान्वयोऽस्ति, अतः तयोः समासः विहितः अस्ति।
- ❖ समासे पूर्वत्र श्रूयमाणं पदं पूर्वपदमिति, उत्तरत्र श्रूयमाणं पदम् उत्तरपदमिति च व्यवह्रियते। यथा - वेदस्य मन्त्रः - वेदमन्त्रः। इह वेदः इति पूर्वपदम्, मन्त्रः इति उत्तरपदम्।

- ❖ समासे जाते पूर्वपदम् उत्तरपदञ्च प्रातिपदिकरूपेण स्थितं भवति। ततः समस्तात् पदात् विभक्तिः योजनीया।
- ❖ का नाम वृत्तिः ? परार्थाभिधानं वृत्तिः अभिधीयते अनेन इति अभिधानम्। परार्थस्य अभिधानम् इति परार्थाभिधानम्। (अभिधानं नाम कथनम्)

### वृत्तिः पञ्चधा -

- ❖ कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्चवृत्तयः।
- ❖ कृदन्तवृत्तिः - कारकः - करोति इति कारकः।
- ❖ तद्धितघटकवृत्तिः - दाशरथिः - दशरथस्य अपत्यं पुमान् इति दाशरथिः।

- समासवृत्तिः - भूतपूर्वः - पूर्वं भूतः इति भूतपूर्वः।
- एकशेषवृत्तिः - पितरौ - माता च पिता च इति पितरौ।
- सनाद्यन्तधातुरूपवृत्तिः - पिपठिषति - पठितुमिच्छति इति पिपठिषति।

**विग्रहः -** वृत्तेर्योऽर्थः तस्यावबोधकं वाक्यं विग्रह इत्युच्यते। समासादेः अर्थं बोधयितुं यद् वाक्यमुच्यते तद् वाक्यं विग्रहः इत्यपि व्यवह्रियते।वृत्यर्थावबोधकं वाक्यं विग्रहः। स च लौकिकोऽलौकिकविग्रहश्चेति द्विधा।

- लोके प्रयोगार्ह एव लौकिकः। लोके प्रयोगानर्हः एवालौकिकः।
- लौकिकविग्रहः अपि द्विधा - स्वपदविग्रहः अस्वपदविग्रहश्चेति।
- स्वपदविग्रहः - यदि समासस्यार्थः समासघटकैः पदैः विव्रियते तर्हि स्वपदविग्रहो भवति। तत् समासघटकपदसहितं वाक्यं स्वपदविग्रह इत्युच्यते। यथा - ग्रामं गतः - ग्रामगतः इति स्वपदविग्रहः। इह समस्तपदस्य विग्रहं कर्तुम् अन्यस्य पदस्य साहाय्यं न स्वीकृतम्। ग्रामगतः इति पदमाश्रित्यैव विग्रहो विहितः।
- अस्वपदविग्रहः - समासस्य अर्थः समासघटकपदानि विहाय इतरैः पदैः विव्रियते तदा अस्वपदविग्रह इत्युच्यते। अर्थात् समासघटकपदरहितं वाक्यम् अस्वपदविग्रहः इति। नित्यसमासे अस्वपदविग्रहः विधीयते। यथा - उपकृष्णम् इति समासः। कृष्णस्य समीपम् इति अस्वपदविग्रहः। इह समीपम् इति पदं न समासघटकं पदम्।
- उदाहरणम् - गुरुश्च शिष्यश्च - गुरुशिष्यौ। अर्जुनश्च भरतश्च - अर्जुनभरतौ। कृष्णस्य समीपम् - उपकृष्णम्। पीतम् अम्बरं यस्य सः - पीताम्बरः। वेदस्य ऋचः वेदर्चः।

## समासभेदाः -

समासः द्विधा केवलसमासः विशेषसमासश्चेति -

## केवलसमासः

तत्पुरुषादिसंज्ञाविनिर्मुक्तः समाससंज्ञामात्रयुक्तः केवलसमासः।

यथा -भूतपूर्वः। पूर्वं भूतः इति भूतपूर्वः। जीमूतस्य इव इति - जीमूतस्येव - (शुक्लयजुर्वेदः, माध्यन्दिनी शाखा।) वागर्थाविव।

## विशेषसमासः

समासे पूर्वपदस्य उत्तरपदस्य च कश्चन अर्थो भवति। तत्र कदाचित् पूर्वपदार्थस्य प्राधान्यं भवति, कदाचित् उत्तरपदस्य प्राधान्यं भवति, कदाचित् द्वयोरपि पदार्थयोः प्राधान्यं भवति, पुनः कदाचित् द्वयोरपि पदार्थयोः प्राधान्यं न भवति। तत्र अन्यस्यैव पदार्थस्य प्राधान्यं भवति। पदार्थप्राधान्येन समासः चतुर्धा विभक्तोऽस्ति। ते च - अव्ययीभावसमासः, तत्पुरुषसमासः, बहुव्रीहिसमासः, द्वन्द्वसमासः।

## अव्ययीभावसमासः

प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभावसमासः। अव्ययीभावसमासः प्रायः (३३) त्रयस्त्रिंशत् भवन्ति। तेषु प्रसिद्धाः (१२) द्वादश। ते च सर्वे अव्ययपूर्वपदरूपेण, अव्ययोत्तररूपेण, अव्ययपदरहितरूपेण च त्रिधा विभज्यन्ते। तेषां क्रमेण उदाहरणानि यथा -

(क) उपकृष्णम् - कृष्णस्य समीपम् इति उपकृष्णम्। आचार्यस्य समीपम् इति उपाचार्यम्

(ख) शाकप्रति - शाकस्य लेशः इति शाकप्रति।

(ग) पारेगङ्गम् - गङ्गायाः पारे इति पारेगङ्गम्। गङ्गायाः मध्ये इति मध्येगङ्गम्।

## तत्पुरुषसमासः

प्रायेण उत्तरपदार्थप्रधानः तत्पुरुषः। तत्पुरुषसमासः चतुर्धा यथा- सामान्यतत्पुरुषः, कर्मधारयः, द्विगुः, नञ् प्रभृतयश्चेति।

## सामान्यतत्पुरुषः सप्तधा

(क) प्रथमातत्पुरुषः - अर्धग्रामः - अर्धं ग्रामस्य इति अर्धग्रामः।

(ख) द्वितीयातत्पुरुषः - गृहगतः - गृहं गतः इति गृहगतः।

(ग) तृतीयातत्पुरुषः - नखभिन्नः - नखैः भिन्नः, इति नखभिन्नः।

(घ) चतुर्थीतत्पुरुषः - गोहितम् - गवे हितम् इति गोहितम्।

(ङ) पञ्चमीतत्पुरुषः - चोरभयम् - चोरात् भयम् इति चोरभयम्।

(च) षष्ठीतत्पुरुषः - 'वृक्षमूलम्' वृक्षस्य मूलम् इति वृक्षमूलम्।

(छ) सप्तमीतत्पुरुषः - कार्यकुशलः - कार्ये कुशलः इति कार्यकुशलः।

**कर्मधारयसमासः नवधा -**

| | | | |
|---|---|---|---|
| (क) | विशेषणपूर्वपदकर्मधारयः | - | नीलमेघः - नीलो मेघः इति नीलमेघः। |
| (ख) | विशेषणोत्तरपदकर्मधारयः | - | वैयाकरणखसूचिः - वैयाकरणः खसूचिः इति वैयाकरणखसूचिः। |
| (ग) | विशेषणोभयपदकर्मधारयः | - | 'शीतोष्णम्' शीतम् उष्णम् इति शीतोष्णम् |
| (घ) | उपमानपूर्वपदकर्मधारयः | - | मेघश्यामः - मेघः इव श्यामः इति मेघश्यामः |
| (ङ) | उपमानोत्तरपदकर्मधारयः | - | नरव्याघ्रः - नरः व्याघ्रः इव इति नरव्याघ्रः |
| (च) | अवधारणापूर्वपदकर्मधारयः | - | 'विद्याधनम्' विद्या एव धनम् इति विद्याधनम् |
| (छ) | सम्भावनापूर्वपदकर्मधारयः | - | आम्रवृक्षः - आम्रः इति वृक्षः आम्रवृक्षः |
| (ज) | मध्यमपदलोपकर्मधारयः | - | 'शाकपार्थिवः'शाकप्रियः पार्थिव इति शाकपार्थिवः। |
| (झ) | मयूरव्यंसकादिकर्मधारयः | - | 'देशान्तरम्' अन्यो देशः इति देशान्तरम्। सूत्रान्तरम्, पाठान्तरम्। |

**द्विगुसमासः त्रिधा -**

| | | | |
|---|---|---|---|
| (क) | समाहारद्विगुः | - | त्रिलोकी - त्रयाणां लोकानां समाहारः इति त्रिलोकी |
| (ख) | तद्धितार्थद्विगुः | - | षाण्मातुरः - षण्णां मातृणाम् अपत्यम् इति षाण्मातुरः |
| (ग) | उत्तरपदद्विगुः | - | पञ्चगवधनः - पञ्च गावः धनं यस्य सः पञ्चगवधनः। |

**नञ्प्रभृतयः पञ्चधा -**

| | | | |
|---|---|---|---|
| (क) | नञ्समासः | - | अधर्मः - न धर्मः इति अधर्मः। |
| (ख) | कुसमासः | - | कुपुरुषः - कुत्सितः पुरुषः इति कुपुरुषः। |
| (ग) | गतिसमासः | - | शुक्लीकृत्य - अशुक्लं शुक्लं कृत्वा इति शुक्लीकृत्य। |
| (घ) | उपपदसमासः | - | कुम्भकारः - कुम्भं करोति इति कुम्भकारः। |
| (ङ) | प्रादिसमासः | - | प्राचार्यः - प्रगतः आचार्यः इति प्राचार्यः। अतिदेवः - अतिक्रान्तः देवम् इति अतिदेवः निर्वाराणसिः - निष्क्रान्तः वाराणस्या इति निर्वाराणसिः। |

## बहुव्रीहिसमासः -

प्रायेण अन्यपदार्थप्रधानः बहुव्रीहिसमासः।

बहुव्रीहिसमासः द्विधा- सामान्यबहुव्रीहिः विशेषबहुव्रीहिश्चेति। सामान्यबहुव्रीहिः षोढा-

(क) द्वितीयार्थबहुव्रीहिः - प्राप्तोदकः - प्राप्तम् उदकं यं सः प्राप्तोदकः (ग्रामः)

(ख) तृतियार्थबहुव्रीहिः - पीतक्षीरः - पीतं क्षीरं येन सः पीतक्षीरः (बालः)

(ग) चतुर्थ्यर्थबहुव्रीहिः - दत्तपशुः - दत्तः पशुः यस्मै सः दत्तपशुः (रुद्रः)

(घ) पञ्चम्यर्थबहुव्रीहिः - उद्धृतजलः - उद्धृतं जलं यस्मात् सः उद्धृतजलः (कूपः)

(ङ) षष्ठ्यर्थबहुव्रीहिः - पीताम्बरः - पीतम् अम्बरं यस्य सः पीताम्बरः (हरिः)

(च) सप्तम्यर्थबहुव्रीहिः - बहुफलः - बहूनि फलानि यस्मिन् सः बहुफलः (वृक्षः)

## विशेषबहुव्रीहिः नवधा -

(क) व्यधिकरणबहुव्रीहिः - चक्रपाणिः - चक्रं पाणौ यस्य सः चक्रपाणिः।

(ख) संख्योत्तरबहुव्रीहिः - उपविंशाः - विंशतेः समीपे ये सन्ति, ते उपविंशाः।

(ग) संख्योभयपदबहुव्रीहिः - द्वित्राः - द्वौ वा त्रयो वा इति द्वित्राः।

(घ) सहपूर्वपदबहुव्रीहिः - सशिष्यः - शिष्येण सह वर्तते इति सशिष्यः।

(ङ) नञ्बहुव्रीहिः - अपुत्रः - अविद्यमानः पुत्रः यस्य सः अपुत्रः।

(च) प्रादिबहुव्रीहिः - निष्कृपः - निर्गता कृपा यस्मात् सः निष्कृपः।

(छ) उपमानपूर्वपदबहुव्रीहिः - गजाननः - गजमिव आननं यस्य सः गजाननः।

(ज) व्यतिहारलक्षणबहुव्रीहिः - केशाकेशि - केशेषु केशेषु गृहीत्वा प्रवृत्तम् इदं युद्धम् इति केशाकेशि।

(झ) दिगन्तराललक्षणबहुव्रीहिः - दक्षिणपूर्वा - दक्षिणस्याः पूर्वस्याः दिशो यदन्तरालम् इति दक्षिणपूर्वा।

## द्वन्द्वसमासः -

प्रायेण उभयपदार्थप्रधानो द्वन्द्वसमासः। द्वन्द्वसमासः द्विधा इतरेतरद्वन्द्वः समाहार-द्वन्द्वश्चेति। इतरेतरद्वन्द्वसमासः द्विधा।

द्विपदद्वन्द्वसमासः - रामश्च कृष्णश्च इति रामकृष्णौ।

बहुपदद्वन्द्वसमासः - हरिश्च हरश्च गुरुश्च इति हरिहरगुरवः।

**समाहारद्वन्द्वसमासः द्विधा -**

(क) समाहारद्वन्द्वः - संज्ञापरिभाषम् - संज्ञा च परिभाषा च अनयोः समाहार इति संज्ञापरिभाषम्।

(ख) नित्यसमाहारद्वन्द्वः - पाणिपादम् - पाणी च पादौ च एतेषां समाहारः इति पाणिपादम्।

## शब्दार्थाः

| | |
|---|---|
| अभिधीयते | ज्ञायते |
| त्रयस्त्रिंशत् | त्र्यधिकत्रिंशत् |
| प्रयोक्तृभिः | प्रयोगकर्तृभिः |
| तिङन्तानाम् | क्रियापदानाम् |
| सुबन्तानाम् | सुबन्तपदानाम् |
| युगपद् | सम्भूय |
| क्वचित् | कुत्रचित् |
| व्यवह्रियते | प्रयुज्यते |
| षोढा | षड्विधः |
| नवधा | नवविधः |
| विव्रियते | विवरणं क्रियते |
| पाणिपादम् | पाणिश्च पादश्च |
| केशाकेशि | केशेषु केशेषु गृहीत्वा यद् युद्धम् |
| वृत्तिः | कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपा |
| षाण्मातुरः | कार्त्तिकेयः/स्कन्दः |

# अभ्यासः

१. **उच्चारणं कुरुत -**

सङ्क्षेपः, निष्पद्यते, बहुव्रीहिः, वैयाकरणरणखसूचिः, शीतोष्णम्, शाकपार्थिवः, षोढा, विग्रहः, वृत्तिः, कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः।

२. **अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत -**

(क) समासः इत्यत्र कः धातुः ?

(ख) समासस्य लक्षणं लिखत।

(ग) विशेषसमासाः कति सन्ति।

(घ) अन्यपदार्थप्रधानः कः समासः ?

(ङ) विग्रहः इत्यस्य कोऽर्थः ?

३. **पूर्णवाक्येन उत्तरत -**

(क) का नाम वृत्तिः ?

(ख) कति वृत्तयः ?

(ग) विग्रहस्य कति भेदाः ?

(घ) द्वन्द्वसमासस्य द्वौ प्रकारौ कौ ?

(ङ) केवलसमासस्य उदाहरणं लिखत।

४. **रिक्तस्थानं पूरयत -**

(क) समासे ................................ भेदाः सन्ति ?

(ख) समासे आदौ विद्यमानं पदं ................................ इति उच्यते।

(ग) समसान्ते विद्यमानं पदं ................................ इति उच्यते।

(घ) उभयपदार्थप्रधानः ................................ समासः।

(ङ) ................................ रूपाः पञ्चवृत्तयः।

(च) विभक्तिर्लुप्यते यत्र ..............................।

................................ समासः सोऽभिधीयते ॥

## ५. समस्तपदं लिखत -

(क) नरः शार्दुलः इव। ................................

(ख) राज्ञः सभा। ................................

(ग) विद्या एव धनम्। ................................

(घ) माता च पिता च। ................................

(ङ) नीलः मेघः। ................................

## ६. विग्रहवाक्यं विलिख्य समासनाम लिखत -

| | विग्रहवाक्यम् | समासनाम |
|---|---|---|
| (क) पीताम्बरः | ------------ + ------------ | ------------------- |
| (ख) रामलक्ष्मणौ | ------------ + ------------ | ------------------- |
| (ग) पुत्रपौत्रम् | ------------ + ------------ | ------------------- |
| (घ) रामलक्ष्मणभरतशत्रुघ्नाः | ------------ + ------------ | ------------------- |
| (ङ) त्रिभुवनम् | ------------ + ------------ | ------------------- |
| (च) सप्तपदी | ------------ + ------------ | ------------------- |
| (छ) चतुर्युगम् | ------------ + ------------ | ------------------- |
| (ज) निर्वस्तु | ------------ + ------------ | ------------------- |
| (झ) उपशालम् | ------------ + ------------ | ------------------- |
| (ञ) आकन्याकुमारि | ------------ + ------------ | ------------------- |

## ७. समुचितं मेलयत -

| | |
|---|---|
| (क) अनेकपदानाम् एकपदीभवनं | अव्ययीभावसमासः |
| (ख) वृत्त्यर्थावबोधकं वाक्यं | तत्पुरुषसमासः |
| (ग) परार्थाभिधानं | विग्रहः |
| (घ) प्रायेण पूर्वपदार्थप्रधानः | द्वन्द्वः |
| (ङ) प्रायेण उत्तरपदार्थप्रधानः | बहुव्रीहिसमासः |
| (च) प्रायेण अन्यपदार्थप्रधानः | समासः |
| (छ) प्रायेण उभयपदार्थप्रधानः | वृत्तिः |

८. **अधोलिखितसमासानाम् उदाहरणानि तत्तत्स्थानेषु स्थापयत -**

संज्ञापरिभाषम्, प्राप्तोदकः, चक्रपाणिः, अधर्मः, पञ्चगवधनः, राजपुरुषः, पारेगङ्गम्

(क) समाहारद्वन्द्वसमासः ................................।

(ख) बहुव्रीहिसमासः ................................।

(ग) नञ्समासः ................................।

(घ) व्यधिकरणबहुव्रीहिः ................................।

(ङ) द्विगुसमासः ................................।

(च) तत्पुरुषः ................................।

(छ) अव्ययीभावसमासः ................................।

९. **अधोलिखितोदाहरणानां सन्धिविच्छेदपूर्वकं सन्धिसूत्राणि लिखत -**

| | सन्धिविच्छेदः | सन्धिसूत्राणि |
|---|---|---|
| (क) इत्युच्यते | ------------ + ------------ | -------------------- |
| (ख) चैकपद्यम् | ------------ + ------------ | -------------------- |
| (ग) अर्जुनभरतावगच्छताम् | ------------ + ------------ | -------------------- |
| (घ) फलितार्थः | ------------ + ------------ | -------------------- |
| (ङ) आश्रित्यैव | ------------ + ------------ | -------------------- |
| (च) विग्रहो द्विधः | ------------ + ------------ | -------------------- |
| (ज) प्रभृतयश्चेति | ------------ + ------------ | -------------------- |

## योग्यता-विस्तारः

- ➢ अव्ययीभावसमासे पदस्य अन्ते श्रूयमाणः अकारान्तः आकारान्तो वा शब्दः अकारान्तनपुंसकलिङ्गस्य एकवचनम् इव भवति। यथा - कृष्णस्य समीपम् उपकृष्णम्। शालायाः समीपम् = उपशालम्।
- ➢ अव्ययीभावसमासे पदस्य अन्ते श्रूयमाणः इकारान्तः ईकारान्तो वा शब्दः वारिशब्दस्य एकवचनम् इव भवति। यथा - मतिम् अनतिक्रम्य इति यथामति। आ कन्याकुमार्याः इति आकन्याकुमारि।

- अव्ययीभावसमासे पदस्य अन्ते श्रूयमाणः उकारान्तः, ऊकारान्तः, ओकारान्तः, औकारान्तो वा शब्दो भवति, सः मधुशब्दस्य एकवचनम् इव भवति। यथा - वस्तूनाम् अभावः इति निर्वस्तु। चमूं चमूं प्रति प्रतिचमु। गोः समीपम् इति उपगु।
- अव्ययीभावसमासे पदस्य अन्ते श्रूयमाणः ऋकारान्तः शब्दः ऋकारान्त नपुंसक-लिङ्गस्य एकवचनम् इव भवति। यथा - भ्रातरं भ्रातरं प्रति प्रतिभ्रातृ।

  (सर्वाणि अपि अव्ययीभावसमासयुक्तानि पदानि अव्ययानि भवन्ति। तेन सर्वासु विभक्तिषु प्रायेण तेषां रूपाणि समानानि एव भवन्ति)
- अव्ययीभावसमासे पदस्य अन्ते श्रूयमाणः अन्नन्तः शब्दः टच्-प्रत्ययं प्राप्नोति। यदि शब्दः नपुंसकलिङ्गे भवति तर्हि विकल्पेन टच् प्रत्ययं प्राप्नोति। टच्-प्रत्ययान्तः अयम् अन्नन्तः शब्दः अकारान्तनपुंसकस्य एकवचनम् इव भवति। यथा - आत्मनि इति = अध्यात्मम्। कर्माणि अनतिक्रम्य = यथाकर्मम्/ यथाकर्म।

**षोढा समासः संक्षेपाद् अष्टाविंशतिधा पुनः।**
**नित्यानित्यत्वयोगेन लुगलुक्त्वेन च द्विधा॥**
**तत्राष्टधा तत्पुरुषः सप्तधा कर्मधारयः।**
**सप्तधा च बहुव्रीहिर्द्विगुराभासितो द्विधा ॥**
**द्वन्द्वोऽपि द्विविधो ज्ञेयोऽव्ययीभावो द्विधा मतः।**
**तेषां पुनः समासानां प्राधान्यं स्याच्चतुर्विधम् ॥**
**चकारबहुलो द्वन्द्वः स चासौ कर्मधारयः।**
**यस्य येषां बहुव्रीहिः शेषस्तत्पुरुषः स्मृतः ॥**

# चतुर्दशः पाठः

# जागरूको भव

# (वीथीनाटकम्)

- १ -

नाटककारः - आगच्छन्तु, आगच्छन्तु। वीथीनाटकम् आगच्छन्तु।

(कोलाहलः)

अर्जुनः - (मध्ये आगत्य) (लौकिकः प्रादेशिकभाषया एतम् अभिप्रायं प्रकटयेत्।) किं भोः, कः एषः भवतां कोलाहलः ? उच्चैः किं वदन्तः सन्ति भवन्तः ?

नाटककारः - आगच्छन्तु, आगच्छन्तु, संस्कृतेन वीथीनाटकम् अस्ति। सर्वे आगच्छन्तु।

अर्जुनः - किम् ? वीथीनाटकं वा ? तदपि संस्कृतेन ? गच्छतु रे, संस्कृतनाटकम् को वा ज्ञातुं शक्नुयात् ?

नाटककारः - तथा नास्ति भोः। नाटकं सरलभाषया भवति। सर्वेषाम् अर्थबोधोऽपि भवति। भवान् अपि आगच्छतु।

अर्जुनः - एवं वा ? अस्तु तर्हि। अहमपि आगच्छामि। गच्छामस्तावत्। (जनान् उद्दिश्य) पश्यन्तु भोः, संस्कृतेन एते नाटकम् अभिनयन्ति इति श्रूयते। सरलतया सर्वेषां बोधः यथा स्यात् तथा अभिनयन्ति इति श्रूयते। पश्यामस्तावत्।

नाटककारः - आगच्छन्तु ..... आगच्छन्तु ......।

***

- २ -

(विवेकः आगच्छति।) (नटनायकः गीतं गापयति। सर्वे नटाः गीतं गायन्ति। तदनुगुणं विवेकः अभिनयति।)

गीतम् - विवेकः गृहमागतः। अहो श्रान्तः ! अहो श्रान्तः !
कार्यमहो कार्यं कार्यालये,

वेतनमल्पम्, आयः न्यूनम्,

कुटुम्बभरणं बहुकष्टम्,

दिनमनुदिनमपि वर्धते मूल्यम्,

पत्नीपुत्राः इच्छन्ति बहु बहु,

तण्डुलमानय, शाकम् आनय,

तैलम् आनय, क्षीरम् आनय,

पुस्तकमानय, लेखनीमानय,

अत्यावश्यकवस्तूनि आनय,

वराकः एषः कुप्यति, खिद्यते,

पुनरपि क्रुध्यति, अन्ते रोदिति,

कष्टमहो कष्टम्

जीवनयात्रा बहु कष्टम्

कष्टम् अकटकटा ऽऽ कष्टम् अकटकटा ऽऽ

विवेकः - गीते ! गीते ! (द्वारशब्दं करोति।) द्वारोद्घाटनस्य अभिनयः)

गणेशः - अहो, पितः ! आगच्छतु।

विवेकः - गणेशः ! भवतः माता कुत्र गतवती ?

गणेशः - कुत्रापि संस्कृतनाटकम् अस्ति, तत्र गतवती।

विवेकः - कदा आगच्छति सा ?

गणेशः - अहं किं जानामि ?

विवेकः - अस्तु, गणेशः, बुभुक्षा भवति। पाकशालायां किम् अस्ति इति पश्यतु। किञ्चित् काफी करोतु।

गणेशः - अस्तु, पश्यामि। (अन्तः गत्वा आगत्य) पितः ! एतत् स्वीकरोतु। (काफी-चषकं ददाति।)

विवेकः - (पीत्वा) किमिदं काफी वा ? उष्णजलं वा ?

गणेशः - अहं किं करोमि ? गृहे शर्करा नास्ति। काफीचूर्णं नास्ति। क्षीरमपि नास्ति। कथं काफी करोमि ?

विवेकः - प्रतिदिनम् एवमेव। सर्वदा नास्ति ..... नास्ति ..... नास्ति ..... नास्ति।

गणेशः - यदि भवान् यथेष्टम् आनयति तर्हि नास्ति इति किमर्थं वदामः ?

विवेकः - अस्तु, किं किं नास्ति इति वदतु। सर्वम् आनयामि।

गणेशः - श्रृणोतु, शर्करा नास्ति, गुडः नास्ति, तण्डुलः नास्ति, तैलं नास्ति, सूपः नास्ति, शाकः नास्ति, मृत्तैलं नास्ति......।

विवेकः - अये, अलम् इतोऽपि अधिककथनेन। (शिरोवेदनाम् अभिनयन् ) तर्हि किम् अस्ति ? तद् वदतु।

गणेशः - अहम् एकोऽस्मि। भवान् एकोऽस्ति, तावदेव।

विवेकः - हूँ, (खेदम् अनुभूय) अस्तु, स्यूतम् आनयतु। सर्वाणि वस्तूनि आनयामि। (गणेशः स्यूतम् आनीय ददाति।) गणेशः ! एक विषयः। अद्य भवतः सन्दर्शनम् आसीत् किल ? किं जातम् ?

गणेशः - तत् किं भवति ? यः धनं ददाति सः उद्योगं प्राप्नोति। यस्य प्रभावः (इन्फ्लुयेन्स्) अस्ति सः अपि उद्योगं प्राप्नोति।

विवेकः - तर्हि भवान् एवं करोतु। मणिशङ्करः इति एकः मम स्नेहितोऽस्ति। सः राजकीये व्यवहारे अतीव निपुणः अस्ति। प्रभावी पुरुषश्च। भवान् तं पश्यतु, मम नाम वदतु। उद्योगः लभ्यते एव।

गणेशः - अस्तु, इदानीमेव गच्छामि।

विवेकः - अहम् आपणं गच्छामि।

- ३ -

(मार्गः - विवेकः गच्छन्नस्ति। मित्रं रमेशः अभिमुखम् आगच्छति।)

विवेकः - हरिः ओम्, दिनेशः !

दिनेशः - हरिः ओम् ! किं भोः!, दर्शनमेव नास्ति ?

विवेकः - अहम् अन्यत्र गतवान् आसम्। सर्वं कुशलं वा ? (अग्रे दृष्ट्वा) आगच्छतु भोः। अत्रैव उपाहारमन्दिरम् अस्ति। काफी पिबामः।

(उपाहारमन्दिरप्रवेशम् अभिनीय आसने उपविश्य)

दिनेशः - अये ! कोऽस्ति ?

वितारकः - किम् आवश्यकम् ?

दिनशः - किं किम् अस्ति ?

वितारकः - इडली, क्वथितम्, पृथुकाः, उपमा, बन्स, पूरिका, वडा, दध्योदनम्.......

दिनेशः - किमपि मास्तु। अर्धार्धं काफी ददातु।

वितारकः - (स्वागतम्) वराकाः ! सर्वं पृच्छन्ति। अनन्तरम् अर्धार्धं काफी इति वदन्ति। (अन्तर्भागम् अभिलक्ष्य उच्चस्वरेण) अर्धार्धं काफी ..... (काफी आनीय स्थापयति।)

विवेकः - किं भोः, अत्र आगच्छतु।

वितारकः - किम् ?

विवेकः - एतत् किम् ?

वितारकः - चषकः।

विवेकः - चषके किम् अस्ति ?

वितारकः - चषके काफी अस्ति।

दिनेशः - (कोपेन) काफीमध्ये किम् अस्ति ?

वितारकः - अहो, मक्षिका वा ? तत्र किमस्ति ? बहिः क्षिपतु। पिबतु।

विवेकः - तथा कर्तुं न शक्यते। अन्यत् ददातु।

वितारकः - तर्हि अहम् एव मक्षिकाम् उन्नीय क्षिपामि। (तथा करोति) इदानीं पिबतु।

